# Shankaradigvijayam

# શઙ્કરદિગ્વિજયમ્

## Document Information

Text title : Shankara Digvijayam

File name : shankaradigvijayam.itx

Category : major_works, shankarAchArya

Location : doc_z_misc_major_works

Author : Madhvacharya Vidyaranya

Proofread by : Mohan Chettor

Latest update : July 13, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 24, 2024

*sanskritdocuments.org*

# શઙ્કરદિગ્વિજયમ્

## અનુક્રમણિકા

૧. પ્રથમઃ સર્ગઃ ઉપોદ્ઘાતઃ

૨. દ્વિતીયઃ સર્ગઃ આચાર્યજન્માદિકથનમ્

૩. તૃતીયઃ સર્ગઃ દેવાવતારઃ

૪. ચતુર્થઃ સર્ગઃ કૌમારચરિતવર્ણનમ્

૫. પઞ્ચમઃ સર્ગઃ સંન્યાસગ્રહણમ્

૬. ષષઠઃ સર્ગઃ આત્મવિદ્યાપ્રતિષ્ઠા

૭. સપ્તમઃ સર્ગઃ વ્યાસદર્શનાદિચરિતવર્ણનમ્

૮. અષ્ટમઃ સર્ગઃ શ્રીમદાચાર્ય મણ્ડનમિશ્રસંવાદઃ

૯. નવમઃ સર્ગઃ શ્રીમદાચાર્યસરસ્વતીસંવાદઃ

૧૦. દશમઃ સર્ગઃ રાજદેહપ્રવેશાદિ કથનમ્

૧૧. એકાદશઃ સર્ગઃ ઉગ્રભૈરવવધઃ

૧૨. દ્વાદશઃ સર્ગઃ હસ્તામલકાદીનાં શિષ્યત્વેન ગ્રહણમ્

૧૩. ત્રયોદશઃ સર્ગઃ બ્રહ્મવિદ્યાવિચારઃ

૧૪. ચતુર્દશઃ સર્ગઃ પદ્મપાદતીર્થયાત્રાવર્ણનમ્

૧૫. પઞ્ચદશઃ સર્ગઃ આચાર્યકૃતદિગ્વિજયવર્ણનમ્

૧૬. ષોડશઃ સર્ગઃ શ્રીમદાચાર્યાણાં શારદાપીઠવાસવર્ણનમ્

# શઙ્કરદિગ્વિજયમ્

## ॥ ૧. પ્રથમઃ સર્ગઃ ઉપોદ્ઘાતઃ ॥

અથ પ્રથમઃ સર્ગઃ ॥ ૧॥

પ્રણમ્ય પરમાત્માનં શ્રીવિદ્યાતીર્થરૂપિણમ્ ।
પ્રાચીનશઙ્કરજયે સારઃ સઙ્ગૃહ્યતે સ્ફુટમ્ ॥ ૧॥

યદ્વદ્ઘટાનાં પટલો વિશાલો વિલોક્યતેઽલ્પે કિલ દર્પણેઽપિ ।
તદ્વન્મદીયે લઘુસઙ્ગ્રહેઽસ્મિન્નુદ્વીક્ષ્યતાં શાઙ્કરવાક્યસારઃ ॥ ૨॥

યથાઽતિરુચ્યે મધુરેઽપિ રુચ્યુત્પાદાય રુચ્યાન્તરયોજનાઽર્હા ।
તથેષ્યતાં પ્રાક્-કવિ-હૃદ્ય-પદ્યષ્વેષાપિ મત્પદ્ય-નિવેશભઙ્ગી ॥ ૩॥

સ્તુતોઽપિ સમ્યક્ કવિભિઃ પુરાણૈઃ કૃત્યાઽપિ નસ્તુષ્યતુ ભાષ્યકારઃ ।
ક્ષીરાબ્ધિવાસી સરસીરુહાક્ષઃ ક્ષીરં પુનઃ કિં ચકમે ન ગોષ્ઠે ॥ ૪॥

પયોબ્ધિવિવરીસુનિઃસૃતસુધાઝરીમાધુરી-
ધુરીણભણિતાધરીકૃતફણાધરાધીશિતુઃ ।
શિવશઙ્કરાભિધજગદ્ગૂરોઃ પ્રાયશો
યશો હૃદયશોધકં કલયિતું સમીહામહે ॥ ૫॥

ક્વેમે શઙ્કરસદ્ગુરોર્ગુણગણા દિગ્જાલકૂલઙ્કુષાઃ
કાલોન્મીલિતમાલતીપરિમલાવષ્ટમ્ભમુષિટિન્ધયાઃ ।
ક્વાહં હન્ત તથાઽપિ સદ્ગુરુકૃપાપીયૂષપારમ્પરી-
મગ્નોન્મગ્નકટાક્ષવીક્ષણબલાદસ્તિ પ્રશસ્તાઽર્હતા ॥ ૬॥

ધન્યમ્મન્યવિવેકશૂન્યસુજનમ્મન્યાબ્ધિકન્યાનટી-
નૃત્યોન્મત્તનરાધમાધમકથાંસમ્મર્દદુષ્કર્દમૈઃ ।
દિગ્ધાં મે ગિરમદ્ય શઙ્કરગુરુક્રીડાસમુદ્યદ્યશઃ-
પારાવારસમુચ્ચલજ્જલઝરૈઃ સઙ્ક્ષાલયામિ સ્ફુટમ્ ॥ ૭॥

વન્ધ્યાસુનુખરી વિષાણસદૃશક્ષુદ્રક્ષિતીન્દ્રક્ષમા-
　શૌર્યૌદાર્યદયાદિવર્ણનકળાદુર્વાસનાવાસિતામ્ ।
મદ્વાણીમધિવાસયામિ યમિનસ્ત્રૈલોક્યરઙ્ગસ્થલી-
　નૃત્યત્કીર્તિનટીપટીરપટલીચૂર્ણૈર્વિકીર્ણૈઃ ક્ષિતૌ ॥ ૮॥

પીયૂષદ્યુતિખણ્ડમણ્ડનકૃપારૂપાન્તર શ્રી ગુરુ-
　પ્રેમસ્થેમસમર્હણાર્હમધુરવ્યાહારસૂનોત્કરઃ ।
પ્રૌઢોઽયં નવકાલિદાસકવિતાસન્તાનસન્તાનકો
　દયાદદ્ય સમુદ્યતઃ સુમનસામામોદપારમ્પરીમ્ ॥ ૯॥

સામોદરૈરનુમોદિતા મૃગમદૈરાનન્દિતા ચન્દનૈ-
　ર્મન્દારૈરભિવન્દિતા પ્રિયગિરા કાશ્મીરજૈઃ સ્મેરિતા ।
વાગેષા નવકાલિદાસવિદુષો દોષોજ્ઝિતા દુષ્કવિ-
　વ્રાતૈર્નિષ્કરુણૈઃ ક્રિયેત વિકૃતા ધેનુસ્તુરુષ્કૈરિવ ॥ ૧૦॥

યદ્વા દીનદયાલવઃ સહૃદયાઃ સૌજન્યકલ્લોલિની-
　દોલાન્દોલનખેલનૈકરસિકસ્વાન્તાઃ સમન્તાદમી ।
સન્તઃ સન્તિ પરોક્તિમૌક્તિકજુષઃ કિં ચિન્તયાઽનન્તયા
　યદ્વા તુષ્યતિ શઙ્કરઃ પરગુરુઃ કારુણ્યરત્નાકરઃ ॥ ૧૧॥

ઉપક્રમ્ય સ્તોતું કતિચન ગુણાઞ્છઙ્કરગુરોઃ
　પ્રભગ્નાઃ શ્લોકાર્ધે કતિચન તદર્ધેરચને ।
અહં તુષ્ટૂષુસ્તાનહહ કલયે શીતકિરણં
　કરાભ્યામાહર્તું વ્યવસિતમતેઃ સાહસિકતામ્ ॥ ૧૨॥

તથાઽપ્યુજ્જૃમ્ભન્તે મયિ વિપુલદુગ્ધાબ્ધિલહરી-
　લલત્કલ્લોલાલીલસિતપરિહાસૈકરસિકાઃ ।
અમી મૂકાન્વાચાલયિતુમપિ શક્તા યતિપતેઃ
　કટાક્ષાઃ કિં ચિત્રં ભૃશમઘટિતાભીષ્ટઘટને ॥ ૧૩॥

અસ્મજ્જિહ્વાગ્રસિહાસનમુપનયતુ સ્વોક્તિધારામુદારાસ
　અદ્વતાચાર્યપાદસ્તુતિકૃતસુકૃતોદારતા શારદામ્બા ।
નૃત્યન્મૃત્યુઞ્જયોચ્ચૈર્મુકુટતટકુટીનિઃખ્રવત્સ્વઃસ્રવન્તી-
　કલ્લોલોદ્વેલકોલાહલમદલરીખણ્ડિપાણ્ડિત્યહૃદ્યામ્ ॥ ૧૪॥

ક્વેદં શઙ્કરસદ્ગુરોઃ સુચરિતં ક્વાહં વરાકી કથં
　નિબન્ધ્નાસિ ચિરાર્જિતં મમ યશઃ કિં મજ્જયસ્યમ્બુધૌ ।

ઇત્યુક્ત્વા ચપલાં પલાયિતવતીં વાચં નિયુઙ્ક્તે બલાત્
પ્રત્યાહૃત્ય ગુણસ્તુતૌ કવિગણશ્ચિત્રં ગુર્ગૈરવમ ॥ ૧૫॥

રૂક્ષૈકાક્ષરવાઙ્નિઘણ્ટુશરણૈરૌણાદિકપ્રત્યય-
પ્રાયૈર્હન્ત યઽન્તદન્તુરતરૈર્દુર્બોધદૂરાન્વયૈઃ ।
ક્રૂરાણાં કવિતાવતાં કતિપયૈઃ કષ્ટેન કૃષ્ટૈઃ પદૈ-
ર્હાહાસ્યાદ્વશગા કિરાતવિતતેરેણીવ વાણી મમ ॥ ૧૬॥

નેતા યત્રોલ્લસતિ ભગવત્પાદસંજ્ઞો મહેશઃ
શાન્તિર્યત્ર પ્રકચતિ રસઃ શેષવાનુજ્જ્વલાદ્યૈઃ ।
યત્રાવિદ્યાક્ષતિરપિ ફલં તસ્ય કાવ્યસ્ય કર્તા
ધન્યો વ્યાસાચલકવિવરસ્તત્કૃતિજ્ઞાશ્ચ ધન્યાઃ ॥ ૧૭॥

તત્રાદિમ ઉપોદ્ઘાતો દ્વિતેયે તુ તદુદ્ભવઃ ।
તૃતીયે તત્તદમૃતાન્ધોવતારનિરૂપણમ્ ॥ ૧૮॥

ચતુર્થસર્ગે તચ્છુદ્ધાષ્ટમપ્રાક્ચરિતં સ્થિતમ્ ।
પઞ્ચમે તયોગ્યસુખાશ્રમપ્રાપ્તિનિરૂપણમ્ ॥ ૧૯॥

મહતાઽનેહસા યૈષા સમ્પ્રદાયાગતા ગતા ।
તસ્યાઃ શુદ્ધાત્મવિદ્યાયાઃ ષષ્ઠે સર્ગે પ્રતિષ્ઠિતિઃ ॥ ૨૦॥

તદ્વ્યાસાચાર્યસન્દર્શવિચિત્રં સપ્તમે સ્થિતમ્ ।
સ્થિતોઽષ્ટમે મણ્ડનાર્યસંવાદો નવમે મુનેઃ ॥ ૨૧॥

વાણીસાક્ષિકસાર્વજ્ઞનિર્વાહોપાયચિન્તનમ્ ।
દશમે યોગશક્ત્યા ભૂપતિકાયપ્રવેશનમ્ ॥ ૨૨॥

બુદ્ધ્વા મીનધ્વજકલાસ્તત્પ્રસઙ્ગપ્રપઞ્ચનમ્ ।
સર્ગ એકાદશે તૂગ્રભૈરવાભિધનિર્જયઃ ॥ ૨૩॥

દ્વાદશે હસ્તધાત્ર્યાર્યતોટકોભયસંશ્રયઃ ।
વાર્તિકાન્તબ્રહ્મવિદ્યાચાલનં તુ ત્રયોદશે ॥ ૨૪॥

ચતુર્દશે પદ્મપાદતીર્થયાત્રાનિરૂપણમ્ ।
સર્ગે પઞ્ચદશે તૂક્તં તદાશાજયકૌતુકમ્ ॥ ૨૫॥

ષોડશે શારદાપીઠવાસસ્તસ્ય મહાત્મનઃ ।
ઇતિ ષોડશભિઃ સર્ગૈર્વ્યુત્પાદ્યા શાઙ્કરી કથા ॥ ૨૬॥

સૈષા કલિમલચ્છેત્રી સકૃચ્છ્રુત્યાઽપિ કામદા ।
નાનાપ્રશ્નોત્તરૈ રમ્યા વિદામારભ્યતે મુદે ॥ ૨૭॥

એકદા દેવતા રૂપ્યાચલસ્થમુપતસ્થિરે ।
દેવદેવં તુષારાંશુમિવ પૂર્વાચલસ્થિતમ્ ॥ ૨૮॥

પ્રસાદાનુમિતસ્વાર્થસિદ્ધયઃ પ્રણિપત્ય તમ્ ।
મુકુલીકૃતહસ્તાબ્જા વિનયેન વ્યજિજ્ઞપન્ ॥ ૨૯॥

વિજ્ઞાતમેવ ભગવન્ વિધતે યદ્ધિતાય નઃ ।
વઞ્ચયત્ સુગતાન્ બુદ્ધવપુર્ધારી જનાર્દનઃ ॥ ૩૦॥

તત્પ્રણીતાગમાલમ્બૈર્બૌદ્ધૈર્દર્શનદૂષકૈઃ ।
વ્યાપ્તેદાનીં પ્રભો ધાત્રી રાત્રિઃ સન્તમસૈરિવ ॥ ૩૧॥

વર્ણાશ્રમસમાચારાદ્વિષન્તિ બ્રહ્મવિદ્વિષઃ ।
બ્રુવન્ત્યામ્નાયવચસાં જીવિકામાત્રતાં પ્રભો ॥ ૩૨॥

ન સન્ધ્યાદીનિ કર્માણિ ન્યાસં વા ન કદાચન ।
કરોતિ મનુજઃ કશ્ચિત્ સર્વે પાખણ્ડતાં ગતાઃ ॥ ૩૩॥

*શ્રુતે પિદધતિ શ્રોત્રે ક્રતુરિત્યક્ષરદ્વયે ।
ક્રિયાઃ કથં પ્રવર્તેરન્ કથં ક્રતુભુજો વયમ્ ॥ ૩૪॥

શિવવિષ્ણ્વાગમપરૈર્લિઙ્ગચક્રાદિચિહ્નિતૈઃ ।
પાખણ્ડૈઃ કર્મ સંન્યસ્તં કારુણ્યમિવ દુર્જનૈઃ ॥ ૩૫॥

અનન્યેનૈવ ભાવેન ગચ્છન્ત્યુત્તમપૂરુષમ્ ।
શ્રુતિઃ સાધ્વી મદક્ષીબૈઃ કા વા શાક્ત્યૈર્ન દૂષિતા ॥ ૩૬॥

સદ્યઃ કૃત્તદ્વિજશિરઃપઙ્કજાર્ચિતભૈરવૈઃ ।
ન ધ્વસ્તા લોકમર્યાદા કા વા કાપાલિકાધમૈઃ ॥ ૩૭॥

અન્યેઽપિ બહવો માર્ગાઃ સન્તિ ભૂમૌ સકણ્ટકાઃ ।
જનૈર્યેષુ પદં દત્ત્વા દુરન્તં દુઃખમાપ્યતે ॥ ૩૮॥

તદ્ભવાન્ લોકરક્ષાર્થમુત્સાદ્ય નિખિલાન્ ખલાન્ ।
વર્ત્મ સ્થાપયતુ શ્રૌતં જગદ્યેન સુખં વ્રજેત્ ॥ ૩૯॥

ઇત્યુક્ત્વોપરન્ દેવાનુવાચ ગિરિજાપ્રિયઃ ।
મનોરથં પૂરયિષ્યે માનુષ્યમવલમ્બ્ય વઃ ॥ ૪૦॥

દુષ્ટાચારવિનાશાય ધર્મસંસ્થાપનાય ચ ।
ભાષ્યં કુર્વન્બ્રહ્મસૂત્રતાત્પર્યાર્થવિનિર્ણયમ્ ॥ ૪૧॥

મોહનપ્રકૃતિદ્વૈતધ્વાન્ત ધ્યાહ્નભાનુભિઃ ।
ચતુર્ભિઃ સહિતઃ શિષ્યૈશ્ચતુરૈર્હરિવદ્ભુજૈઃ ॥ ૪૨॥

યતીન્દ્રઃ શઙ્કરો નામ્ના ભવિષ્યામિ મહીતલે ।
મદ્વત્તથા ભવન્તોઽપિ માનુષીં તનુમાશ્રિતાઃ ॥ ૪૩॥

તં મામનુસરિષ્યન્તિ સર્વે ત્રિદિવવાસિનઃ ।
તદા મનોરથઃ પૂર્ણો ભવતાં સ્યાન્ન સંશયઃ ॥ ૪૪॥

બ્રુવન્નેવં દિવિષદઃ કટાક્ષાનન્ચદુર્લભાન્ ।
કુમારે નિદધે ભાનુઃ કિરણાનિવ પઙ્કજે ॥ ૪૫॥
(footnote કુત્સિતો મારઃ યસ્માત્ સઃ કુમારઃ ।
અથવા કુત્સિતાન્ મારયતીતિ કુમારઃ ઇતિ કુમારશબ્દનિર્વચનમ્ ॥)

ક્ષીરનીરનિધેર્વીચિસચિવાન પ્રાપ્ય તાન્ ગુહઃ ।
કટાક્ષાન્મુમુદે રશ્મીનુદન્યાનૈન્દવાનિવ ॥ ૪૬॥

અવદન્નન્દનં સ્કન્દમમન્દં ચન્દ્રશેખરઃ ।
દન્તચન્દ્રાતપાનન્દિવૃન્દારકચકોરકઃ ॥ ૪૭॥

શ ૃણુ સૌમ્ય વચઃ શ્રેયો જગદુદ્ધારગોચરમ્ ।
કાણ્ડત્રયાત્મકે વેદે પ્રોદ્ધૃતે સ્યાદ્ દ્વિજોદ્ધૃતિઃ ॥ ૪૮॥

તદ્રક્ષણે રક્ષિતં સ્યાત્સકલં જગતીતલમ્ ।
તદધીનત્વતો વર્ણાશ્રમધર્મતતેસ્તતઃ ॥ ૪૯॥

ઇદાનીમિદમુદ્ધાર્યમિતિવૃત્તમતઃ પુરા ।
મમ ગૃહાશયવિદૌ વિષ્ણુશેષૌ સમીપગૌ ॥ ૫૦॥

મધ્યમં કાણ્ડમુદ્ધર્તુમનુજ્ઞાતૌ મયૈવ તૌ ।
અવતીર્યાશતો ભૂમૌ સઙ્કર્ષણપતઞ્જલી ॥ ૫૧॥

મુની ભૂત્વા મુદોપાસ્તિયોગકાણ્ડકૃતૌ સ્થિતૌ ।
અગ્રિમં જ્ઞાનકાણ્ડં તૂદ્ધરિષ્યામીતિ દેવતાઃ ॥ ૫૨॥

સમ્પ્રતિ પ્રતિજાને સ્મ જાનાત્યેવ ભવાનપિ ।

જૈમિનીયનયામ્ભોધેઃ શરત્પર્વશશી ભવ ॥ ૫૩॥

વિશિષ્ટં કર્મકાણ્ડં ત્વમુદ્ધર બ્રહ્મણઃ કૃતે ।
સુબ્રહ્મણ્ય ઇતિ ખ્યાતિ ગમિષ્યસિ તતોઽધુના ॥ ૫૪॥

નૈગમીં કુરુ મર્યાદામવતીર્ય મહીતલે ।
નિર્જિત્ય સૌગતાન્સર્વાનામ્નાયાર્થવિરોધિનઃ ॥ ૫૫॥

બ્રહ્માઽપિ તે સહાયાર્થં મણ્ડનો નામ ભૂસુરઃ ।
ભવિષ્યતિ મહેન્દ્રોઽપિ સુધન્વા નામ ભૂમિપઃ ॥ ૫૬॥

તથેતિ પ્રતિજગ્રાહ વિધેરપિ વિધાયિનીમ્ ।
બુધાનીકપતિર્વાણીં સુધાધારામિવ પ્રભોઃ ॥ ૫૭॥

અથેન્દ્રો નૃપતિર્ભૂત્વા પ્રજા ધર્મેણ પાલયન્ ।
દિવં ચકાર પૃથિવીં સ્વપુરીમમરાવતીમ્ ॥ ૫૮॥

સર્વજ્ઞોઽપ્યસતાં શાસ્ત્રે કૃત્રિમશ્રદ્ધયાઽન્વિતઃ ।
પ્રતીક્ષમાણઃ ક્રૌઞ્ચારિં મેલયામાસ સૌગતાન્ ॥ ૫૯॥

તતઃ સ તારકારાતિરજનિષ્ટ મહીતલે ।
ભટ્ટપાદાભિધા યસ્ય ભૂષા દિક્સુદૃશામભૂત્ ॥ ૬૦॥

સ્ફુટયન્વેદતાત્પર્યમભાજ્જૈમિનિસૂત્રિતમ્ ।
સહસ્રાંશુરિવાનૂરુવ્યઞ્ચિતં ભાસયઞ્જગત્ ॥ ૬૧॥

રાજ્ઞઃ સુધન્વનઃ પ્રાપ નગરીં સ જયન્દિશઃ ।
પ્રત્યુદ્ગમ્ય ક્ષિતીન્દ્રોઽપિ વિધિવત્તમપૂજયત્ ॥ ૬૨॥

સોઽભિનન્દ્યાશિષા ભૂપમાસીનઃ કાઞ્ચનાસને ।
તાં સભાં શોભયામાસ સુરભિર્ધ્વનીમિવ ॥ ૬૩॥

સભાસમીપવિટપિશ્રિતકોકિલકૂજિતમ્ ।
શ્રુત્વા જગાદ તદ્વ્યાજાદ્રાજાનં પણ્ડિતાગ્રણીઃ ॥ ૬૪॥

મલિનૈશ્ચેન્ન સઙ્ગસ્તે નીચૈઃ કાકકુલૈઃ પિક ।
શ્રુતિદૂષકનિર્હ્રાદૈઃ શ્લાઘનીયસ્તદા ભવેઃ ॥ ૬૫॥

ષડભિજ્ઞા નિશમ્યેમાં વાચં તાત્પર્યગર્ભિતામ્ ।
નિતરાં ચરણસ્પૃષ્ટા ભુજઙ્ગા ઇવ ચુક્રુધુઃ ॥ ૬૬॥

છિત્ત્વા યુક્તિકુઠારેણ બુદ્ધસિદ્ધાન્તશાખિનમ્ ।
સ તદ્ગ્રન્થેન્ધનૈશ્ચીર્ણૈઃ ક્રોધજ્વાલામવર્ધયત્ ॥ ૬૭॥

સા સભા વદનૈસ્તેષાં રોષપાટલકાન્તિભિઃ ।
બભૌ બાલાતપાતામ્રૈઃ સરસીવ સરોરુહૈઃ ॥ ૬૮॥

ઉપન્યસ્યત્સુ સાક્ષેપં ખણ્ડયત્સુ પરસ્પરમ્ ।
તેષૂદતિષ્ઠન્નિર્ઘોષો ભિન્દન્નિવ રસાતલમ્ ॥ ૬૯॥

અધઃ પેતુર્બુધેન્દ્રેણ ક્ષતાઃ પક્ષેષુ તત્ક્ષણમ્ ।
વ્યૂઢકર્કશતર્કેણ તથાગતધરાધરાઃ ॥ ૭૦॥

સ સર્વજ્ઞપદં વિજ્ઞોઽસહમાન ઇવ દ્વિષામ્ ।
ચકાર ચિત્રવિન્યસ્તાનેતાન્ મૌનવિભૂષિતાન્ ॥ ૭૧॥

તતઃ પ્રક્ષીણદર્પેષુ બૌદ્ધેષુ વસુધાધિપમ્ ।
બોધયન્ બહુધા વેદવચાંસિ પ્રશશંસ સઃ ॥ ૭૨॥

બભાષેઽથ ધરાધીશો વિધાયત્તૌ જયાજયૌ ।
યઃ પતિત્વા ગિરેઃ શ ृઙ્ગાદવ્યગ્રસ્તન્મતં ધ્રુવમ્ ॥ ૭૩॥

તદાકર્ણ્ય મુખાન્યન્યે પરસ્પરમલોકયન્ ।
દ્વિજાગ્ર્યસ્તુ સ્મરન્ વેદાનારુરોહ ગિરેઃ શિરઃ ॥ ૭૪॥

યદિ વેદાઃ પ્રમાણં સ્યુર્ભૂયાત્કાચિન્ન મે ક્ષતિઃ ।
ઇતિ ઘોષયતા તસ્માન્ન્યપાતિ સુમહાત્મના ॥ ૭૫॥

કિમુ દૌહિત્રદત્તેઽપિ પુણ્યે વિલયમાસ્થિતે ।
યયાતિશ્ચ્યવતે સ્વર્ગાત્પુનરિત્યૂચિરે જનાઃ ॥ ૭૬॥

અપિ લોકગુરુઃ શૈલાત્તૂલપિણ્ડ ઇવાપતત્ ।
શ્રુતિરાત્મશરણ્યાનાં વ્યસનં નોચ્છિનત્તિ કિમ્ ॥ ૭૭॥

શ્રુત્વા તદદ્ભુતં કર્મ દ્વિજા દિગ્ભ્યઃ સમાયયુઃ ।
ઘનઘોષમિવાકર્ણ્ય નિકુઞ્જેભ્યઃ શિખાવળાઃ ॥ ૭૮॥

દૃષ્ટ્વા તમક્ષતં રાજા શ્રદ્ધાં શ્રુતિષુ સન્દધે ।
નિનિન્દ બહુધાઽઽત્માનં ખલસંસર્ગદૂષિતમ્ ॥ ૭૯॥

સૌગતાસ્ત્વબ્રુવન્નેદં પ્રમાણં મતિનિર્ણયે ।
મણિમન્ત્રૌષધૈરેવં દેહરક્ષા ભવેદિતિ ॥ ૮૦॥

દુર્વિધૈરન્યથા નીતે પ્રત્યક્ષેઽર્થેઽપિ પાર્થિવઃ ।
ભ્રુકુટીભીકરમુખઃ સન્ધામુગ્રતરાં વ્યધાત્ ॥ ૮૧॥

પૃચ્છામિ ભવતઃ કિઞ્ચિદ્વક્તું ન પ્રભવન્તિ યે ।
યન્ત્રોપલેષુ સર્વાંસ્તાન્ ઘાતયિષ્યામ્યસંશયમ્ ॥ ૮૨॥

ઇતિ સંશ્રુત્ય ગોત્રેશો ઘટમાશીવિષાન્વિતમ્ ।
આનીયાત્ર કિમસ્તીતિ પપ્રચ્છ દ્વિજસૌગતાન્ ॥ ૮૩॥

વક્ષ્યામહે વયં ભૂપ શ્વઃ પ્રભાતેઽસ્ય નિર્ણયમ્ ।
ઇતિ પ્રસાદ્ય રાજાનં જગ્મુર્ભૂસુરસૌગતાઃ ॥ ૮૪॥

પદ્મા ઇવ તપસ્તેષુઃ કણ્ઠદ્વયસપાથસિ ।
દ્યુમણિં પ્રતિ ભૂદેવાઃ સોઽપિ પ્રાદુરભૂત્તતઃ ॥ ૮૫॥

સન્દિશ્ય વચનીયાંશમાદિત્યેઽન્તર્હિતે દ્વિજાઃ ।
આજગ્મુરપિ નિશ્ચિત્ય સૌગતાઃ કલશસ્થિતમ્ ॥ ૮૬॥

તતસ્તે સૌગતઃ સર્વે ભુજઙ્ગોઽસ્તીત્યવાદિષુઃ ।
ભોગીશભોગશયનો ભગવાનિતિ ભૂસુરાઃ ॥ ૮૭॥

શ્રુતભૂસુરવાક્યસ્ય વદનં પૃથિવીપતેઃ ।
કાસારશોષણમ્લાનસારસશ્રિયમાદદે ॥ ૮૮॥

અથ પ્રોવાચ દિવ્યા વાક્ સંરાજમશરીરિણી ।
તુદન્તી સંશયં તસ્ય સર્વેષામેવ શ◌ૃણ્વતામ્ ॥ ૮૯॥

સત્યમેવ મહારાજ બ્રાહ્મણા યદ્વભાષિરે ।
મા કૃથાઃ સંશયં તત્ર ભવ સત્યપ્રતિશ્રવઃ ॥ ૯૦॥

શ્રુત્વાઽશરીરિણીં વાણીં દદર્શ વસુધાધિપઃ ।
મૂર્તિં મધુદ્વિષઃ કુમ્ભે સુધામિવ સુરાધિપઃ ॥ ૯૧॥

નિરસ્તાખિલસન્દેહો વિન્યસ્તેતરદર્શનાત્ ।
વ્યધાદાજ્ઞાં તતો રાજા વધાય શ્રુતિવિદ્વિષામ્ ॥ ૯૨॥

આસેતોરાતુષારાદ્રેર્બૌદ્ધાનાવૃદ્ધબાલકમ્ ।
ન હન્તિ યઃ સ હન્તવ્યો ભૃત્યાનિત્યન્વશાન્નૃપઃ ॥ ૯૩॥

ઇષ્ટોઽપિ દૃષ્ટદોષશ્ચેદ્વધ્ય એવ મહાત્મનામ્ ।

જનનીમપિ કિં સાક્ષાન્નાવધીદ્ ભૃગુનન્દનઃ ॥ ૯૪॥

સ્કન્દાનુસારિરાજેન જૈના ધર્મદ્વિષો હતાઃ ।
યોગીન્દ્રેણેવ કિં યોગઘ્ના વિઘ્નાસ્તત્વાવલમ્બિના ॥ ૯૫॥

હતેષુ તેષુ દુષ્ટેષુ પરિતસ્તાર કોવિદઃ ।
શ્રૌતવર્ત્મ તમિસ્રેષુ નષ્ટેષ્વિવ રવિર્મહઃ ॥ ૯૬॥

કુમારિલમૃગેન્દ્રેણ હતેષુ જિનહસ્તિષુ ।
નિષ્પત્યૂહમવર્ધન્ત શ્રુતિશાખાઃ સમન્તતઃ ॥ ૯૭॥

પ્રાગિત્થં જ્વનલભુવા પ્રવર્તિતેઽસ્મિન્
    કર્માધ્વન્યખિલવિદા કુમારિલેન ।
ઉદ્ધર્તું ભુવનમિદં ભવાબ્ધિમગ્નં
    કારુણ્યામ્બુનિધિરિયેષ ચન્દ્રચૂડઃ ॥ ૯૮॥

ઇતિ શ્રીમાધવીયે તદુપોદ્ઘાતકથાપરઃ ।
સઙ્ક્ષેપશઙ્કરજયે સર્ગોઽયં પ્રથમોઽભવત્ ॥ ૧॥

આદિતઃ શ્લોકાઃ ૯૮ ।

# શઙ્કરદિગ્વિજયમ્

## ॥ ૨. દ્વિતીયઃ સર્ગઃ આચાર્યજન્માદિકથનમ્ ॥

અથ દ્વિતીયઃ સર્ગઃ ॥ ૨॥

તતો મહેશઃ કિલ કેરલેષુ શ્રીમદ્વૃષાદ્રૌ કરુણાસમુદ્રઃ ।
પૂર્ણાનદીપુણ્યતટે સ્વયમ્ભૂલિઙ્ગાત્મનાઽનઙ્ગધગાવિરાસીત્ ॥ ૧॥

તચ્ચોદિતઃ કશ્ચન રાજશેખરઃ સ્વપ્ને મુહુર્દૃષ્ટતદીયવૈભવઃ ।
પ્રાસાદમેકં પરિકલ્પ્ય સુપ્રભં પ્રાવર્તયત્તસ્ય સમર્હણં વિભોઃ ॥ ૨॥

તસ્યેશ્વરસ્ય પ્રણતાર્તિહર્તુઃ પ્રસાદતઃ પ્રાપ્ત નિરીતિભાવઃ ।
કશ્ચિત્તદભ્યાશગતોઽગ્રહારઃ કાલટ્યભિખ્યોઽસ્તિ મહાન્મનોજ્ઞઃ ॥ ૩॥

કશ્ચિદ્દ્વિપશ્ચિદિહ નિશ્ચલધીર્વિરેજે વિદ્યાધિરાજ ઇતિ વિશ્રુતનામધેયઃ ।
રુદ્રો વૃષાદ્રિનિલયોઽવતરીતુકામો યત્પુત્રમાત્મપિતરં સમરોચયત્સઃ ॥ ૪॥

પુત્રોઽભવત્તસ્ય પુરાત્તપુણ્યૈઃ સુબ્રહ્મતેજાઃ શિવગુર્વભિખ્યઃ ।
જ્ઞાને શિવો યો વચને ગુરુસ્તસ્યાન્વર્થનામાકૃત લબ્ધવર્ણઃ ॥ ૫॥

સ બ્રહ્મચારી ગુરુગેહવાસી તત્કર્યકારી વિહિતાન્નભોજી ।
સાયમ્પ્રભાતં ચ હુતાશસેવી વ્રતેન વેદં નિજમધ્યગીષ્ટ ॥ ૬॥

ક્રિયાદ્યનુષ્ઠાનફલોઽર્થબોધઃ સ નોપજાયેત વિના વિચારમ્ ।
અધીત્ય વેદાનથ તદ્વિચારં ચકાર દુર્બોધતરો હિ વેદઃ ॥ ૭॥

વેદેષ્વધીતેષુ વિચારિતેઽર્થં શિષ્યાનુરાગી ગુરુરાહ તં સ્મ ।
અપાઠિ મત્તઃ સષડઙ્ગવેદો વ્યચારિ કાલો બહુરત્યગાત્તે ॥ ૮॥

ભક્તોઽપિ ગેહં વ્રજ સમ્પ્રતિ ત્વં જનોઽપિ તે દર્શનલાલસઃ સ્યાત્ ।
ગત્વા કદાચિત્સ્વજનપ્રમોદં વિધેહિ મા તાત વિલમ્બયસ્વ ॥ ૯॥

વિધાતુમિષ્ટં યદિહાપરાહ્ણે વિજ્ઞાનતા તત્પુરુષેણ પૂર્વમ્ ।
વિધેયમેવં યદિહ શ્વ ઇષ્ટં કર્તું તદ્યેતિ વિનિશ્ચિતોઽર્થઃ ॥ ૧૦॥

કાલોતબીજાદિહ યાદૃશં સ્યાત્સસ્યં ન તાદૃગ્વિપરીતકાલાત્ ।
તથા વિવાહાદિ કૃતં સ્વકાલે ફલાય કલ્પેત ન ચેદ્વૃથા સ્યાત્ ॥ ૧૧॥

આ જન્મનો ગણયતો નનુ તાન્ગતાબ્દાન્માતા પિતા પરિણયં તવ કર્તુકામૌ ।
પિત્રોરિયં પ્રકૃતિરેવ પુરોપનીતિં યદ્વ્યાયતસ્તનુભવસ્ય તતો વિવાહમ્ ॥ ૧૨॥

તત્તત્કુલીનપિતરઃ સ્પૃહયન્તિ કામં તત્તત્કુલીનપુરુષસ્ય વિવાહકર્મ ।
પિણ્ડપ્રદાતૃપુરુષસ્ય સસન્તતિત્વે પિણ્ડાવિલોપમુપરિ સ્ફુટમીક્ષમાણાઃ ॥ ૧૩॥

અર્થાવબોધનફલો હિ વિચાર એષ તચ્ચાપિ ચિત્રબહુકર્મવિધાનહેતોઃ ।
અત્રાધિકારમધિગચ્છતિ સદ્વિતીયઃ કૃત્વા વિવાહમિતિ વેદવિદાં પ્રવાદઃ ॥ ૧૪॥

સત્યં ગુરૌ ન નિયમોઽસ્તિ ગુરોરધીતવેદો ગૃહી ભવતિ નાન્યપદં પ્રયાતિ ।
વૈરાગ્યવાન્વ્રજતિ ભિક્ષુપદં વિવેકી નો ચેદ્ગૃહી ભવતિ રાજપદં તદેતત્ ॥ ૧૫॥

શ્રીનૈષ્ઠિકાશ્રમમહં પરિગૃહ્ય યાવજ્જીવં વસામિ તવ પાર્શ્વગતશ્ચિરાયુઃ ।
દણ્ડાજિની સવિનયો બુધ જુહૃદગ્નૌ વેદં પઠન્ પઠિતવિસ્મૃતિહાનિમિચ્છન્ ॥ ૧૬॥

દારગ્રહો ભવતિ તાવદયં સુખાય યાવત્કૃતોઽનુભવગોચરતાં ગતઃ સ્યાત્ ।
પશ્ચાચ્છનૈર્વિરસતામુપયાતિ સોઽયં કિં નિહનુષે ત્વમનુભૂતિપદં મહાત્મન્ ॥ ૧૭॥

યાગોઽપિ નાકફલદો વિધિના કૃતશ્ચેત્
      પ્રાયઃ સમગ્રકરણં ભુવિ દુર્લભં તત્ ।
બષ્ટ્યાદિવન્ન હિ ફલં યદિ કર્મણિ સ્યાત્
      દિષ્ટ્યા યથોક્તવિરહે ફલદુર્વિધત્વમ્ ॥ ૧૮॥

નિઃસ્વો ભવેદ્યદિ ગૃહી નિરયી સ નૂનં
      ભોક્તું ન દાતુમપિ યઃ ક્ષમતેઽણુમાત્રમ્ ।
પૂર્ણેપિ પૂર્તિમભિમન્તુમશક્નુવન્યો
      મોહેન શં ન મનુતે ખલુ તત્ર તત્ર ॥ ૧૯॥

યાવત્સુ સત્સુ પરિપૂર્તિરથો અમીષાં સાધો ગૃહોપકરણેષુ સદા વિચારઃ ।
એકત્ર સંહતવતઃ સ્થિતપૂર્વનાશસ્તચ્ચાપયાતિ પુનરપ્યપરેણ યોગઃ ॥ ૨૦॥

એવં ગુરૌ વદતિ તજ્જનકો નિનીષુરાગચ્છદત્ર તનયં સ્વગૃહં ગૃહેશઃ ।
તેનાનુનીય બહુલં ગુરવે પ્રદાપ્ય યન્નાન્નિકેતનમનાયિ ગૃહીતવિદ્યઃ ॥ ૨૧॥

આચાર્યજન્માદિકથનં

ગત્વા નિકેતનમસૌ જનનીં વવન્દે સાઽઽલિઙ્ગ્ય તદ્વિરહજં પરિતાપમૌજ્ઝત્ ॥

પ્રાયેણ ચન્દનરસાદપિ શીતલં તદ્યત્પુત્રગાત્રપરિરમ્ભણનામધેયમ્ ॥ ૨૨॥

શ્રુત્વા ગુરોઃ સદનતશ્ચિરમાગતં તં તદ્બન્ધુરાગમદથ ત્વરિતેક્ષણાય ।
પ્રત્યુદ્ગમાદિભિરસાવપિ બન્ધુતાયાઃ સમ્ભાવનાં વ્યધિતવિત્તકુલાનુરૂપામ્ ॥ ૨૩॥

વેદે પદક્રમજટાદિષુ તસ્ય બુદ્ધિં સંવીક્ષ્ય તજ્જનયિતા બહુશોઽપ્યપૃચ્છત્ ।
યસ્યાભવત્પ્રથિતનામ વસુન્ધરાયાં વિદ્યાધિરાજ ઇતિ સઙ્ગતવાચ્યમસ્ય ॥ ૨૪॥

ભટ્ટે નયે ગુરુમતે કણભુઙ્મતાદૌ
    પ્રશ્નં ચકાર તનયસ્ય મતિં બુભુત્સુઃ ।
શિષ્યોઽપ્યુવાચ નતપુર્વગુરુઃ સમા ધિધિં
    પિત્રોદિતઃ સ્મિતમુખો હસિતામ્બુજાસ્યઃ ॥ ૨૫॥

વેદે ચ શાસ્ત્રે ચ નિરીક્ષ્ય બુદ્ધિં પ્રશ્નોત્તરાદાવપિ નૈપુણીં તામ્ ।
દૃષ્ટ્વા તુતોષાતિતરાં પિતાઽસ્ય સ્વતઃ સુખા યા કિમુ શાસ્ત્રતો વાકૂ ॥ ૨૬॥

કન્યાં પ્રદાતુમનસો બહવોઽપિ વિપ્રાસ્તન્મન્દિરં પ્રતિ યયુર્ગુણપાશકૃષ્ટાઃ ।
પૂર્વં વિવાહસમયાદપિ તસ્ય ગેહં સમ્બન્ધવત્કિલ બભૂવ વરીતુકામૈઃ ॥ ૨૭॥

બહ્વર્થદાયિષુ બહુષ્વપિ સત્સુ દેશે કન્યામદાતૃષુ પરીક્ષ્ય વિશિષ્ટજન્મ ।
કન્યામયાચત સુતાય સ વિપ્રવર્યો વિપ્રં વિશિષ્ટકુલજં પ્રથિતાનુભાવઃ ॥ ૨૮॥

કન્યાપિતુર્વરપિતુશ્ચ વિવાદ આસીદિત્થં તયોઃ કુલજુષોઃ પ્રથિતોરુભૂત્યોઃ ।
કાર્યસ્ત્વયા પરિણયો ગૃહમેત્ય પુત્રીમાનીય સદ્મ તનયાય સુતા પ્રદેયા ॥ ૨૯॥

સઙ્કલ્પિતાદ્ દ્વિગુણમર્થમહં  પ્રદાસ્યે મદ્ગેહમેત્ય પરિણીતિરિયં કૃતા ચેત્ ।
અર્થં વિના પરિણયં દ્વિજ કારયિષ્યે પુત્રેણ મે ગૃહગતા યદિ કન્યકા સ્યાત્ ॥ ૩૦॥

કશ્ચિત્તુ તસ્યાઃ પિતરં બભાણ મિથઃ સમાહૂય વિશેષવાદી ।
અસ્માસુ ગેહં ગતવત્સ્વમુષ્મૈ વિગૃહ્ય કન્યામપરઃ પ્રદદ્યાત્ ॥ ૩૧॥

તેનાનુનીતો વરતાતભાષિતં દ્વિજોઽનુમેને વરરૂપમોહિતઃ ।
દૃષ્ટ્વા ગુણઃ સંવરણાય કલ્પતે મન્ત્રોઽભિજાપાચ્ચિરકાલભાવિતઃ ॥ ૩૨॥

વિદ્યાધિરાજમઘપણ્ડિતનામધેયૌ સમ્પ્રત્યયં વ્યતનુતામભિપૂજ્ય દૈવમ્ ।
સમ્યઙ્મુહૂર્તમવલમ્બ્ય વિચારણીયા મૌહૂર્તિકા ઇતિ પરસ્પરમૂચિવાંસૌ ॥ ૩૩॥

ઉદ્વાહ્ય શાસ્ત્રવિધિના વિહિતે મુહૂર્તે તૌ સમ્મુદં બહુમવાપતુરાપ્તકામૌ ।
તત્રાગતો ભૃશમમોદત બન્ધુવર્ગઃ કિં ભાષિતેન બહુના મુદમાપ વર્ગઃ ॥ ૩૪॥

તૌ દમ્પતી સુવસનૌ શુભદન્તપઙ્ક્તી સમ્ભૂષિતૌ વિકસિતામ્બુજરમ્યવક્ત્રૌ ।
સવ્રીડહાસમુખવીક્ષણસમ્પ્રહૃષ્ટૌ દેવાવિવાપતુરનુત્તમશર્મ નિત્યમ્ ॥ ૩૫॥

અગ્નીનથાધિત મહોત્તરયાગજાતં કર્તું વિશેષકુશલૈઃ સહિતો દ્વિજેશઃ ।
તત્તત્ફલં હિ યદનાહિતહવ્યવાહઃ સ્યાદુત્તરેષુ વિહિતેષ્વપિ નાધિકારી ॥ ૩૬॥

યાગૈરનેકૈર્બહુવિત્તસાધ્યૈર્વિજેતુકામો ભુવનાન્યયષ્ટ ।
વ્યસ્મારિ દેવૈરમૃતં તદાશૈર્દિને દિને સેવિતયજ્ઞભાગૈઃ ॥ ૩૭॥

સન્તર્પયન્તં પિતૃદેવમાનુષાંસ્તત્તત્પદાર્થૈરભિવાઞ્છિતૈઃ સહ ।
વિશિષ્ટવિત્તૈઃ સુમનોભિરઞ્ચિતં તં મેનિરે જઙ્ગમકલ્પપાદપમ્ ॥ ૩૮॥

પરોપકારવ્રતિનો દિને દિને વ્રતેન વેદં પઠતો મહાત્મનઃ ।
શ્રુતિસ્મૃતિપ્રોદિતકર્મ કુર્વતઃ સમા વ્યતીયુર્દિનમાસસમ્મિતાઃ ॥ ૩૯॥

રૂપેષુ મારઃ ક્ષમયા વસુન્ધરા વિદ્યાસુ વૃદ્ધો ધનિનાં પુરઃસરઃ ।
ગર્વાનભિજ્ઞો વિનયી સદા નતઃ સ નોપલેભે તનયાનનં જરન્ ॥ ૪૦॥

ગાવો હિરણ્યં બહુસસ્યમાલિની વસુન્ધરા ચિત્રપદં નિકેતનમ્ ।
સમ્ભાવના બન્ધુજનૈશ્ચ સઙ્ગમો ન પુત્રહીનં બહવોઽપ્યમૂમુહન્ ॥ ૪૧॥

અસ્યામજાતા મમ સન્તતિશ્ચેચ્છરધ્યવશ્યં ભવિતોપરિષ્ટાત્ ।
તત્રાપ્યજાતા તત ઉત્તરસ્યામેવં સ કાલં મનસા નિનાય ॥ ૪૨॥

ખિન્નમનાઃ શિવગુરુઃ કૃતકાર્યશેષો જાયામચષ્ટ સુભગે કિમતઃ પરં નૌ ।
સાઙ્ગં વયોઽર્ધમગમત્કુલજે ન દૃષ્ટં પુત્રાનનં યદિહલોક્યમુદાહરન્તિ ॥ ૪૩॥

એવં પ્રિયે ગતવતોઃ સુતદર્શનં ચેત્પઞ્ચત્વમૈષ્યદથ નૌ શુભમાપતિષ્યત્ ।
અસ્યાભ્યુપાયમનિશં ભુવિ વીક્ષમાણો નેક્ષે તતઃ પિતૃજનિર્વિફલા મમાભૂત્ ॥ ૪૪॥

આચાર્યજન્માદિકથનં
ભદ્રે સુતેન રહિતૌ ભુવિ કે વદન્તિ નૌ પુત્રપૌત્રસરણિક્રમતઃ પ્રસિદ્ધિઃ ।
લોકે ન પુષ્પફલશુન્યમુદાહરન્તિ વૃક્ષં પ્રવાલસમયે ફલિતં વિહાય ॥ ૪૫॥

ઇતીરિતે પ્રાહ તદીયભાર્યા શિવાયકલ્પદ્રુમમાશ્રયાવઃ ।
તત્સેવનાન્નૌ ભવિતા સુનાથ ફલં સ્થિરં જઙ્ગમરૂપમૈશમ્ ॥ ૪૬॥

ભક્તેપ્સિતાર્થપરિકલ્પનકલ્પવૃક્ષં દેવં ભજાવ કમિતઃ સકલાર્થસિદ્ધ્યૈ ।
તત્રોપમન્યુમહિમા પરમં પ્રમાણં નો દેવતાસુ જડિમા જડિમા મનુષ્યે ॥ ૪૭॥

ઇત્થં કલત્રોક્તિમનુત્તમાં ચ શ્રુત્વા સુતાર્થી પ્રણતૈકવશ્યમ્ ।
ઇયેષ સન્તોષયિતું તપોભિઃ સોમાર્ધમૂર્ધાનમુમાર્ધમીશમ્ ॥ ૪૮॥

તસ્યોપધામ કિલ સન્નિહિતાઽઽપગૈકા
    સ્નાત્વા સદાશિવમુપાસ્ત જલે સ તસ્યાઃ ।
કન્દાશનઃ કતિચિદેવ દિનાનિ પૂર્વં
    પશ્ચાત્તદા સ શિવપાદયુગાબ્જભૃઙ્ગઃ ॥ ૪૯॥

જાયાઽપિ તસ્ય વિમલા નિયમોપતાપૈશ્ચિક્લેશ કાયમનિશં શિવમર્ચયન્તી ।
ક્ષેત્રે વૃષસ્ય નિવસન્તમજં સ ભર્તુઃ કાલોઽત્યગાદિતિ તયોસ્તપતોરનેકઃ ॥ ૫૦॥

દેવઃ કૃપાપરવશો દ્વિજવેષધારી પ્રત્યક્ષતાં શિવગુરું ગત આત્તનિદ્રમ્ ।
પ્રોવાચ ભોઃ કિમભિવાઞ્છસિ કિં તપસ્તે પુત્રાર્થિતેતિ વચનં સ જગાદ વિપ્રઃ ॥ ૫૧॥

દેવોઽપ્યપૃચ્છદથ તં દ્વિજ વિદ્ધિ સત્યં સર્વજ્ઞમેકમપિ સર્વગુણોપપન્નમ્ ।
પુત્રં દદાન્યથ બહૂન્વિપરીતકાંસ્તે ભૂર્યાયુષસ્તનુગુણાનવદદ્ દ્વિજેશઃ ॥ ૫૨॥

પુત્રોઽસ્તુ મે બહુગુણઃ પ્રથિતાનુભાવઃ સર્વજ્ઞતાપદમિતીરિત આબભાષે ।
દદ્યામુદીરિતપદં તનયં તપો મા પૂર્ણો ભવિષ્યસિ ગૃહં દ્વિજ ગચ્છ દારૈઃ ॥ ૫૩॥

આકર્ણયન્નિતિ બુબોધ સ વિપ્રવર્યસ્તં ચાબ્રવીન્નિજકલત્રમનિન્દિતાત્મા ।
સ્વપ્નં શશંસ વનિતામણિરસ્ય ભાર્યા સત્યં ભવિષ્યતિ તુ નૌ તનયો મહાત્મા ॥ ૫૪॥

તૌ દમ્પતી શિવપરૌ નિયતૌ સ્મરન્તૌ સ્વપ્નેક્ષિતં ગૃહગતૌ બહુદક્ષિણાન્નૈઃ
સન્તર્પ્ય વિપ્રનિકરં તદુદીરિતાભિરાશીર્ભિરાપતુરનલ્પમુદં વિશુદ્ધૌ ॥ ૫૫॥

તસ્મિન્દિને શિવગુરોરુપભોક્ષ્યમાણે ભક્તે પ્રવિષ્ટમભવત્કિલ શૈવતેજઃ ।
ભુક્તાન્ન વિપ્રવચનાદુપભુક્તશેષં સોઽભુઙ્ક્ત સાઽપિ નિજભર્તૃપદાબ્જભૃઙ્ગી ॥ ૫૬॥

ગર્ભં દધાર શિવગર્ભમસૌ મૃગાક્ષી ગર્ભોઽપ્યવર્ધત શનૈરભવચ્છરીરમ્ ।
તેજોઽતિરેકવિનિવારિતદૃષ્ટિપાતવિશ્વં રવેર્દિવસમધ્ય ઇવોગ્રતેજઃ ॥ ૫૭॥

ગર્ભાલસા ભગવતી ગતિમાન્દ્યમીષદાપેતિ નાદ્‌ભુતમિદં ધરતે શિવં યા ।
યો વિષ્ટપાનિ વિભૃતે હિ ચતુર્દશાપિ યસ્યાપિ મૂર્તય ઇમા વસુધાજલાદ્યાઃ ॥ ૫૮॥

સંવ્યાપ્તવાનપિ શરીરમશેષમેવ નોપાસ્તિમાવિરસકાવકૃતાત્ર કાઞ્ચિત્ ।
યત્પૂર્વમેવ મહસા દુરતિક્રમેણ વ્યાપ્તં શરીરમદસીયમમુષ્ય હેતોઃ ॥ ૫૯॥

રમ્યાણિ ગન્ધકુસુમાન્યપિ ગર્ધિમસ્યૈ નાધાતુમૈશત ભરાત્કિમુ ભૂષણાનિ ।
યદ્યદ્ગુરુત્વપદમસ્તિ પદાર્થજાતં તત્તદ્વિધારણવિધાવલસા બભૂવ ॥ ૬૦॥

તાં દૌહૃદં ભૃશમબાધત દુઃશરારિઃ પ્રાયઃ પરં કિલ ન મુઞ્ચતિ મુઞ્ચતેઽપિ ।
આનીતદુર્લભમપોહતિ યાચતેઽન્યત્તચ્ચાપ્યપોહ્ય પુનરર્દતિ સાઽન્યવસ્તુ ॥ ૬૧॥

તાં બન્ધુતાઽઽગમદુપશ્રુતદોહદાર્તિરાદાય દુર્લભમનર્ઘ્યમપૂર્વવસ્તુ ।
આસ્વાદ્ય બન્ધુજનદત્તમસૌ જહર્ષ હા હન્ત ગર્ભધરણં ખલુ દુઃખહેતુઃ ॥ ૬૨॥

માનુષ્યધર્મમનુસૃત્ય મયેદમુક્તં કાઽપિ વ્યથા શિવમહોમરણે ન બધ્વાઃ ।
સર્વવ્યથાવ્યતિકરં પરિહર્તુકામા દેવં ભજન્ત ઇતિ તત્ત્વવિદાં પ્રવાદઃ ॥ ૬૩॥

ઉક્ષ્ણા નિસર્ગધવલેન મહીયસા સા સ્વાત્માનમૈક્ષત સમૂઢમુપાત્તનિદ્રા ।
સઙ્ગીયમાનમપિ ગીતવિશારદાઢ્યૈર્વિદ્યાધરપ્રભૃતિભિર્વિનયોપયાતૈઃ ॥ ૬૪॥

આકર્ણયજ્જય જયેતિ વરં દધાના
રક્ષેતિ શબ્દમવલોકય મા દૃશેતિ ।
આકર્ણ્ય નોત્થિતવતી પુનરુક્તશબ્દં
સા વિસ્મિતા કિલ મૃણોતિ નિરીક્ષમાણા ॥ ૬૫॥

નર્મોક્તિકૃત્યામપિ ખિદ્યમાના કિઞ્ચાપિ ચઞ્ચત્તરમઞ્ચરોહે ।
જિત્વા મુદાઽન્યાનતિહૃદ્યવિદ્યાસિંહાસનેઽસૌ સ્થિતિમીક્ષતે સ્મ ॥ ૬૬॥

સમાનતા સાત્વિકવૃત્તિભાજાં વિરાગતા વૈષયિકપ્રવૃત્તૌ ।
તસ્યાઃ સ્ત્રિયા ગર્ભગપુત્રચિત્રચરિત્રશંસિન્યજનિષ્ટ ચેષ્ટા ॥ ૬૭॥

તદ્રોમવલ્લી રુરુચે કુચાદ્ર્યાવૃણ્વત્પ્રભાધુન્યુરુશૈવલાલિઃ ।
યત્નાચ્છિશોરસ્ય કૃતે પ્રશસ્તો ન્યસ્તો ત્રિધાત્રેવ નવીનવેણુઃ ॥ ૬૮॥

પયોધરદ્વન્દ્વમિષાદમુષ્યાઃ પયઃ પિત્રત્યર્થવિધાનયોગ્યૌ ।
કુમ્ભૌ નવીનામૃતપૂરિતૌ દ્વાવમ્ભોજયોનિઃ કલયામ્બભૂવ ॥ ૬૯॥

દ્વૈતપ્રવાદં કુચકુમ્ભમધ્યે મધ્યે પુનર્માધ્યમિકં મતં ચ ।
સુભ્રૂમણેર્ગર્ભગ એવ સોઽર્ભો દ્રાગ્ગર્હયામાસ મહાત્મગર્હ્યમ્ ॥ ૭૦॥

લગ્ને શુભે શુભયુતે સુષુવે કુમારં
શ્રીપાર્વતીવ સુખિની શુભવીક્ષિતે ચ ।
જાયા સતી શિવગુરોર્નિજતુઙ્ગસંસ્થે
સૂર્યે કુજે રવિસુતે ચ ગુરૌ ચ કેન્દ્રે ॥ ૭૧॥

દૃષ્ટ્વા સુતં શિવગુરુઃ શિવવારિરાશૌ
મગ્નોઽપિ શક્તિમનુસૃત્ય જલે ન્યમાङ्क्षीत् ।

વ્યશ્રાણયદ્ બહુ ધનં વસુધાશ્ચ ગાશ્ચ
　　જન્મોક્તકર્મવિધયે દ્વિજપુઙ્ગવેભ્યઃ ॥ ૭૨॥

તસ્મિન્દિને મૃતકરીન્દ્રતરક્ષુસિંહસર્પાખુમુખ્યબહુજન્તુગણા દ્વિષન્તઃ ।
વૈરં વિહાય સહ ચેરુરતીવ હૃષ્ટાઃ કણ્ડૂમપાકૃષત સાધુતયા નિઘૃષ્ટાઃ ॥ ૭૩॥

વૃક્ષા લતાઃ કુસુમરાશિફલાન્યમુઞ્ચન્ નદ્યઃ પ્રસન્નસલિલા નિખિલાસ્તથૈવ ।
જાતા મુહુર્જલધરોઽપિ નિજં વિકારં ભૂભૃદ્ગણાદપિ જલં સહસોત્પપાત ॥ ૭૪॥

અદ્વૈતવાદિવિપરીતમતાવલમ્બિહસ્તાગ્રવર્તિવરપુસ્તકમપ્યકસ્માત્ ।
ઉચ્ચૈઃ પપાત જહસુઃ શ્રુતિમસ્તકાનિ શ્રીવ્યાસચિત્તકમલં વિકચીબભૂવ ॥ ૭૫॥

સર્વાભિરાશાભિરલં પ્રસેદે વાતૈરભાવ્યદ્ભુતદિવ્યગન્ધૈઃ ।
પ્રજજ્વલેઽપિ જ્વલનૈસ્તદાનીં પ્રદક્ષિણીભૂતવિચિત્રકીલૈઃ ॥ ૭૬॥

સુમનોહરગન્ધિની સતાં સુમનોવદ્વિમલા શિવઙ્કરી ।
સુમનોનિકરપ્રચોદિતા સુમનોવૃષ્ટિરભૂત્તદાઽદ્ભુતમ્ ॥ ૭૭॥

લોકત્રયી લોકદૃશેવ ભાસ્વતા મહીધરેણેવ મહી સુમેરુણા ।
વિદ્યા વિનીત્યેવ સતી સુતેન સા રરાજ તત્તાદૃશરાજતેજસા ॥ ૭૮॥

સત્કારપૂર્વમભિયુક્તમુહૂર્તવેદિવિપ્રાઃ શશંસુરભિવીક્ષ્ય સુતસ્ય જન્મ ।
સર્વજ્ઞ એવ ભવિતા રચયિષ્યતે ચ શાસ્ત્રં સ્વતન્ત્રમથ વાગધિપાંશ્ચ જેતા ॥ ૭૯॥

કીર્તિં સ્વકાં ભુવિ વિધાસ્યતિ યાવદેષા
　　કિં બોધિતેન બહુના શિશુરેષ પૂર્ણઃ ।
નાપૃચ્છિ જીવિતમનેન ચ તૈર્ન ચોક્તં
　　પ્રાયો વિદન્નપિ ન વક્ત્યશુભં શુભજ્ઞઃ ॥ ૮૦॥

તજ્જ્ઞાતિબન્ધુસુહૃદિષ્ટજનાઙ્ગનાસ્તાસ્તં સૂતિકાગૃહનિવિષ્ટમથો નિદધ્યુઃ ।
સોપાયનાસ્તમભિવીક્ષ્ય યથા નિદાઘે ચન્દ્રં મુદં યયુરતીવ સરોજવક્ત્રમ ॥ ૮૧॥

તત્સુતિકાગૃહમવૈક્ષત ન પ્રદીપં તત્તેજસા યદવભાતમભૂત્ ક્ષપાયામ્ ।
આશ્ચર્યમેતદજનિષ્ટ સમસ્તજન્તોસ્તન્મન્દિરં વિતિમિરં યદભૂદદીપમ્ ॥ ૮૨॥

યત્પશ્યતાં શિશુરસૌ કુરુતે શમગ્ર્યં તેનાકૃતાસ્ય જનકઃ કિલ શઙ્કરાખ્યામ્ ।
યદ્વા ચિરાય કિલ શઙ્કરસમ્પ્રસાદાજ્જાતસ્તતો વ્યધિત શઙ્કરનામધેયમ્ ॥ ૮૩॥

સર્વં વિદન્સકલશક્તિયુતોઽપિ બાલો માનુષ્યજાતિમનુસૃત્ય ચચાર તદ્વત્ ।
બાલઃ શનૈર્હસિતુમારભત ક્રમેણ સ્રમું શશાક ગમનાય પદામ્બુજાભ્યામ્ ॥ ૮૪॥

બાલેઽથ મઞ્ચે કિલ શાયિતેઽસ્મિન્સતાં પ્રસન્નં હૃદયં બભૂવ ।
સંવીક્ષમાણે મણિગુચ્છવર્યં વિદ્વન્મુખં હન્ત વિલીનમાસીત્ ॥ ૮૫॥

સન્તાડયન્ હન્ત શનૈઃ પદાભ્યાં પર્યઙ્કવર્યં કમનીયશય્યમ્ ।
બિભેદ સદ્યઃ શતધા સમૂહાન્ વિભેદવાદીન્દ્રમનોરથાનામ્ ॥ ૮૬॥

દ્વિત્રાણિ વર્ણાનિ વદત્યમુષ્મિન્દ્વૈતિપ્રવીરા દધુરેવ મૌનમ્ ।
મુદા ચલત્યઙ્ઘ્રિસરોરુહાભ્યાં દિશઃ પલાયન્ત દશાપિ સદ્યઃ ॥ ૮૭॥

ઉદચારયદર્ભકો ગિરઃ પદચારાનતનોદનન્તરમ્ ।
વિકલોઽભવદાદિમાત્તયોઃ પિકલોકશ્ચરમાન્મરાલકઃ ॥ ૮૮॥

નવવિદ્રુમપલ્લવસ્તૃતામિવ કાશ્મીરપરાગપાટલામ્ ।
રચયન્નચલાં પદત્વિષા સ ચચારેન્દુનિભઃ શનૈઃ શનૈઃ ॥ ૮૯॥

મૂર્ધનિ હિમકરચિહ્નં નિટિલે નયનાઙ્કમંસયોઃ શૂલમ્ ।
વપુષિ સ્ફટિકસવર્ણં પ્રાજ્ઞાસ્તં મેનિરે શમ્ભુમ્ ॥ ૯૦॥

રાજ્યશ્રીરિવ નયકોવિદસ્ય રાજ્ઞો વિદ્યેવ વ્યસનદવીયસો બુધસ્ય ।
શુભ્રાંશોશ્છવિરિવ શારદસ્ય પિત્રોઃ સન્તોષૈઃ સહ વવૃધે તદીયમૂર્તિઃ ॥ ૯૧॥

નાગેનોરસિ ચામરેણ ચરણે બાલેન્દુના ફાલકે
    પાણ્યોશ્ચક્રગદાધનુર્ડમરુકૈર્મૂર્ધ્નિ ત્રિશૂલેન ચ ।
તત્તસ્યાદ્ભુતમાકલય્ય લલિતં લેખાકૃતે લાઞ્છિતં
    ચિત્રં ગાત્રમમંસ્ત તત્ર જનતા નેત્રૈર્નિમેષોજ્ઝિતૈઃ ॥ ૯૨॥

સર્ગે પ્રાથમિકે પ્રયાતિ વિરતિં માર્ગે સ્થિતે દૌર્ગતે
    સ્વર્ગે દુર્ગમતામુપેયુષિ ભૃશં દુર્ગેઽપવર્ગે સતિ ।
વર્ગે દેહભૃતાં નિસર્ગમલિને જાતોપસર્ગેઽખિલે
    સર્ગે વિશ્વસૃજસ્તદીયવપુષા ભર્ગોઽવતીર્ણો ભુવિ ॥ ૯૩॥

ઇતિ શ્રીમાધવીયે તદવતારકથાપરઃ ।
સઙ્ક્ષેપશઙ્કરજયે સર્ગઃ પૂર્ણો દ્વિતીયકઃ ॥ ૨॥

આદિતઃ શ્લોકાઃ ૧૯૧।

# શઙ્કરદિગ્વિજયમ્

## ॥ ૩. તૃતીયઃ સર્ગઃ દેવાવતારઃ ॥

અથ તૃતીયઃ સર્ગઃ ॥

ઇતિ બાલમૃગાઙ્કશેખરે સતિ બાલત્વમુપાગતે તતઃ ।
દિવિષત્પ્રવરાઃ પ્રજજ્ઞિરે ભુવિ ષટ્શાસ્ત્રવિદાં સતાં કુલે ॥ ૧॥

કમલાનિલયઃ કલાનિધેર્વિમલાખ્યાદજનિષ્ટ ભૂસુરાત્ ।
ભુવિ પદ્મપદં વદન્તિ યં સવિપદ્યેન વિવાદિનાં યશઃ ॥ ૨॥

પવમાનોઽપ્યજનિ પ્રભાકરાત્સવનોન્મીલિતકીર્તિમણ્ડલાત્ ।
ગલહસ્તિતભેદવાદ્યસૌ કિલ હસ્તામલકાભિધામધાત્ ॥ ૩॥

પવમાનદશાંશતોઽજનિ પ્લવમાનાઽચ્ચતિ યદ્યશોમ્બુધૌ ।
ધરણી મથિતા વિવાદિવાક્તરણી યેન સ તોટકાહ્વયઃ ॥ ૪॥

ઉદભાવિ શિલાદસૂનુના મદવદ્વાદિકદમ્બનિગ્રહૈઃ ।
સમુદઞ્ચિતકીર્તિશાલિનં યમુદઙ્કં બ્રુવતે મહીતલે ॥ ૫॥

વિધિરાસ સુરેશ્વરો ગિરાં નિધિરાનન્ ગિરિર્વ્યજાયત ।
અરુણઃ સમભૂત્સનન્દનો વરુણોઽજાયત ચિત્સુખાહ્વયઃ ॥ ૬॥

અપરેઽપ્યભવન્દિવૌકસઃ સ્વપરેર્ષ્યાપરવિદ્વિષઃ પ્રભોઃ ।
ચરણં પરિસેવિતું જગચ્છરણં ભૂસુરપુઙ્ગવાત્મજાઃ ॥ ૭॥

ચાર્વાકદર્શનવિધાનસરોષધાતૃ-
 શાપેન ગીષ્પતિરભૂદ્ભુવિ મણ્ડનાખ્યઃ ।
નન્દીશ્વરઃ કરુણયેશ્વરચોદિતઃ સ-
 ન્નાનન્દ ગિર્યભિધયા વ્યજનીતિ કેચિત્ ॥ ૮॥

અથાવતીર્ણસ્ય વિધેઃ પુરન્ધ્રી સાઽભૂદ્યદાખ્યોભયભારતીતિ ।
સરસ્વતી સા ખલુ વસ્તુવૃત્યા લોકોઽપિ તાં વક્તિ સરસ્વતીતિ ॥ ૯॥

પુરા કિલાધ્યૈષત ધાતુરન્તિકે સર્વજ્ઞકલ્પા મુનયો નિજં નિજમ્ ।
વેદં તદા દુર્વસનોઽતિકોપનો વેદાનધીયન્ક્વચિદસ્ખલત્સ્વરે ॥ ૧૦॥

તદા જહાસેન્દુમુખી સરસ્વતી યદઙ્ગમર્ણોદ્ભવશબ્દસન્તતિઃ ।
ચુકોપ તસ્યૈ દહનાનુકારિણા નિરૈક્ષતાક્ષ્ણા મુનિરુગ્રશાસનઃ ॥ ૧૧॥

શશાપ તાં દુર્વિનયેઽવનીતલે જાયસ્વ મર્ત્યેષ્વબિભેત્સરસ્વતી ।
પ્રસાદયામાસ નિસર્ગકોપનં તત્પાદમૂલે પતિતા વિષાદિની ॥ ૧૨॥

દૃષ્ટ્વા વિષણ્ણાં મુનયઃ સરસ્વતીં પ્રસાદયાઞ્ચક્રુરિમં તમાદરાત્ ।
કૃતાપરાધા ભગવન્ક્ષમસ્વ તાં પિતેવ પુત્રં વિહિતાગસં મુને ॥ ૧૩॥

પ્રસાદિતોઽભૂદય સમ્પ્રસન્નો વાણ્યા મુનીન્દ્રૈરપિ શાપમોક્ષમ્ ।
દદૌ યદા માનુષશઙ્કરસ્ય સન્દર્શનં સ્યાદ્ભવિતાસ્ય મર્ત્યા ॥ ૧૪॥

સા શોણતીરેઽજનિ વિપ્રકન્યા સર્વાર્થવિત્સર્વગુણોપપન્ના ।
યસ્યા બભૂવુઃ સહજાશ્ચ વિદ્યાઃ શિરોગતં કે પરિહર્તુમીશાઃ ॥ ૧૫॥

સર્વાણિ શાસ્ત્રાણિ ષડઙ્ગવેદાન્કાવ્યાદિકાન્વેત્તિ પરં ચ સર્વમ્ ।
તન્નાસ્તિ નો વેત્તિ યદત્ર બાલા તસ્માદભૂચ્ચિત્રપદં જનાનામ્ ॥ ૧૬॥

સા વિશ્વરૂપં ગુણિનં ગુણજ્ઞા મનોઽભિરામં દ્વિજપુઙ્ગવેભ્યઃ ।
શુશ્રાવ તાં ચાપિ સ વિશ્વરૂપસ્તસ્માત્તયો દર્શનલાલસાઽભૂત્ ॥ ૧૭॥

અન્યોન્યસન્દર્શનલાલસૌ તૌ ચિન્તાપ્રકર્ષાદધિગમ્ય નિદ્રામ્ ।
અવાપ્ય સન્દર્શનભાષણાનિ પુનઃ પ્રબુદ્ધૌ વિરહાગ્નિતપ્તૌ ॥ ૧૮॥

દિદૃક્ષમાણાવપિ નેક્ષમાણાવન્યોન્યવાર્તાહતમાનસૌ તૌ ।
યથોચિતાહારવિહારહીનૌ તનોં તનુત્વં સ્મરણાદુપેતૌ ॥ ૧૯॥

દૃષ્ટ્વા તદીયૌ પિતરૌ કદાચિદપૃચ્છતાં તૌ પરિકર્શિતાઙ્ગૌ ।
વપુઃ કૃશં તે મનસોઽપ્યગર્વો ન વ્યાધિમીક્ષે ન ચ હેતુમન્યમ્ ॥ ૨૦॥

ઇષ્ટસ્ય હાનેરનભીષ્ટયોગાદ્ભવન્તિ દુઃખાનિ શરીરભાજામ્ ।
વીક્ષે ન તૌ દ્વાવપિ વીક્ષમાણો વિના નિદાનં નહિ કાર્યજન્મ ॥ ૨૧॥

ન તેઽત્યગાદુદ્વહનસ્ય કાલઃ પરાવપાનો ન ચ નિઃસ્વતા વા ।
કુટુમ્બભારો મયિ દુઃસહોઽયં કુમારવૃત્તેસ્તવ કાઽત્ર પીડા ॥ ૨૨॥

ન મૂઢભાવઃ પરિતાપહેતુઃ પરાજિતિર્વા તવ તન્નિદાનમ્ ।
વિદ્વત્સુ વિસ્પષ્ટતયાઽયપાઠાત્સુદુર્ગમાર્થાદપિ તર્કવિદ્ભિઃ ॥ ૨૩॥

આ જન્મનો વિહિતકર્મનિષેવણં તે
    સ્વપ્નેઽપિ નાસ્તિ વિહિતેતર કર્મસેવા ।
તસ્માન્ન ભેયમપિ નારકયાતનાભ્યઃ
    કિં તે મુખં પ્રતિદિનં ગતશોભમાસ્તે ॥ ૨૪॥

નિર્બન્ધતો બહુદિનં પ્રતિપાદ્યમાનૌ
    વક્તું કૃપાભરયુતાવિદમૂચતુઃ સ્મ ।
નિર્બન્ધતસ્તવ વદામિ મનોગતં મે
    વાચ્યં ન વાચ્યમિતિ યદ્વિતનોતિ લજ્જામ્ ॥ ૨૫॥

શોણાખ્યપુન્નદતટે વસતો દ્વિજસ્ય
    કન્યા શ્રુતિં ગતવતી દ્વિજપુઙ્ગવેભ્યઃ ।
સર્વજ્ઞતાપદમનુત્તમરૂપવેષાં
    તામુદ્વિવક્ષતિ મનો ભગવન્મદીયમ્ ॥ ૨૬॥

પુત્રેણ સોઽતિવિનયં ગદિતોઽન્વશાદ્ દ્વૌ
    વિપ્રૌ વધૂવરણકર્મણિ સમ્પ્રવીણૌ ।
તાવાપતુર્દ્વિજગૃહં દ્વિજસન્દિદૃક્ષૂ
    દેશાનતીત્ય બહુલાન્નિજકાર્યસિદ્ધ્યૈ ॥ ૨૭॥

ભૂભૃન્નિકેતનગતઃ શ્રુતવિશ્વશાસ્ત્રઃ
    શ્રીવિશ્વરૂપ ઇતિ યઃ પ્રથિતઃ પૃથિવ્યામ્ ।
તત્પાદપદ્મરજસે સ્પૃહયામિ નિત્યં
    સાહાય્યમત્ર યદિ તાત ભવાન્વિદ્ધ્યાત્ ॥ ૨૮॥

પુત્ર્યા વચઃ પિબતિ કર્ણપુટેન તાતે
    શ્રી વિશ્વરૂપગુરુણા ગુરુણા દ્વિજાનામ્ ।
આજગ્મતુઃ સુવસનૌ વિશદાભયષ્ટી
    સમ્પ્રેષિતૌ સુતવરોદ્વહનક્રિયાયૈ ॥ ૨૯॥

તાવાર્ચ્ય સ દ્વિજવરૌ વિહિતોપચારૈરાયાનકારણમથો શનકૈરપૃચ્છત્ ।
શ્રીવિશ્વરૂપગુરુવાક્યત આગતૌ સ્વ ઇત્યૂચતુર્વરણકર્મણિ કન્યકાયાઃ ॥ ૩૦॥

સમ્પ્રેષિતૌ શ્રુતવયઃકુલવૃત્તધર્મૈઃ સાધારણીં શ્રુતવતા સ્વસુતસ્ય તેન ।
યાચાવહે તવ સુતાં દ્વિજ તસ્ય હેતોરન્યોન્યસઙ્ઘટનમેતુ મણિદ્વયં તત્ ॥ ૩૧॥

મહ્યં તદુક્તમભિરોચત એવ વિપ્રૌ પૃષ્ટ્વા વધૂં મમ પુનઃ કરવાણિ નિત્યમ્ ।
કન્યાપ્રદાનમિદમાયતતે વધૂષુ નો ચેદમૂર્વ્યસનસક્તિષુ પીડયેયુઃ ॥ ૩૨॥

ભાર્યામપૃચ્છદથ કિં કરવાવ ભદ્રે
વિપ્રૌ વરીતુમનસૌ ખલુ રાજગેહાત્ ।
એતાં સુતાં સુતનિભા તત્ર યાઽસ્તિ કન્યા
બ્રૂહિ ત્વમેકમનુમાય પુનર્ન વાચ્યમ્ ॥ ૩૩॥

દૂરે સ્થિતિઃ શ્રુતવયઃકુલવૃત્તજાતં ન જ્ઞાયતે તદપિ કિં પ્રવદામિ તુભ્યમ્ ।
વિત્તાન્વિતાય કુલવૃત્તસમન્વિતાય દેયા સુતેતિ વિદિતં શ્રુતિલોકયોશ્ચ ॥ ૩૪॥

નૈવં નિયન્તુમનઘે તવ શક્યમેતત્તાં રુક્મિણીં યદુકુલાય કુશસ્થલીશે ।
પ્રાદાત્સ ભીષ્મકનૃપઃ ખલુ કુણ્ડિનેશસ્તીર્થાપદેશમટતે ત્વપરીક્ષિતાય ॥ ૩૫॥

કિં કેન સઙ્ગતમિદં સતિ મા વિચારીર્ય્ વૈદિકીં સરણિમપ્રહતાં પ્રયત્નાત્ ।
પ્રાતિષ્ઠિપત્સુગતદુર્જયનિર્જયેન શિષ્યં યમેનમશિષત્સ ચ ભટ્ટપાદઃ ॥ ૩૬॥

કિં વર્ણ્યતે સુદતિ યો ભવિતા વરો નો
વિદ્યાધનં દ્વિજવરસ્ય ન બાહ્યવિત્તમ્ ।
યાઽન્વેતિ સન્તતમનન્તદિગન્તભાજં
યાં રાજચોરવનિતા ન ચ હર્તુમીશાઃ ॥ ૩૭॥

વધ્વર્જનાવનપરિવ્યયગાનિ તાનિ
વિત્તાનિ ચિત્તમનિશં પરિખેદયન્તિ ।
ચોરાન્નૃપાત્સ્વજનતશ્ચ ભયં ધનાનાં
શર્મેતિ જાતુ ન ગુણઃ ખલુ બાલિશસ્ય ॥ ૩૮॥

કેચિદ્ધનં નિદધતે ભુવિ નોપભોગં કુર્વન્તિ લોભવશગા ન વિદન્તિ કેચિત્ ।
અન્યેન ગોપિતમથાન્યજના હરન્તિ તચ્ચેન્નદીપરિસરે જલમેવ હર્તૃ ॥ ૩૯॥

સર્વાત્મના દુહિતરો ન ગૃહે વિધેયાસ્તાશ્ચેત્પુરા પરિણયાદ્રજ ઉદ્ગતં સ્યાત્ ।
પશ્યેયુરાત્મપિતરૌ બત પાતયન્તિ દુઃખેષુ ઘોરનરકેષ્વિતિ ધર્મશાસ્ત્રમ્ ॥ । ૪૦॥

મા ભૂદયં મમ સુતા કલહઃ કુમારીં
પૃચ્છાવ સા વદતિ યં ભવિતા વરોઽસ્યાઃ ।
એવં વિધાય સમયં પિતરૌ કુમાર્યાઃ
અભ્યાશમીયતુરિતો ગદિતેષ્ટકાર્યૌ ॥ ૪૧॥

શ્રી વિશ્વરૂપગુરુણા પ્રહિતૌ દ્વિજાતી

કન્યાર્થિનૌ સુતનુ કિં કરવાવ વાચ્યમ્ ।
તસ્યાઃ પ્રમોદનિચયો ન મમૌ શરીરે
રોમાઞ્ચપૂરમિષતો બહિરુજ્જગામ ॥ ૪૨॥

તેનૈવ સા પ્રતિવચઃ પ્રદદૌ પિતૃભ્યાં તેનૈવ તાવપિ તયોર્યુગલાય સત્યમ્ ।
આદાય વિપ્રમપરં પિતૃગેહતોઽસ્યાસ્તૌ જગ્મતુર્દ્વિજવરૌ સ્વનિકેતનાય ॥ ૪૩॥

અસ્માચ્ચતુર્દશદિને ભવિતા દશમ્યાં
જામિત્રભાદિશુભયોગયુતો મુહૂર્તઃ ।
એવં વિલિખ્ય ગણિતાદિષુ કૌશલાસ્યા
વ્યાખ્યાપરાય દિશતિ સ્મ સરસ્વતી સા ॥ ૪૪ ૪૪॥

તૌ હૃષ્ટપુષ્ટમનસૌ વિહિતેષ્ટકાર્યૌ
શ્રી વિશ્વરૂપગુરુમુત્તમમૈક્ષિષાતામ્ ।
સિદ્ધં સમીહિતમિતિ પ્રથિતાનુભાવો
દૃષ્ટ્વૈવ તન્મુખમસાવથ નિશ્ચિકાય ॥ ૪૫॥

અન્યઃ સ્વહસ્તગતપત્રમદાત્સ પત્રં દૃષ્ટ્વા જહાસ સુખવારિનિધૌ મમજ્જ ।
વિપ્રાન્યથોચિતમપૂજયદાગતાંસ્તાન્નત્વાંઽશુકાદિભિરયં બહુવિત્તલભ્યૈઃ ॥ ૪૬॥

પિત્રાનુશિષ્ટવસુધાસુરશંસિતેન વિજ્ઞાપિતઃ સુખમવાપ સ વિશ્વરૂપઃ ।
કાર્યાણ્યથાહ પૃથગાત્મજનાન્સમેતાન્બન્ધુપ્રિયઃ પરિણયોચિતસાધનાય ॥ ૪૭॥

મૌહૂર્તિકૈર્બહુભિરેત્ય મુહૂર્તકાલે સન્દર્શિતે દ્વિજવરૈર્બહુવિદ્ભિરિષ્ટૈઃ ।
માઙ્ગલ્યવસ્તુસહિતોઽખિલભૂષણાઢ્યઃ સ પ્રાપદક્ષતતનુઃ પૃથુશોણતીરમ્ ॥ ૪૮॥

શોણસ્ય તીરમુપયાતમુપાશ‍ૃણોત્સ જામાતરં બહુવિધં કિલ વિષ્ણુમિત્રઃ ।
પ્રત્યુજ્જગામ મુમુદે પ્રિયદર્શનેન પ્રાવીવિશદ ગૃહમમું બહુવાદ્યઘોષૈઃ ॥ ૪૯॥

દત્ત્વાઽઽસનં મૃદુવચઃ સમુદીર્ય તસ્મૈ પાદ્યં દદૌ સમધુપર્કમનર્ઘપાત્રે ।
અર્ઘ્યં દદાવહમિયં તનયા ગ્રહાસ્તે ગાવો હિરણ્યમખિલં ભવદીયમૂચે ॥ ૫૦॥

અસ્માકમદ્ય પવિતં કુલમાદૃતાઃ સ્મઃ સન્દર્શનં પરિણયવ્યપદેશતોઽભૂત્ ।
નોચેદ્ભવાન્બહુવિદગ્રસરઃ ક્વચાહં ભદ્રેણ ભદ્રમુપયાતિ પુમાન્વિપાકાત્ ॥ ૫૧॥

યદ્યદ્ગૃહેઽત્ર ભગવન્નિહ રોચતે તે તત્તન્નિવેદ્યમખિલં ભવદીયમેતત્ ।
વક્ષ્યામિ સર્વમભિલાષપદં ત્વદીયં યુક્તં હિ સન્તતમુપાસિતવૃદ્ધપૂગે ॥ ૫૨॥

એવં મિથઃ પરિનિગદ્ય વિશેષમૃદ્વ્યા વાચા યુતૌ મુદમવાપતુરુત્તમાં તૌ ।

અન્યે ચ સમ્મુમુદિરે પ્રિયસત્કથાભિઃ સ્વેચ્છા વિહારહસનૈરુભયે વિધેયાઃ ॥ ૫૩॥

કન્યાવરૌ પ્રકૃતિસિદ્ધસુરૂપવેષૌ દૃષ્ટ્વભયેઽપિ પરિકર્મ વિલમ્બમાનાઃ ।
ચક્રુર્વિધેયમિતિ કર્તુમનીશ્વરાસ્તે શોભાવિશેષમપિ મઙ્ગલવાસરેઽસ્મિન્ ॥ ૫૪॥

એતત્પ્રભાપ્રતિહતાત્મવિભૂતિભાવાદાકલ્પજાતમપિ નાતિશયં વિતેને ।
લોકપ્રસિદ્ધિમનુસૃત્ય વિધેયબુદ્ધ્યા ભૂષાં વ્યધુસ્તદુભયે ન વિશેષબુદ્ધ્યા ॥ ૫૫॥

મૌહૂર્તિકા બહુવિદોઽપિ મુહૂર્તકાલમપ્રાક્ષુરક્ષતધિયં ખિલતીં સખીભિઃ ।
પશ્ચાત્તદુક્તશુભયોગયુતે શુભાંશે મૌહૂર્તિકાઃ સ્વમતિતો જગૃહુર્મુહૂર્તમ્ ॥ ૫૬॥

જગ્રાહ પાણિકમલં હિમમિત્રસૂનુઃ શ્રીવિષ્ણુમિત્રદુહિતુઃ કરપલ્લવેન ।
ભેરીમૃદઙ્ગપટહાધ્યયનાબ્જઘોષૈર્દિઙમણ્ડલે સુપરિમૂર્ચ્છતિ દિવ્યકાલે ॥ ૫૭॥

યં યં પદાર્થમભિકામયતે પુમાન્યસ્તં તં પ્રદાય સમતૂતુષતાં તદીડ્યૌ ।
દેવદ્રુમાવિવ મહાસુમનસ્ત્વયુક્તૌ સમ્ભૂષિતૌ સદસિ ચેરતુરાત્મલાભૌ ॥ ૫૮॥

આધાય વહ્નિમથ તત્ર જુહાવ સભ્ય-
ગ્ગૃહ્યોક્તમાર્ગમનુસૃત્ય સ વિશ્વરૂપઃ ।
લાજાઞ્જુહાવ ચ વધૂઃ પરિજિઘ્રતિ સ્મ
ધૂમં પ્રદક્ષિણમથાકૃત સોઽપિ ચાગ્નિમ્ ॥ ૫૯॥

હોમાવસાનપરિતોષિતવિપ્રવર્યઃ પ્રસ્થાપિતાખિલ સમાગતબન્ધુવર્ગઃ ।
સંરક્ષ્ય વહ્નિમનયા સમમગ્નિગેહે દીક્ષાધરો દિનચતુષ્કમુવાસ હૃષ્ટઃ ॥ ૬૦॥

પ્રતિષ્ઠમાને દયિતે વરેઽસ્મિન્નુપેત્ય માતાપિતરૌ વરાયાઃ ।
આભાષિષાતાં શ ृણુ સાવધાનો બાલેવ બાલા ન તુ વેત્તિ કિઞ્ચિત્ ॥ ૬૧॥

બાલૈરિયં ક્રીડતિ કન્દુકાદ્યૈર્જાતક્ષુધા ગેહમુપૈતિ દુઃખાત્ ।
એકેતિ બાલા ગૃહકર્મ નોક્તા સંરક્ષણીયા નિજપુત્રિતુલ્યા ॥ ૬૨॥

બાલેયમઙ્ગ વચનૈર્મૃદુભિર્વિધેયા કાર્યા ન રૂક્ષવચનૈર્ન કરોતિ રુષ્ટા ।
કેચિન્મૃદૂક્તિવશગા વિપરીતભાવાઃ કેચિદ્વિહાતુમનલં પ્રકૃતિં જનો હિ ॥ ૬૩॥

કશ્ચિદ્ દ્વિજાતિરધિગમ્ય કદાચિદેનામુદ્વીક્ષ્ય લક્ષણમવોચદનિન્દિતાત્મ ।
માનુષ્યમાત્રજનનં નિજદેવભાવેત્યસ્માચ્ચ વો વચનમુગ્રમયોજ્યમસ્યામ્ ॥ ૬૪॥

સર્વજ્ઞતાલક્ષણમસ્તિ પૂર્ણમેષા કદાચિદ્વદતોઃ કથાયામ્ ।
તત્સાક્ષિભાવં વ્રજિતાઽનવદ્યા સન્દિશ્ય નાવેવમસૌ જગામ ॥ ૬૫॥

શ્વશ્રૂર્વરાયા વચનેન વાચ્યા સ્નુષાભિરક્ષાઽઽયતતે હિ તસ્યામ્ ।

નિક્ષેપભૂતા તવ સુન્દરીયં કાર્યા ગૃહે કર્મ શનૈઃ શનૈસ્તે ॥ ૬૬॥

બાલ્યેષુ બાલ્યાત્સુલભોઽપરાધઃ સ નેક્ષણીયો ગૃહિણીજનેન ।
વયં સુધીભૂય હિ સર્વ એવ પશ્ચાદ્ગુરુત્વં શનકૈઃ પ્રયાતાઃ ॥ ૬૭॥

દૃષ્ટ્વાઽભિધાતુમનલં ચ મનોઽસ્મદીયં
 ગેહાભિરક્ષણવિધૌ ન હિ દૃશ્યતેઽન્યઃ ।
દૃષ્ટ્વાઽભિધાનફલમેવ યથા ભવેન્નો
 બ્રૂયાત્તથેષ્ટજનતા જનનીં વરસ્ય ॥ ૬૮॥

વત્સે ત્વમદ્ય ગમિતાઽસિ દશામપૂર્વાં
 તદ્રક્ષણે નિપુણધીર્ભવ સુભ્રુ નિત્યમ્ ।
કુર્યાન્ન બાલવિહૃતિં જનતોપહાસ્યાં
 સા નાવિવાપરમિયં પરિતોષયેત્તે ॥ ૬૯॥

પાણિગ્રહાત્સ્વાધિપતી સમીરિતૌ પુરા કુમાર્યાઃ પિતરૌ તતઃ પરમ્ ।
પતિસ્તમેકં શરણં વ્રજાનિશં લોકદ્વયં જેષ્યસિ યેન દુર્જયમ્ ॥ ૭૦॥

પત્યાવભુક્તવતિ સુન્દરિ મા સ્મ ભુઙ્ક્ષ્વ
 યાતે પ્રયાતમપિ મા સ્મ ભવેદ્વિભૂષા ।
પૂર્વાપરાદિનિયમોઽસ્તિ નિમજ્જનાદૌ
 વૃદ્ધાઙ્ગનાચરિતમેવ પરં પ્રમાણમ્ ॥ ૭૧॥

રુષ્ટે ધવે સતિ રુષેહ ન વાચ્યમેકં
 ક્ષન્તવ્યમેવ સકલં સ તુ શામ્યતીત્યમ્ ।
તસ્મિન્પ્રસન્નવદને ચકિતેવ વત્સે
 સિધ્યત્યભીષ્ટમનઘે ક્ષમયૈવ સર્વમ્ ॥ ૭૨॥

ભર્તુઃ સમક્ષમપિ તદ્વદનં સમીક્ષ્ય
 વાચ્યો ન જાતુ સુભગે પરપૂરુષસ્તે ।
કિં વાચ્ય એષ રહસીતિ તવોપદેશઃ
 શઙ્કા વધૂપુરુષયોઃ ક્ષપયેદ્ધિ હાર્દમ્ ॥ ૭૩॥

આયાતિ ભર્તરિ તુ પુત્રિ વિહાય કાર્ય-
 મુત્થાય શીઘ્રમુદકેન પદાવનેકઃ ।
કાર્યો યથાભિરુચિ હે સતિ જીવનં વા
 નો પેક્ષણીયમણુમાત્રમપીહ કં તે ॥ ૭૪॥

ધવે પરોક્ષેડપિ કદાચિદેયુર્ગૃહં તદીયા અપિ વા મહાન્તઃ ।
તે પૂજનીયા બહુમાનપૂર્વં નો ચેન્નિરાશાઃ કુલદાહકાઃ સ્યુઃ ॥ ૭૫॥

પિત્રોરિવ શ્વશુરયોરનુવર્તિતવ્યં
    તદ્વન્મૃગાક્ષિ સહજેષ્વપિ દેવરેષુ ।
તે સ્નેહિનો હિ કુપિતા ઇતરેતરસ્ય
    યોગં વિભિદ્યુરિતિ મે મનસિ પ્રતર્કઃ ॥ ૭૬॥

હિતોપદેશે વિનિવિષ્ટમાનસૌ વધૂવરૌ રાજગૃહં સમીયતુઃ ।
લબ્ધાનુમાનૌ ગુરુબન્ધુબર્ગતો બભૂવ સંજ્ઞોભયભારતીતિ ॥ ૭૭॥

સા ભારતી દુર્વસનેન દત્તં પુનઃ પ્રસન્નેન પુરાઽઽત્તહર્ષા ।
શાપાવધિં સંસદિ વર્ત્સ્યતે યત્સર્વજ્ઞતાનિર્વહણાય સાક્ષ્યમ્ ॥ ૭૮॥

સ ભારતીસાક્ષિક સર્વવિત્ત્વોઽપ્યાત્મીયશક્ત્યા શિશુવદ્વિભાતઃ ।
સ્વશૈશવસ્યોચિતમન્ત્રકાઙ્ક્ષીત્સ કેશવો યદ્વદુદારવૃત્તઃ ॥ ૭૯॥

શૈશવે સ્થિતવતા ચપલાશે શાઙ્ગિણેવ વટવૃક્ષપલાશે ।
આત્મનીદમખિલં વિલુલોકે ભાવિભૂતમપિ યત્ખલુ લોકે ॥ ૮૦॥

તં દદર્શ જનતાઽદ્ભુતબાલં લીલયાઽધિગતનૂતનદોલમ્ ।
વાસુદેવમિવ વામનલીલં લોચનૈરનિમિષૈરનુવેલમ્ ॥ ૮૧॥

કોમલેન નવનીરદરાજિશ્યામલેન નિતરાં સમરાજિ ।
કેશવેશતમસાઽધિકમસ્ય કેશવેશચતુરાસ્યસમસ્ય ॥ ૮૨॥

શાક્યૈઃ પાશુપતૈરપિ ક્ષપણકૈઃ કાપાલિકૈર્વૈષ્ણવૈ-
    રપ્યન્યૈરખિલૈઃ ખલૈઃ ખલુ ખિલં દુર્વાદિભિર્વૈદિકમ્ ।
પન્થાનં પરિરક્ષિતું ક્ષિતિતલં પ્રાપ્તઃ પરિક્રીડતે
    ઘોરે સંસૃતિકાનને વિચરતાં ભદ્રઙ્કરઃ શઙ્કરઃ ॥ ૮૩॥

ઇતિ શ્રીમાધવીયે તત્તદેવાવતારાર્થકઃ ।
સઙ્ક્ષેપશઙ્કરજયે તૃતીયઃ સર્ગ આભવત્ ॥

આદિતઃ શ્લોકાઃ ૨૭૪ ।

# શઙ્કરદિગ્વિજયમ્

## ॥ ૪. ચતુર્થઃ સર્ગઃ કૌમારચરિતવર્ણનમ્ ॥

અથ શિવો મનુજો નિજમાયયા દ્વિજગૃહે દ્વિજમોદમુપાવહન્ ।
પ્રથમહાયન એવ સમગ્રહીત્સકલવર્ણમસૌ નિજભાષિકામ્ ॥ ૧॥

દ્વિસમ એવ શિશુર્લિખિતાક્ષરં ગદિતુમક્ષમતાક્ષરવિત્સુધીઃ ।
અથ સ કાવ્યપુરાણમુપાશ‌ૃણોત્સ્વયમવૈત્કિમપિ શ્રવણં વિના ॥ ૨॥

અજનિ દુઃખકરો ન ગુરોરસૌ શ્રવણતઃ સકૃદેવ પરિગ્રહી ।
સહનિપાઠજનસ્ય ગુરુઃ સ્વયં સ ચ પપાઠ તતો ગુરુણા વિના ॥ ૩॥

રજસા તમસાऽપ્યનાશ્રિતો રજસા ખેલનકાલ એવ હિ ।
સ કલાધરસત્તમાત્મજો સકલાશ્ચાપિ લિપીરવિન્દત ॥ ૪॥

સુધિયોऽસ્ય વિદિદ્યુતેऽધિકં વિધિવચ્ચૌલવિધાનસંસ્કૃતમ્ ।
લલિતં કરણં ઘૃતાહુતિજ્વલિતં તેજ ઇવાશુશુક્ષણેઃ ॥ ૫॥

ઉપપાદનનિર્વ્યપેક્ષધીઃ સ પપાઠાહૃતિપૂર્વકાગમાન્ ।
અધિકાવ્યમરંસ્ત કર્કશેऽપ્યધિકાંસ્તર્કનયેऽત્યવર્તત ॥ ૬॥

હરતસ્ત્રિદશેજ્યચાતુરીં પુરતસ્તસ્ય ન વક્તુમીશ્વરાઃ ।
પ્રભવોऽપિ કથાસુ નૈજવાગ્વિભવોત્સારિતવાદિનો બુધાઃ ॥ ૭॥

અમુકક્રમિકોક્તિધોરણીમુરગાધીશકથાવધીરિણીં
મુમુહુર્નિશમય્ય વાદિનઃ પ્રતિવાક્યોપહૃતૌ પ્રમાદિનઃ ॥ ૮॥

કુમતાનિ ચ તેન કાનિ નોન્મથિતાનિ પ્રથિતેન ધીમતા ।
સ્વમતાન્યપિ તેન ખણ્ડિતાન્યતિયત્નૈરપિ સાધિતાનિ કૈઃ ॥ ૯॥

અમુના તનયેન ભૂષિતં યમુનાતાતસમાનવર્ચસા ।
તુલયા રહિતં નિજં કુલં કલયામાસ સ પુત્રિણાં વરઃ ॥ ૧૦॥

શિવગુરુઃ સ જરંસ્ત્રિસમે શિશાવમૃત કર્મવશઃ સુતમોદિતઃ ।

ઉપનિનીષિતસુનુરપિ સ્વયં ન હિ યમોઽસ્ય કૃતાકૃતમીક્ષતે ॥ ૧૧॥

ઇહ ભવેત્સુલભં ન સુતેક્ષણં ન સુતરાં સુલભં વિભવેક્ષણમ્ ।
સુતમવાપ કથઞ્ચિદયં દ્વિજો ન ખલુ વીક્ષિતુમૈષ્ટ સુતોદયમ્ ॥ ૧૨॥

મૃતમદીદિહદાત્મસનાભિભિઃ પિતરમસ્ય શિશોર્જનની તતઃ ।
સમનુનીતવતી ધવખણ્ડિતાં સ્વજનતા મૃતિશોકહરૈઃ પદૈઃ ॥ ૧૩॥

કૃતવતીં મૃતચોદિતમક્ષમા નિજજનૈરપિ કારિતવત્યસૌ ।
ઉપનિનીષુરભૂત્સુતમાત્મનઃ પરિસમાપ્ય ચ વત્સરદીક્ષણમ્ ॥ ૧૪॥

ઉપનયં કિલ પઞ્ચમવત્સરે પ્રવરયોગયુતે સુમુહૂર્તકે ।
દ્વિજવધૂર્નિયતા જનની શિશોર્વ્યાધિત તુષ્ટમનાઃ સહ બન્ધુભિઃ ॥ ૧૫॥

અધિજગે નિગમાંશ્ચતુરોઽપિ સ ક્રમત એવ ગુરોઃ સષડઙ્ગકાન્ ।
અજનિ વિસ્મિતમત્ર મહામતૌ દ્વિજસુતેઽલ્પતનૌ જનતામનઃ ॥ ૧૬॥

સહનિપાઠયુતા બહવઃ સમં પઠિતુમૈશત ન દ્વિસૂનુના ।
અપિ ગુરુર્વિશયં પ્રતિપેદિવાન્ક ઇવ પાઠયિતું સહસા ક્ષમઃ ॥ ૧૭॥

અત્ર કિં સ યદશિક્ષત સર્વાંશ્ચિત્રમાગમગણાનનુવૃત્તઃ ।
દ્વિત્રિમાસપઠનાદભવદ્યસ્તત્ર તત્ર ગુરુણા સમવિદ્યઃ ॥ ૧૮॥

વેદે બ્રહ્મસમસ્તદઙ્ગનિચયે ગાર્ગ્યમસ્તત્કથા-
 તાત્પર્યાર્થવિવેચને ગુરુસમસ્તત્કર્મસંવર્ણને ।
આસીજ્જૈમિનિરેવ તદ્વચનજપ્રોદ્બોધકન્દે સમો
 વ્યાસેનૈવ સ મૂર્તિમાનિવ નવો વાણીવિલાસૈર્વૃતઃ ॥ ૧૯॥

આન્વીક્ષિક્યૈક્ષિ તન્ત્રે પરિચિતિરતુલા કાપિલે કાઽપિ લેભે
 પીતં પાતઞ્જલામ્ભઃ પરમપિ વિદિતં ભાટ્ટઘટ્ટાર્થતત્ત્વમ્ ।
યત્તૈઃ સૌખ્યં તદસ્યાન્તરભવદમલાદ્વૈતવિદ્યાસુખેઽસ્મિ-
 ન્કૂપે યોઽર્થઃ સ તીર્થે સુપયસિ વિતતે હન્ત નાન્તર્ભવેત્કિમ્ ॥ ૨૦॥

સ હિ જાતુ ગુરોઃ કુલે વસન્સવયોભિઃ સહ ભૈક્ષલિપ્સયા ।
ભગવાન્ભવનં દ્વિજન્મનો ધનહીનસ્ય વિવેશ કસ્યચિત્ ॥ ૨૧॥

તમવોચત તત્ર સાદરં યતિવર્યં ગૃહિણઃ કુટુમ્બિની ।
કૃતિનો હિ ભવાદૃશેષુ યે વરિવસ્યાં પ્રતિપાદયન્તિ તે ॥ ૨૨॥

વિધિના ખલુ વઞ્ચિતા વયં વિતરીતું વટવે ન શક્નુમઃ ।

અપિ ભૈક્ષમકિઞ્ચનત્વતો ધિગિદં જન્મ નિરર્થકં ગતમ્ ॥ ૨૩॥

ઇતિ દીનમુદીરયન્ત્યસૌ પ્રદદાવામલકં વ્રતીન્દવે ।
કરુણં વચનં નિશમ્ય સોઽધ્યભવજ્જ્ઞાનનિધિર્દયાર્દ્રધીઃ ॥ ૨૪॥

સ મુનિર્મુરભિત્કુટુમ્બિનીં પદચિત્રૈર્નવનીતકોમલૈઃ ।
મધુરૈરુપતસ્થિવાંસ્તવૈર્દ્વિજદારિદ્ર્યદશાનિવૃત્તયે ॥ ૨૫॥

અથ કૈટભજિત્કુટુમ્બિની તટિદુદ્દામનિજાઙ્ગકાન્તિભિઃ ।
સકલાશ્ચ દિશઃ પ્રકાશયન્ત્યચિરાદાવિરભૂત્તદગ્રતઃ ॥ ૨૬॥

અભિવન્દ્ય સુરેન્દ્રવન્દિતં પદયુગ્મં પુરતઃ કૃતાઞ્જલિમ્ ।
લલિતસ્તુતિભિઃ મહર્ષિતા તમુવાચ સ્મિતપૂર્વકં વચઃ ॥ ૨૭॥

વિદિતં તવ વત્સ હૃદ્ગતં કૃતમેભિર્ન પુરા ભવે શુભમ્ ।
અધુના મદપાઙ્ગપાત્રતાં કથમેતે મહિતામવાપ્નુયુઃ ॥ ૨૮॥

ઇતિ તદ્વચનં સ શુશ્રુવાન્નિજગાદામ્બ મયીદમર્પિતમ્ ।
ફલમદ્ય દદસ્વ તત્ફલં દયનીયો યદિ તેઽહમિન્દિરે ॥ ૨૯॥

અમુના વચનેન તોષિતા કમલા તદ્ભવનં સમન્તતઃ ।
કનકામલકૈરપૂરયજ્જનતાયા હૃદયં ચ વિસ્મયૈઃ ॥ ૩૦॥

અથ ચક્રભૃતો વધૂમયે સુકૃતેઽન્તર્ધિમુપાગતે સતિ ।
પ્રશશંસુરતીવ શઙ્કરં મહિમાનં તમવેક્ષ્ય વિસ્મિતાઃ ॥ ૩૧॥

દિવિ કલ્પતરુર્યથા તથા ભુવિ કલ્યાણગુણો હિ શઙ્કરઃ ।
સુરભૂસુરયોરપિ પ્રિયઃ સમભૂદિષ્ટવિશિષ્ટત્રસ્તુદઃ ॥ ૩૨॥

અમરસ્પૃહણીયસમ્પદં દ્વિજવર્યસ્ય નિવેશમાત્મવાન્ ।
સ વિધાય યથાપુરં ગુરોઃ સવિધે શાસ્ત્રવરાણ્યશિક્ષત ॥ ૩૩॥

વરમેનમવાપ્ય ભેજિરે પરભાગં સકલાઃ કલા અપિ ।
સમવાપ્ય નિજોચિતં પતિં કમનીયા ઇવ વામલોચનાઃ ॥ ૩૪॥

સરહસ્યસમગ્રશિક્ષિતાખિલવિદ્યસ્ય યશસ્વિનો વપુઃ ।
ઉપમાનકથાપ્રસઙ્ગમપ્યસહિષ્ણુશ્રિયમન્વપદ્યત ॥ ૩૫॥

જયતિ સ્મ સરોરુહપ્રભામદકુણ્ઠીકરણક્રિયાચણમ્ ।
દ્વિજરાજકરોપલાલિતં પદયુગ્મં પરગર્વહારિણઃ ॥ ૩૬॥

જલબિન્દુમણિં સ્રવેદ્યદિ યદિ પદ્મં દૃષદઃ તતઃ સરઃ ।
યદિ તત્ર ભવેત્કુશેશયં તદમુષ્યાઙ્ઘ્રિતુલામવાપ્નુયાત્ ॥ ૩૭॥

પાદૌ પદ્મસમૌ વદન્તિ કતિચિચ્છ્રીશઙ્કરસ્યાનઘૌ
 વક્તું ચ દ્વિજરાજ-મણ્ડલનિભં નૈતદ્ દ્વયં સામ્પ્રતમ્ ।
પ્રેષ્યઃ પદ્મપદઃ કિલ ત્રિજગતિ ખ્યાતઃ પદં દત્તવા-
 નમ્ભોજે દ્વિજરાજમણ્ડલશતૈઃ પ્રેષ્યૈરુપાસ્યં મુખમ્ ॥ ૩૮॥

મુહુઃ સન્તો નૈજં હૃદયકમલં નિર્મલતરં
 વિધાતું યોગીન્દ્રાઃ પદકમલમસ્મિન્નિદધતિ ।
દુરાપાં શક્રાદ્યૈર્વમતિ વદનં યન્નવસુધાં
 તતો મન્યે પદ્માત્પદમધિકમિન્દોશ્ચ વદનમ્ ॥ ૩૯॥

તત્ત્વજ્ઞાનફલેગ્રહિર્ઘનતરવ્યામોહમુષ્ટિન્ધયો
 નિઃશેષવ્યસનોદરમ્ભરિરઘપ્રાગ્ભારકૂલઙ્કુષઃ ।
લુણ્ટાકો મદમત્સરાદિવિતતેસ્તાપત્રયારન્તુદઃ
 પાદઃ સ્યાદમિતમ્પચઃ કરુણયા ભદ્રઙ્કુરઃ શઙ્કરઃ ॥ ૪૦॥

પાદાઘાતસ્ફોટવ્રણકિણિતકાર્તાન્તિકભુજં
 પ્રઘાણવ્યાઘાતપ્રણતવિમતદ્રોહબિરુદમ્ ।
પરં બ્રહ્મૈવાસૌ ભવતિ તત એવાસ્ય સુપદં
 ગતાપસ્મારાર્તીઞ્જગતિ મહતોઽયાપિ તનુતે ॥ ૪૧॥

પ્રાપ્તસ્યાભ્યુદયં નવં કલયતઃ સારસ્વતોજ્જૃમ્ભણં
 સ્વાલોકેન વિધૂતવિશ્વતિમિરસ્યાસન્નતારસ્ય ચ ।
તાપં નસ્ત્વરિતં ક્ષિપન્તિ ઘનતાપન્નં પ્રસન્ના મુને-
 રાહ્લાદં ચ કલાધરસ્ય મધુરાઃ કુર્વન્તિ પાદક્રમાઃ ॥ ૪૨॥

નતિર્દત્તે મુક્તિં નતમુત પદં વેતિ ભગવ-
 ત્પદસ્ય પ્રાગલ્ભ્યાજ્જગતિ વિવદન્તે શ્રુતિવિદઃ ।
વયન્તુ બ્રૂમસ્તદ્ભજનરતપાદામ્બુજરજઃ-
 પરીરમ્ભારમ્ભઃ સપદિ હૃદિ નિર્વાણશરણમ્ ॥ ૪૩॥

ધવલાંશુકપલ્લવાવૃતં વિલલાસોરુયુગં વિપશ્ચિતઃ ।
અમૃતાર્ણવફેનમઞ્ચરીચ્છુરિતૈરાવતહસ્તશસ્તિભૂત્ ॥ ૪૪॥

યદિ હાટકવલ્લરીત્રયીઘટિતા સ્ફાટિકકૂટભૃત્તટી ।

સ્ફુટમસ્ય તયા કટીતટી તુલિતા સ્યાત્કલિતત્રિમેખલા ॥ ૪૫॥

આદાય પુસ્તકવપુઃ શ્રુતિસારમેકહસ્તેન વાદિકૃતતદ્ગતકણ્ટકાનામ્ ।
ઉદ્ધારમારચયતીવ વિબોધમુદ્રામુદ્બિભ્રતા નિજકરેણ પરેણ યોગી ॥ ૪૬॥

સુધીરાજઃ કલ્પદ્રુમકિસલયાભૌ કરવરૌ
    કરોત્યેતૌ ચેતસ્યમલકમલં યત્સહચરમ્ ।
રુચેશ્ચાવેતાવહનિ કિમુ રાત્રાવિતિ ભિયા
    નિશાદેરાપ્રાતર્નિજદલકવાટં ઘટયતિ ॥ ૪૭॥

રુચિરા તદુરસ્થલીં બભાવરરસ્ફાલવિશાલમાંસલા
ધરણીભ્રમણોદિતશ્રમાત્પૃથુશય્યેવ જયશ્રિયાઽઽશ્રિતા ॥ ૪૮॥

પરિઘપ્રથિમાપહારિણૌ શુશુભાતે શુભલક્ષણૌ ભુજૌ ।
બહિરન્તરશત્રુનિગ્રહે વિજયસ્તમ્ભયુગીધુરન્ધરૌ ॥ ૪૯॥

ઉપવીતમમુષ્ય દિદ્યુતે બિસતન્નુક્રિયમાણસૌહૃદમ્ ।
શરદિન્દુમયૂખપાણ્ડિમાતિશયોલ્લઙ્ઘનજાઙ્ઘિકપ્રભમ્ ॥ ૫૦॥

સમરાજત કણ્ઠકમ્બુરાડ્ ભગવત્પાદમુનેર્યદુદ્ભવઃ ।
નિનદઃ પ્રતિપક્ષનિગ્રહે જયશઙ્ખધ્વનિતામવિન્દત ॥ ૫૧॥

અરુણાધરસઙ્ગતાઽધિકં શુશુભે તસ્ય હિ દન્તચન્દ્રિકા ।
નવવિદ્રુમવલ્લરીગતા તુહિનાંશોરિવ શારદી છવિઃ ॥ ૫૨॥

સુકપોલતલે યશસ્વિનઃ શુશુભાતે સિતભાનુવર્ચસઃ ।
વદનાશ્રિતભારતીકૃતે વિધિસઙ્કલ્પિતદર્પણાવિવ ॥ ૫૩॥

સમાસીત્તસ્યાસ્યં સુકૃતજલધેઃ સર્વજગતાં
    પયઃપારાવારાદજનિ રજનીશો બહુમતાત્ ।
સુધાધારોદ્ગારઃ સુસદૃગનયોઃ કિન્તુ શશભૃ-
    ત્સતાં તેજઃપુઞ્જં હરતિ વદનં તસ્ય દિશતિ ॥ ૫૪॥

પુરા ક્ષીરામ્ભોધેરહહ તનયા યદ્વિષયતા-
    જુષો દીનસ્યાગ્રે ઘનકનકધારાઃ સમકિરત્ ।
ઇદં નેત્રં પાત્રં કમલનિલયાપ્રીતિવિતતે-
    ર્મુનીશસ્ય સ્તોતું કૃતસુકૃત એવ પ્રભવતિ ॥ ૫૫॥

દુર્વારમવિપક્ષદૂષણસમુન્મેષક્ષિતૌ કલ્પને

સેતોરપ્યનઘસ્ય તાપસકુલૈણાઙ્કસ્ય લઙ્કારયઃ ।
અપન્નાનતિકાયવિભ્રમમુષઃ સંસારિશાખામૃગાન્
પુષ્ણન્ત્યચ્છપયોબ્ધીવીચિવદલઙ્કારાઃ કટાક્ષાઙ્કુરાઃ ॥ ૫૬॥

નિઃશઙ્કક્ષતિરુક્ષકણ્ટકકુલં મીનાઙ્કદાવાનલ-
જ્વાલાસઙ્કુલમાર્તિપઙ્કિલતરં વ્યધ્વં ધૃતિધ્વંસિનમ્ ।
સંસારાકૃતિમામયચ્છલચલદ્દુર્વારદુર્વારણં
મુષ્ણન્તિ શ્રમમાશ્રિતા નવસુધાવૃષ્ટ્યાયિતા દૃષ્ટયઃ ॥ ૫૭॥

ત્રિપુણ્ડ્રં તસ્યાહુઃ સિતભસિતશોભિ ત્રિપથગાં
કૃપાપારાવારં કતિચન મુનિં તં શ્રિતવતીમ્ ।
વયં ત્વેતદ્ બ્રૂમો જગતિ કિલ તિસ્રઃ સુરુચિરા-
સ્ત્રયીમૌલિવ્યાકૃત્યુપકૃતિભવાઃ કીર્તય ઇતિ ॥ ૫૮॥

અસૌ શમ્ભોર્લીલાવપુરિતિ ભૃશં સુન્દર ઇતિ
દ્વયં સમ્પત્યેતજ્જનમનસિ સિદ્ધં ચ સુગમમ્ ।
યદન્તઃ પશ્યન્તઃ કરણમદસીયં નિરુપમં
તૃણીકુર્વન્ત્યેતે સુષમમપિ કામં સુમતયઃ ॥ ૫૯॥

અજ્ઞાનાન્તર્ગહનપતિતાનાત્મવિદ્યોપદેશૈ-
સ્ત્રાતું લોકાન્ભવદવશિખાતાપપાપચ્યમાનાન્ ।
મુક્ત્વા મૌનં વટવિટપિનો મૂલતો નિષ્પતન્તી
શમ્ભોર્મુર્તિશ્ચરતિ ભુવને શઙ્કરાચાર્યરૂપા ॥ ૬૦॥

ઉચ્ચણ્ડાહિતવાવદૂકકુહનાપાણ્ડિત્યવૈતણ્ડિકં
જાતે દેશિકશેખરે પદજુષાં સન્તાપચિન્તાપહે ।
કાતર્યં હૃદિ ભૂયસાઽકૃત પદં વૈભાષિકાદેઃ કથા-
ચાતુર્યં કલુષાત્મનો લયમગાદ્વૈશેષિકાદેરપિ ॥ ૬૧॥

અમુના ક્રતવઃ પ્રસાધિતાઃ ક્રતુવિભ્રંશકરઃ સ શઙ્કરઃ ।
ઇયમેવ ભિદાઽનયોર્જિતસ્મરયોઃ સર્વવિદોર્બુધેડ્યયોઃ ॥ ૬૨॥

કલયાઽપિ તુલાનુકારિણં કલયામો ન વયં જગત્ત્રયે ।
વિદુષાં સ્વસમો યદિ સ્વયં ભવિતા નેતિ વદન્તિ તત્ર કે ॥ ૬૩॥

ધ્રુવનાન્ત ઇવામરદ્રુમા અમરદ્રુષ્વિવ પુષ્પસઞ્ચયાઃ ।
ભ્રમરા ઇવ પુષ્પસઞ્ચયેષ્વતિસઙ્ખ્યાઃ કિલ શઙ્કરે ગુણાઃ ॥ ૬૪॥

કામં વસ્તુવિચારતોઽચ્છિનદયં પારુષ્યહિંસાક્રુધઃ
ક્ષાન્ત્યા દૈન્યપરિગ્રહાનૃતકથાલ્ભાંસ્તુ સન્તોષતઃ ।
માત્સર્યં ત્વનસૂયયા મદમહામાનૌ ચિરં ભાવિત -
સ્વાન્યોત્કર્ષગુણેન તૃપ્તિગુણતસ્તૃષ્ણાં પિશાચીમપિ ॥ ૬૫॥

કામં યસ્તુ સમૂલઘાતમવધાત્સ્વર્ગાપવર્ગાપહં
રોષં યઃ ખલુ ચૂર્ણપેષમપિષન્નિઃશેષદોષાવહમ્ ।
લોભાદીનપિ યઃ પરાંસ્તૃણસમુચ્છેદં સમુચ્ચિચ્છિદે
સ્વસ્યાન્તેવસતાં સતાં સ ભગવત્પાદઃ કથં વર્ણ્યતે ॥ ૬૬॥

કોઽમી કાન્ત દિવા નિશાકરકરા ધર્મસ્ય મર્મચ્છિદો
મુગ્ધે શમ્ભુનવાવતારસુગુરોરેતે ગુણાનાં ગણાઃ ।
કસ્માદુત્પલસન્તતિર્વિકસિતા વિસ્મેરદિગ્યોષિતા-
મેષાઽપાઙ્ગઝરીતિ દિગ્ગજવધૂપ્રશ્નોત્તરે રેજતુઃ ॥ ૬૭॥

નાક્ષ્ણા માક્ષિકમીક્ષિતં ક્ષણમપિ દ્રાક્ષા મુહુઃ શિક્ષિતા
ક્ષીરેક્ષૂ સમુપેક્ષિતૌ ભુવિ યયા સા શઙ્કરશ્રીગુરોઃ ।
કાન્તાનન્તદિગન્તલઙ્ઘનકલાજઙ્ઘાલતત્તદ્ગુણ-
શ્રેણી નિર્ભરમાધુરીમદધુરા ધન્યેતિ મન્યામહે ॥ ૬૮॥

ક્ષાન્તિશ્ચેદ્વસુધા જહાતુ મહતીં સર્વેસહત્વપ્રથાં
વિદ્યાશ્ચેદ્વિરહન્તુ ષણ્મુખમુખાઃ સ્વાખર્વગર્વાવલીમ્ ।
વૈરાગ્યં યદિ બાદરાયણિયશઃ કાર્શ્યં પરં ગાહતાં
કિં જલ્પૈર્મુનિશેખરસ્ય ન તુલાં કુત્રાપિ મન્યામહે ॥ ૬૯॥

યા મૂર્તિઃ ક્ષમયા મુનીશ્વરીમયી ગોત્રાસગોત્રાયતે
વિદ્યાભિર્નિરવદ્યકીર્તિભિરલં ભાષાવિભાષયતે । ૭૦॥

ભક્તાભીપ્સિતકલ્પનેન નિતરાં કલ્પાદિકલ્પાયતે
કસ્તાં નાન્યપૃથગ્જનૈસ્તુલયિતું મન્દાક્ષમન્દાયતે ॥ ૭૧॥

ન બભૂવ પુરાતનેષુ તત્સદૃશો નાદ્યતનેષુ દૃશ્યતે ।
ભવિતા કિમનાગતેષુ વા ન સુમેરોઃ સદૃશો યથા ગિરિઃ ॥ ૭૨॥

સમશોભત તેન તત્કુલં સ ચ શીલેન પરં વ્યરોચત ।
અપિ શીલમદીપિ વિદ્યયા હ્યપિ વિદ્યા વિનયેન દિદ્યુતે ॥ ૭૩॥

સુયશઃકુસુમોચ્ચયઃ શ્રયદ્વિબુધાલિર્ગુણપલ્લવોદ્ગમઃ ।

અવબોધફલઃ ક્ષમારસઃ સુરશાખીવ રરાજ સૂરિરાટ્ ॥ ૭૪॥

ન ચ શેષભવી ન કાપિલી ગણિતા કાણભુજી ન ગીરપિ ।
ફણિતિષ્વિતરાસુ કા કથા કવિરાજો ગિરિ ચાતુરીજુષિ ॥

ભટ્ટભાસ્કરવિમર્દદુર્દશામજ્જદાગમશિરઃકરગ્રહા ।
હન્ત શઙ્કરગુરોગિરઃ ક્ષરન્ત્યક્ષરં કિમપિ તદ્રસાયનમ્ ॥ ૭૫॥

જાટાટઙ્કજટાકુટીરવિહરન્નૈલિમ્પકલ્લોલિની-
 ક્ષોણીશપ્રિયકૃન્નવાવતરણાવષ્ટમ્ભગુમ્ફચ્છિદઃ ।
ગર્જન્તોઽવતરન્તિ શઙ્કરગુરુક્ષોણીધરેન્દ્રોદરા-
 દ્વાણીનિર્ઝરિણીઝરાઃ ક્વ નુ ભયં દુર્ભિક્ષુદુર્ભિક્ષતઃ ॥ ૭૬॥

વારી ચિત્તમતઙ્ગજસ્ય નગરી બોધાત્મનો ભૂપતે-
 ર્દૂરીભૂતદુરન્તદુર્વદઝરી હારીકૃતા સૂરિભિઃ ।
ચિન્તાસન્તતિતૂલવાતલહરી વેદોલ્લસચ્ચાતુરી
 સંસારાબ્ધિતરીરુદેતિ ભગવત્પાદીયવાગ્વૈખરી ॥ ૭૭॥

કથાદર્પ્સર્પત્કથકબુધકણ્ડૂલરસના-
 સનાલાધઃપાતે સ્વયમુદયમન્ત્રો વ્રતિપતેઃ ।
નિગુમ્ફઃ સૂક્તીનાં નિગમશિખરામ્ભોજસુરભિઃ
 જયત્યદ્વૈતશ્રીજયબિરુદઘણ્ટાઘણઘણઃ ॥ ૭૮॥

કસ્તૂરીઘનસારસૌરભપરીરમ્ભપ્રિયમ્ભાવુકા-
 સ્તાપોન્મેષમુષો નિશાકરકરાહઙ્કારકૂલઙ્કષાઃ ।
દ્રાક્ષામાક્ષિકશર્કરામધુરિમગ્રામાવિસંવાદિનો
 વ્યાહારા મુનિશેખરસ્ય ન કથઙ્કારં મુદં કુર્વતે ॥ ૭૯॥

અદ્વૈતે પરિમુક્તકણ્ટકપથે કૈવલ્યઘણ્ટાપથે
 સ્વાહમ્પૂર્વકદુર્વિકલ્પરહિતમાજ્ઞાધ્વનીનાકુલે ।
પ્રસ્કન્દન્મકરન્દવૃન્દકુસુમસ્રક્તોરણપ્રક્રિયા-
 માચાર્યસ્ય વિતન્વતે નવસુધાસિક્તાઃ સ્વયં સૂક્તયઃ ॥ ૮૦॥

દૂરોત્સારિતદુષ્ટપાંસુપટલીદુર્નીતયોઽનીતયો
 વાતા દેશિકવાઙ્મયાઃ શુભગુણગ્રામાલયા માલયાઃ ।
મુષ્ણન્તિ શ્રમમુલ્લસત્પરિમલશ્રીમેદુરા મે દુરા-
 યાસસ્યાઽઽધિહવિર્ભુજો ભવમયે ધીમાન્તરે પ્રાન્તરે ॥ ૮૧॥

નૃત્યન્ત્યા રસનાગ્રસીમનિ ગિરાં દેવ્યાઃ કિમઙ્ઘ્રિક્વણ-
મ્મઞ્જીરોર્જિતસિઞ્ચિતાન્યુત નિતમ્બાલમ્બિકાઞ્ચીરવાઃ ।
કિં વલગત્કરપદ્મકઙ્કણઝણત્કારા ઇતિ શ્રીમતઃ
શઙ્કામઙ્કુરયન્તિ શઙ્કરકવેઃ સદ્યુક્તયઃ સૂક્તયઃ ॥ ૮૨ ॥

વર્ષારમ્ભવિજૃમ્ભમાણજલમુગ્ગમ્ભીરઘોષોપમો
વાત્યાતૂર્ણવિઘૂર્ણદર્ણવપયઃકલ્લોલદર્પાપહઃ ।
ઉન્મીલન્નવમલ્લિકાપરિમલાહન્તાનિહન્તા નિરા-
તઙ્કઃ શઙ્કરયોગિદેશિકગિરાં ગુમ્ફઃ સમુજ્જૃમ્ભતે ॥ ૮૩ ॥

હૃદ્યા પદ્યવિનાકૃતા પ્રશમિતાવિદ્યાઽમૃષોદ્યા સુધા-
સ્વાદ્યા માદ્યદરાતિચોદ્યભિદુરાઽભેદ્યા નિષદ્યાયિતા ।
વિદ્યાનામનઘોદ્યમા સુચરિતા સાદ્યાપદુદ્યાપિની
પદ્યા મુક્તિપદસ્ય સાઽદ્ય મુનિવાઙ્નુદ્યાદનાદ્યા રુજઃ ॥ ૮૪ ॥

આયાસસ્ય નવાઙ્કુરં ઘનમનસ્તાપસ્ય બીજં નિજં
ક્લેશાનામપિ પૂર્વરઙ્ગમલઘુપ્રસ્તાવનાડિણ્ડિમમ્ ।
દોષાણામતૃતસ્ય કાર્મણમસ ચિન્તાતતે નિષ્કુટં
દેહાદૌ મુનિશેખરોક્તિરતુલાઽહઙ્કારમુસ્કૃન્તતિ ॥ ૮૫ ॥

તથાગતપથાહતક્ષપણકપ્રથાલક્ષણ-
પ્રતારણહતાનુવર્ત્યખિલજીવસઞ્જીવની ।
હરત્યતિદુરત્યયં ભવભયં ગુરૂક્તિર્નૃણા-
મનાધુનિકભારતીજરઠશુક્તિમુક્તામણિઃ ॥ ૮૬ ॥

ઝઞ્ઝામારુતવેલ્લિતામરધુનીકલ્લોલકોલાહલ-
પ્રાગ્ભારૈકસગર્ભ્યનિર્ભરજરીજમ્ભદ્વચોનિર્ઝરાઃ ।
નૈકાલીકમતાલિધૂલિપટલીમર્મચ્છિદઃ સદ્રૂરો-
રુધ્યદ્દૂર્મતિઘમદુર્મતિકૃતાશાન્તિં નિકૃન્તન્તિ નઃ ॥ ૮૭ ॥

ઉન્મીલન્નવમલ્લિસૌરભપરીરમ્ભપ્રિયમ્ભાવુકાઃ
મન્દારદ્રુમરન્દબૃન્દવિલુઠન્માધુર્યધુર્યા ગિરઃ ।
ઉદ્ગીર્ણા ગુરુણા વિપારકરુણાવારાકરેણાઽઽદરાત્
સચ્ચેતો રમયન્તિ હન્ત મદયન્ત્યામોદયન્તિ દ્રુતમ્ ॥ ૮૮ ॥

ધારાવાહિસુખાનુભૂતિમુનિવાગ્ધરાસુધારાશિષુ
ક્રીડન્દ્વૈતિવચઃસુકઃ પુનરનુકીડેત મૃડેતરઃ ।

ચિત્રં કાઞ્ચનમમ્બરં પરિદધચ્ચિત્તે વિધત્તે મુહુઃ
 કઞ્ચિત્કચ્ચરદુષ્પટચ્ચરજરત્કન્થાનુબદ્ધાદરમ્ ॥ ૮૯॥

તત્તાદૃક્ષમુનિક્ષપાકરવચઃ શિક્ષાસપક્ષાશયઃ
 ક્ષારં ક્ષીરમુદીક્ષતે બુધજનો ન ક્ષૌદ્રમાકાઙ્ક્ષતિ ।
રૂક્ષાં ક્ષેપયતિ ક્ષિતૌ ખલુ સિતાં નેક્ષું ક્ષણં પ્રેક્ષતે
 દ્રાક્ષાં નાપિ દિદૃક્ષતે ન કદલીં ક્ષુદ્રાં જિઘૃક્ષત્યલમ્ ॥ ૯૦॥

વિક્રીતા મધુના નિજા મધુરતા દત્તા મુદા દ્રાક્ષયા
 ક્ષીરૈઃ પાત્રધિયાઽર્પિતા યુધિ જિતાલ્લુબ્ધા બલાદિક્ષુતઃ ।
ન્યસ્તા ચોરભયેન હન્ત સુધયા યસ્માદતસ્તદ્ગિરાં
 માધુર્યસ્ય સમૃદ્ધિરદ્ભુતતરા નાન્યત્ર સા વીક્ષ્યતે ॥ ૯૧॥

કર્પૂરેણ ઋણીકૃતં મૃગમદેનાધીત્ય સમ્પાદિતં
 મલ્લીભિશ્ચિરસેવનાદુપગતં ક્રીતં તુ કાશ્મીરજૈઃ ।
પ્રાપ્તં ચૌરતયા પટીરતરુણા યત્સૌરભં તદ્ગિરા-
 મક્ષય્યં મહિ તસ્ય તસ્ય મહિમા ધન્યોઽયમન્યાદૃશઃ ॥ ૯૨॥

અપ્સાં દ્રપ્સં સુલિપ્સં ચિરતરમચરં ક્ષીરમદ્રાક્ષમિક્ષું
 સાક્ષાદ્રાક્ષામચક્ષં મધુરસમધયં પ્રાગવિન્દં મરન્દમ્ ।
મોચામાચામમન્યો મધુરિમગિરમા શઙ્કરાચાર્યવાચા-
 માચાન્તો હન્ત કિં તૈરલમપિ સુધાસારસીસારસીમ્ના ॥ ૯૩॥

સન્તપ્તાનાં ભવદવથુભિઃ સ્ફારકર્પૂરદૃષ્ટિઃ
 મુક્તાયષ્ટિઃ પ્રકૃતિવિમલા મોક્ષલક્ષ્મીમૃગાક્ષ્યાઃ ।
અદ્વૈતાત્માનવધિકસુખાસારકાસારહંસી
 બુદ્ધેઃ શુદ્ધ્યૈ ભવતુ ભગવત્પાદદિવ્યોક્તિધારા ॥ ૯૪॥

આમ્નાયાન્તાલવલા વિમલતરસુરેશાદિસૂક્તામ્બુસિક્તા
 કૈવલ્યાશાપલાશા વિબુધજનમનઃસાલજાલાધિરૂઢા ।
તત્ત્વજ્ઞાનપ્રસૂના સ્ફુરદમૃતફલા સેવનીયા દ્વિજૈર્યા
 સા મે સોમાવતંસાવતરગુરુવચોવલ્લિરસ્તુ પ્રશસ્ત્યૈ ॥ ૯૫॥

નૃત્યદ્ભૂતેશવલ્ગન્મુકુટતટરટત્સ્વર્ધુનીસ્પર્ધિનીભિ-
 ર્વાગ્ભિર્નિર્ભિન્નકૂલોચ્ચલદમૃતસરઃસારિણીધોરણીભિઃ ।
ઉદ્વેલદ્વૈતવાદિસ્વમતપરિણતાહઙ્ક્રિયાહુઙ્ક્રિયાભિ-
 ર્ભાતિ શ્રીશઙ્કરાર્યઃ સતતમુપનિષદ્વાહિનીગાહિનીભિઃ ॥ ૯૬॥

સાહઙ્કારસુરાસુરાવલિકરાકૃષ્ટભ્રમન્મન્દર -
ક્ષુબ્ધક્ષીરપયોબ્ધિવીચિસચિવૈઃ સૂક્તૈઃ સુધાવર્ષણાત્ ।
જડ્ધાલૈર્ભવદાવપાવકશિખાજાલૈર્જટાલાત્મનાં
જન્તૂનાં જલદઃ કથં સ્તુતિગિરાં વૈદેશિકો દેશિકઃ ॥ ૯૭॥

કલશાબ્ધિકચાકચિક્ષમં ક્ષણદાધીશગદાગદિપ્રિયમ્ ।
રજતાદ્રિભુજાભુજિક્રિયં ચતુરં તસ્ય યશઃ સ્મ રાજતે ॥ ૯૮॥

પરિશુદ્ધકથાસુ નિર્જિતો યશસા તસ્ય કૃતાઙ્કુનઃ શશી ।
સ્વકલઙ્કુનિવૃત્તયેઽધુનાઽપ્યુદધૌ મજ્જતિ સેવતે શિવમ્ ॥ ૯૯॥

ધમ્મિલ્લે નવમલ્લિવલ્લિકુસુમસ્રક્કલ્પના શિલ્પિનો
ભદ્રશ્રીરસચિત્રચિત્રિતકૃતઃ કાન્તે લલાટાન્તરે ।
તારાવલ્યનુહારિહારલતિકાનિર્માણકર્માણુકાઃ
કણ્ઠે દિવસુદૃશાં મુનીશ્વરયશઃપૂરા નભઃ પૂરકાઃ ॥ ૧૦૦॥

ઉત્સઙ્ગેષુ દિગઙ્ગના નિદધતે તારાઃ કરાકર્ષિકાઃ
રાગાદ્ દ્યૌરવલમ્બ્ય ચુમ્બતિ વિયદ્ગઙ્ગા સમાલિઙ્ગતિ ।
લોકાલોકદરી પ્રસીદતિ ફણી શેષોઽસ્ય દત્તે રતિં
ત્રૈલોક્યે ગુરુરાજકીર્તિશશિનઃ સૌન્દર્યમત્યદ્ભુતમ્ ॥ ૧૦૧॥

સમ્પ્રાપ્તા મુનિશેખરસ્ય હરિતામન્તેષુ સાઙ્કાશિનં
કલ્લોલા યશસઃ શશાઙ્કુકિરાણાનાલક્ષ્ય સાંહાસિનમ્ ।
કુર્વન્તિ પ્રથયન્તિ દુર્મદસુધાવૈદગ્ધ્યસંલોપિનં
સમ્યગ્ ઘ્નન્તિ ચ વિશ્વજાડ્યધિકતમઃ સઙ્ઘાતસાઙ્ઘાતિનમ્ ॥ ૧૦૨॥

સોત્કણ્ઠાકુણ્ઠકણ્ઠીરવનખવરક્ષુણ્ણમત્તેભકુમ્ભ-
પ્રત્યગ્રોન્મુક્તમુક્તામણિગણસુષમાબદ્ધદોર્યુદ્ધલીલા ।
મન્થાદ્રિક્ષુબ્ધદુગ્ધાર્ણવનિકટસમુલ્લોલકલ્લાલમૈત્રી-
પાત્રીભૂતા પ્રભૂતા જયતિ યતિપતેઃ કીર્તિમાલા વિશાલા ॥ ૧૦૩॥

લોકાલોકદરિ પ્રસીદસિ ચિરાર્તિક શઙ્કરશ્રીગુરુ-
પ્રોદ્યત્કીર્તિનિશાકરં પ્રિયતમં સંશ્લિષ્ય સન્તુષ્યસિ ।
ત્વં ચાપ્યુત્પલિનિ પ્રહૃષ્યસિ ચિરાત્કસ્તત્ર હેતુસ્તયો-
રિત્થં પ્રશ્નગિરાં પરસ્પરમભૂત્સ્મેરત્વમેવોત્તરમ્ ॥ ૧૦૪॥

દુર્વારાખર્વગર્વાહિતબુધજનતાતુલવાતૂલવેગો
　　નિર્બાધાગાધબોધામૃતકિરણસમુન્મેષદુગ્ધામ્બુરાશિઃ ।
નિષ્પત્યૂહં પ્રસર્પદ્ભવદવદહનોદ્ભુતસન્તાપમેઘો
　　જાગર્તિ સ્ફીતકીર્તિર્જગતિ યતિપતિઃ શઙ્કરાચાર્યવર્યઃ ॥ ૧૦૫॥

ઇતિહાસપુરાણભારતસ્મૃતિશાસ્ત્રાણિ પુનઃપુનર્મુદા ।
વિબુધૈઃ સુબુધો વિલોકયન્સકલજ્ઞત્વપદં પ્રપેદિવાન્ ॥ ૧૦૬॥

સ પુનઃ પુનરૈક્ષતાદરાદ્વરવૈયાસિકશાન્તિવાક્તતીઃ ।
સમગાદુપશાન્તિસમ્ભવાં સકલજ્ઞત્વવદેવ શુદ્ધતામ્ ॥ ૧૦૭॥

અસત્પ્રપઞ્જશ્ચતુરાનનોઽપિ સન્નભોગયોગી પુરુષોત્તમોઽપિ સન્ ।
અનઙ્ગજેતાઽપ્યવિરૂપદર્શનો જયત્યપૂર્વ્ જગદદ્વયીગુરુઃ ॥ ૧૦૮॥

આલોક્યાનનપઙ્કજેન દધતં વાણીં સરોજાસનં
　　શશ્વત્સન્નિહિતક્ષમાશ્રિયમમું વિશ્વમ્ભરં પૂરુષમ્ ।
આર્યારાધિતકોમલાઙ્ઘ્રિકમલં કામદ્વિષં કોવિદાઃ
　　શઙ્કન્તે ભુવિ શઙ્કરં વ્રતિકુલાલઙ્કારમઙ્ગાગતાઃ ॥ ૧૦૯॥

એકસ્મિન્ પુરુષોત્તમે રતિમતીં સત્તામયોન્યુદ્ભવાં
　　માયાભિક્ષુહૃતામનેકપુરુષાસક્તિભ્રમાન્નિષ્ઠરામ્ ।
જિત્વા તાન્ બુધવૈરિણઃ પ્રિયતયા પ્રત્યાહરદ્યશ્ચિરા-
　　દાસ્તે તાપસકૈતવાત્ ત્રિજગતાં ત્રાતા સ નઃ શઙ્કરઃ ॥ ૧૧૦॥

ઇતિ શ્રીમાધવીયે તદાશુદ્ધાષ્ટમવૃત્તગઃ
સઙ્ક્ષેપશઙ્કરજયે ચતુર્થઃ સર્ગ આભવત્ ।

આદિતઃ શ્લોકાઃ ૩૮૪ ।

# શઙ્કરદિગ્વિજયમ્

## ॥ ૫. પઞ્ચમઃ સર્ગઃ સંન્યાસગ્રહણમ્ ॥

ઇતિ સપ્તમહાયનેઽખિલશ્રુતિપારઙ્ગતતાં ગતો વટુઃ ।
પરિવૃત્ય ગુરોઃ કુલાદ્ ગૃહે જનનીં પર્યચરન્મહાયશાઃ ॥ ૧॥

પરિચરઞ્જનનીં નિગમં પઠન્નપિ હુતાશરવીં સવનદ્વયમ્ ।
મનુવરૈર્નિયતં પરિપૂજયઞ્છિશુવર્તત સંસ્તરણિર્યથા ॥ ૨॥

શિશુમુદીક્ષ્ય યુવાઽપિ ન મન્યુમાન્ દિશતિ વૃદ્ધતમોઽપિ નિજાસનમ્ ।
અપિ કરોતિ જનઃ કરયોર્યુગં વશગતો વિહિતાઞ્જલિ તત્ક્ષણાત્ ॥ ૩॥

મૃદુ વચશ્ચરિતં કુશલાં મતિં વપુરનુત્તમમાસ્પદમોજસામ્ ।
સકલમેતદુદીક્ષ્ય સુતસ્ય સા સુખમવાપ નિરર્ગલમમ્બિકા ॥ ૪॥

જાતુ મન્દગમનાઽસ્ય હિ માતા સ્નાતુમમ્બુનિધિગાં પ્રતિયાતા ।
આતપોગ્રકિરણે રવિબિમ્બે સા તપઃકુશતનુર્વિલલમ્બે ॥ ૫॥

શઙ્કરસ્તદનુ શઙ્કિતચિત્તઃ પઙ્કજૈવિગતપઙ્કજલાર્દ્રૈઃ ।
વીજયન્નુપગતો ગતમોહાં તાં જનેન સદનં સહ નિન્યે ॥ ૬॥

સોઽથ નેતુમનવદ્યચરિત્રઃ સદ્મનોઽન્તિકમૃષીશ્વરપુત્રઃ ।
અસ્તવીજ્જલધિગાં કવિહૃદ્યૈર્વસ્તુતઃ સ્ફુરદલઙ્કૃતપદ્યૈઃ ॥ ૭॥

ઈહિતં તવ ભવિષ્યતિ કાલ્યે યો હિતં જગત ઇચ્છસિ બાલ્યે ।
ઇત્યવાપ્ય સ વરં તટિનીતઃ સત્યવાક્ સદનમાપ વિનીતઃ ॥ ૮॥

પ્રાતરેવ સમલોકત લોકઃ શીતવાતહૃતશીકરપૂતઃ ।
નૂતનામિવ ધુનીં પ્રવહન્તીં માધવસ્ય સમયા સદનં તામ્ ॥ ૯॥

એવમેનમતિમર્ત્યચરિત્રં સેવમાનજનદૈન્યલવિત્રમ્ ।
કેરલક્ષિતિપતિર્હિ દિદૃક્ષુઃ પ્રાહિણોત્સચિવમાદૃતભિક્ષુઃ ॥ ૧૦॥

સોઽપ્યતન્દ્રિતમભીરુપદાભિઃ પ્રાપ્ય તં યદનુ સદ્વિરદાભિઃ ।

ઉક્તિભિઃ સરસમઞ્જુપદાભિઃ શક્તિભૃત્સમમજિહ્નપદાભિઃ ॥ ૧૧॥

યસ્ય નૈવ સદૃશો ભુવિ બોદ્ધા દૃશ્યતે રણશિરઃસુ ચ યોદ્ધા ।
તસ્ય કેરલનૃપસ્ય નિયોગાદ્ દૃશ્યસે મમ ચ સત્કૃતિયોગાત્ ॥ ૧૨॥

રાજિતાભ્રવસનૈર્વિલસન્તઃ પૂજિતાઃ સદસિ યસ્ય વસન્તઃ ।
પણ્ડિતાઃ સરસવાદકથાભિઃ ખણ્ડિતાપરગિરોઽવિતથાભિઃ ॥ ૧૩॥

સોઽયમાજિજિતસર્વમહીપઃ સ્તૂયમાનચરણઃ કુલદીપઃ ।
પાદરેણુમવનં ભવભાજામાદરેણ તવ વિન્દતુ રાજા ॥ ૧૪॥

એષ સિન્ધુરપરો મદપૂર્ણો દોષગન્ધરહિતઃ પ્રવિતીર્ણઃ ।
અસ્તુ તેઽદ્ય રજસા પરિપૂતં વસ્તુતો નૃપગૃહં શુચિભૂતમ્ ॥ ૧૫॥

ઇત્યુદીર્ય પરિસાધિતદૌત્યં પ્રત્યુદીરિતસદુક્તિમમાત્યમ્ ।
અત્યુદારમૃષિભિઃ પરિશસ્તં પ્રત્યુવાચ વચનં ક્રમશસ્તમ્ ॥ ૧૬॥

ભૈક્ષમન્નમજિનં પરિધાનં રૂક્ષમેવ નિયમેન વિધાનમ્ ।
કર્મ દાતૃવર શાસ્તિ બટૂનાં શર્મદાયિનિગમાભિપટૂનામ્ ॥ ૧૭॥

કર્મ નૈજમપહાય કુભોગૈઃ કુર્મહેઽહ કિમુ કુમ્ભિપુરોગૈઃ ।
ઇચ્છયા સુખમમાત્ય યથેતં ગચ્છ નાથમસકૃત્કથયેત્થમ્ ॥ ૧૮॥

પ્રત્યુત ક્ષિતિભૃતાઽખિલવર્ણા વૃત્યુપાહરણતો વિગતર્ણાઃ ।
ધર્મવર્ત્મનિરતા રચનીયાઃ કર્મ વર્જ્યમિતિ નો વચનીયાઃ ॥ ૧૯॥

ઇત્યમુષ્ય વચનાદકલઙ્કઃ પ્રત્યગાત્પુનરમાત્યમૃગાઙ્કઃ ।
વૃત્તમસ્ય સ નિશમ્ય ધરાપઃ સત્તમસ્ય સવિધં સ્વયમાપ ॥ ૨૦॥

ભૂસુરાર્ભકવરૈઃ પરિવીતં ભાસુરોડુપગભસ્ત્યુપવીતમ્ ।
અચ્છજહ્નુસુતયા વિલસન્તં સુચ્છવિં નગમિવ દ્રુમવન્તમ્ ॥ ૨૧॥

ચર્મ કૃષ્ણહરિણસ્ય દધાનં કર્મ કૃત્સ્નમુચિતં વિદધાનમ્ ।
નૂતનામ્બુદનિભામ્બરવન્તં પૂતનારિસહજં તુલયન્તમ્ ॥ ૨૨॥

જાતરૂપરુચિમુઞ્જસુધામ્ના છાતરૂપકટિમદ્ભુતધામ્ના ।
નાકભૂજમિવ સત્કૃતિલબ્ધં પાકપીતલતિકાપરિરબ્ધમ્ ॥ ૨૩॥

સસ્મિતં મુનિવરસ્ય કુમારં વિસ્મિતો નૃપતિર્વહુવારં
સંવિધાય વિનતિં વરદાને તં વિધાતૃસદૃશં ભુવિ મેને ॥ ૨૪॥

તેન પૃષ્ટકુશલઃ ક્ષિતિપાલઃ સ્વેન સૃષ્ટમથ શાત્રવકાલઃ ।
હાટકાયુતસમર્પણપૂર્વં નાટકત્રયમવોચદપૂર્વમ્ ॥ ૨૫॥

તદ્રસાર્દ્રગુણરીતિવિશિષ્ટં ભદ્રસન્ધિરુચિરં સુકવીષ્ટમ્ ।
સઙ્ગ્રહેણ સ નિશમ્ય સુવાચં તં ગૃહાણ વરમિત્યમુમૂચે ॥ ૨૬॥

તાં નિતાન્તહૃદયઙ્ગમસારાં ગાં નિશમ્ય તુલિતામૃતધારામ્ ।
ભૂપતિઃ સ રચિતાઞ્જલિબન્ધઃ સ્વોપમં સુતમિયેષ સુસન્ધઃ ॥ ૨૭॥

નો હિતાય મમ હાટકમેતદ્દેહિ નસ્તુ ગૃહવાસિજનાય ।
ઈહિતં તવ ભવિષ્યતિ શીઘ્રં યાહિ પૂર્ણમનસેત્યવદત્તમ્ ॥ ૨૮॥

રાજવર્યકુલવૃદ્ધિનિમિત્તાં વ્યાજહાર રહસિશ્રુતિવિત્તામ્ ।
ઇષ્ટિમસ્ય સકલેષ્ટવિધાતુસ્તુષ્ટિમાપ હિ તથા ક્ષિતિનેતા ॥ ૨૯॥

સ વિશેષવિદા સભાજિતઃ કવિમુખ્યેન કલાભૃતાં વરઃ ।
અગમત્કૃતકૃત્યધીર્નિજાં નગરીમસ્ય ગુણાનુદીરયન્ ॥ ૩૦॥

બહવઃ શ્રુતિપારદૃશ્વનઃ કવયોઽધ્યૈષત શઙ્કરાદ્ગુરોઃ ।
મહતઃ સુમહાન્તિ દર્શનાન્યધિગન્તું ફણિરાજકૌશલીમ્ ॥ ૩૧॥

પઠિતં શ્રુતમાદરાત્પુનઃ પુનરાલોક્ય રહસ્યનૂનકમ્ ।
પ્રવિભજ્ય નિમજ્જતઃ સુખે સ વિધેયાન્ વિદધેતમાં સુધીઃ ॥ ૩૨॥

સર્વાર્થતત્ત્વવિદપિ પ્રકૃતોપચારૈઃ
    શાસ્ત્રોક્તભક્ત્યતિશયેન વિનીતશાલી ।
સન્તોષયન્ સ જનનીમનયત્કિયન્તિ
    સમ્માનિતો દ્વિજવરૈર્દિવસાનિ ધન્યઃ ॥ ૩૩॥

સા શઙ્કરસ્ય શરણં સ ચ તજ્જનન્યા
    અન્યોન્યયોગવિરહસ્ત્વનયોરસહ્યઃ ।
નો વોઢુમિચ્છતિ તથાઽપ્યમનુષ્યભાવાન્
    મેરું ગતઃ કિમપિ વાઞ્છતિ દુષ્પ્રદેશમ્ ॥ ૩૪॥

કૃતવિદ્યમમું ચિકીર્ષવઃ શ્રિતગાર્હસ્થ્યમથાપ્તબન્ધવઃ ।
અનુરૂપગુણામચિન્તયન્નનવદ્યેષુ કુલેષુ કન્યકામ્ ॥ ૩૫॥

અથ જાતુ દિદૃક્ષવઃ કલાવવતીર્ણં મુનયઃ પુરદ્વિષમ્ ।
ઉપમન્યુદધીચિગૌતમત્રિતલાગસ્ત્યમુખાઃ સમાયયુઃ ॥ ૩૬॥

પ્રણિપત્ય સ ભક્તિસન્નતઃ પ્રસવિત્ર્યા સહ તાન્વિધાનવિત્ ।
વિધિવન્મધુપર્કપૂર્વયા પ્રતિજગ્રાહ સપર્યયા મુનીન્ ॥ ૩૭॥

વિહિતાઞ્જલિના વિપશ્ચિતા વિનયોક્ત્યાઽર્પિતવિષ્ટરા અમી ।
ઋષયઃ પરમાર્થસંશ્રયા અમુના સાકમચીકરન્ કથાઃ ॥ ૩૮॥

નિજગાદ કથાન્તરે મુનીઞ્જનની તસ્ય સમસ્તદર્શિનઃ ।
વયમદ્ય કૃતાર્થતાં ગતા ભગવન્તો યદુપાગતા ગૃહાન્ ॥ ૩૯॥

ક્વ કલિર્બહુદોષભાજનં ક્વ ચ યુષ્મચ્ચરણાવલોકનમ્ ।
તદલભ્યત ચેત્પુરાકૃતં સુકૃતં નઃ કિમિતિ પ્રપઞ્ચ્યતે ॥ ૪૦॥

શિશુરેષ કિલાતિશૈશવે યદશેષાગમપારગોઽભવત્ ।
મહિમાઽપિ યદદ્ભુતોઽસ્ય તદ્ દ્વયમેતત્કુરુતે કુતૂહલમ્ ॥ ૪૧॥

કરુણાર્દ્રદૃશાઽનુગૃહ્યતે સ્વયમાગત્ય ભવદ્ભિરપ્યયમ્ ।
વદતાસ્ય પુરાકૃતં તપઃ ક્ષમમાકર્ણયિતું મયા યદિ ॥ ૪૨॥

ઇતિ સાદરમીરિતાં તયા ગિરમાકર્ણ્ય મહર્ષિસંસદિ ।
પ્રતિવક્તુમભિપ્રચોદિતો ઘટજન્મા પ્રવયાઃ પ્રચક્રમે ॥ ૪૩॥

તનયાય પુરા પતિવ્રતે તત્ર પત્યા તપસા પ્રસાદિતઃ ।
સ્મિતપૂર્વમુપાદદે વચો રજનીવલ્લભખણ્ડમણ્ડનઃ ॥ ૪૪॥

વરયસ્વ શતાયુષઃ સુતાનપિ વા સર્વવિદં મિતાયુષમ્ ।
સુતમેકમિતીરિતઃ શિવં સતિ સર્વજ્ઞમયાચતાત્મજમ્ ॥ ૪૫॥

તદભીપ્સિતસિદ્ધયે શિવસ્તવ ભાગ્યાત્તનયો યશસ્વિનિ ।
સ્વયમેવ બભૂવ સર્વવિન્ન તતોઽન્યોઽસ્તિ યતઃ સુરેષ્વપિ ॥ ૪૬॥

ઇતિ તદ્વચનં નિશમ્ય સા મુનિવર્યં પુનરવ્યવોચત ।
કિયદાયુરનુષ્ય ભો મુને સકલજ્ઞોઽસ્યનુકમ્પયા વદ ॥ ૪૭॥

શરદોઽષ્ટ પુનસ્તથાઽષ્ટ તે તનયસ્યાસ્ય તથાઽપ્યસૌ પુનઃ ।
નિવસિષ્યતિ કારણાન્તરાદ્ભુવનેઽસ્મિન્ દશ ષટ્ ચ વત્સરાન્ ॥ ૪૮॥

ઇતિ વાદિનિ ભાવિનીં કથામૃષિમુખ્યે ઘટજે નિવાર્ય તમ્ ।
ઋષયઃ સહ તેન શઙ્કરં સમુપામન્ત્ર્ય યયુર્યથાગતમ્ ॥ ૪૯॥

સૃણિના કરિણીવ સાઽર્દિતા શુચિના શૈવલિનીવ શોષિતા ।
મરુતા કદલીવ કમ્પિતા મુનિવાચા સુતવત્સલાઽભવત્ ॥ ૫૦॥

અથ શોકપરીતચેતનાં દ્વિજરાડિત્થમુવાચ માતરમ્ ।
અવગમ્ય ચ સંસૃતિસ્થિતિં કિમકાણ્ડે પરિદેવના તવ ॥ ૫૧॥

પ્રબલાનિલવેગવેલ્લિતધ્વજચીનાંશુકકોટિચઞ્ચલે ।
અપિ મૂઢમતિઃ કલેબરે કુરુતે કઃ સ્થિરબુદ્ધિમમ્બિકે ॥ ૫૨॥

કતિ નામ સુતા ન લાલિતાઃ કતિ વા નેહ વધૂરભુઞ્જિ હિ ।
ક્વનુ તે ક્વચ તાઃ ક્વવા વયં ભવસઙ્ગઃ ખલુ પાન્થસઙ્ગમઃ ॥ ૫૩॥

ભ્રમતાં ભવવર્ત્મનિ ભ્રમાન્ન હિ કિઞ્ચિત્સુખમમ્બ લક્ષયે ।
તદવાપ્ય ચતુર્થમાશ્રમં પ્રયતિષ્યે ભવબન્ધમુક્તયે ॥ ૫૪॥

ઇતિ કર્ણકઠ્રભાષણશ્રવણાદ્બાષ્પપિનદ્ધકણ્ઠયા ।
દ્વિગુણીકૃતશોકયા તથા જગદે ગદ્ગદવાક્યયા મુનિઃ ॥ ૫૫॥

ત્યજ બુદ્ધિમિમાં શૃણુષ્વ મે ગૃહમેધી ભવ પુત્રમાપ્નુહિ ।
યજ ચ ક્રતુભિસ્તતો યતિર્ભવિતાસ્યઙ્ગ સતામયં ક્રમઃ ॥ ૫૬॥

કથમેકતનૂભવા ત્વયા રહિતા જીવિતુમુત્સહેઽબલા ।
અનયૈવ શુચૌર્ધ્વદૈહિકં પ્રમૃતાયાં મયિ કઃ કરિષ્યતિ ॥ ૫૭॥

ત્વમશેષવિદપ્યપાસ્ય માં જરઠાં વત્સ કથં ગમિષ્યસિ ।
દ્રવતે હૃદયં કથં ન તે ન કથઙ્કારમુપૈતિ વા દયામ્ ॥ ૫૮॥

એવં વ્યથાં તાં બહુધાઽઽશ્રયન્તીમપાસ્ત મોહૈર્બહુભિર્વચોભિઃ ।
અમ્બામશોકાં વ્યદધાદ્વિધિજ્ઞઃ શુદ્ધાષ્ટમેઽચિન્તયદેતદન્તઃ ॥ ૫૯॥

મમ ન માનસમિચ્છતિ સંસૃતિં ન ચ પુનર્જનની વિજિહાસતિ ।
ન ચ ગુરુર્જનની તદુદીક્ષતે તદનુશાસનમીષદપેક્ષિતમ્ ॥ ૬૦॥

ઇતિ વિચિન્ત્ય સ જાતુ મિમઙ્ક્ષયા બહુજલાં સરિતં સમુપાયયૌ ।
જલમગાહત તત્ર સમગ્રહીજ્જલચરશ્ચરણે જલમીયુષઃ ॥ ૬૧॥

સ ચ રુરોદ જલે જલચારિણા ધૃતપદો હ્રિયતેઽમ્બ કરોમિ કિમ્ ।
ચલિતુમેકપદં ન પારયે બલવતા વિવૃતોરુમુખેન હ ॥ ૬૨॥

ગૃહગતા જનની તદુપાશૃણોત્પરવશા દ્રુતમાપ સરિત્તટમ્ ।
મમ મૃતેઃ પ્રથમં શરણં ધવસ્તદનુ મે શરણં તનયોઽભવત્ ॥ ૬૩॥

સ ચ મરિષ્યતિ નક્રવશં ગતઃ શિવ ન મેઽજનિ હન્ત પુરા મૃતિઃ ।

ઇતિ શુશોચ જનન્યપિ તીરગા જલગતાત્મજવક્ત્રગતેક્ષણા ॥ ૬૪॥

ત્યજતિ નૂનમયં ચરણં ચલો જલચરોઽમ્બ તવાનુમતેન મે ।
સકલસંન્યસને પરિકલ્પિતે યદિ તવાનુમતિઃ પરિકલ્પયે ॥ ૬૫॥

ઇતિ શિશૌ ચકિતા વદતિ સ્ફુટં વ્યધિત સાઽનુમતિં દ્રુતમમ્બિકા ।
સતિ સુતે ભવિતા મમ દર્શનં મૃતવતસ્તદુ નેતિ વિનિશ્ચયઃ ॥ ૬૬॥

તદનુ સંન્યસનં મનસા વ્યધાદથ સુમોચ શિશું ખલનક્રકઃ ।
શિશુરુપેત્ય સરિત્તટમત્રસન્ પ્રસુવમેતદુવાચ શુચાઽઽવૃતામ્ ॥ ૬૭॥

માતર્વિધેયમનુશાધિ યદત્ર કાર્યં
    સંન્યાસિના તદુ કરોમિ ન સન્દિહેઽહમ્ ।
વસ્ત્રાશને તવ યથેષ્ટમમી પ્રદધુ-
    ર્ગૃહ્ણન્તિ યે ધનમિદં મમ પૈતૃકં યત્ ॥ ૬૮॥

દેહેઽમ્બ રોગવશગે ચ સનાભયોઽમી
    દ્રક્ષ્યન્તિ શક્તિમનુસૃત્ય મૃતિમસઙ્ગે ।
અર્થગ્રહાજ્જનભગાચ્ચ યથાવિધાનં
    કુર્યુશ્ચ સંસ્કૃતિમમી ન વિભેયમીષત્ ॥ ૬૯॥

યજ્જીવિતં જલચરસ્ય મુખાત્તદિષ્ટં
    સંન્યાસસઙ્ગરવશાન્મમ દેહપાતે ।
સંસ્કારમેત્ય વિધિવત્ શઙ્કર ત્વં
    નો ચેત્પ્રસૂય મમ કિં ફલમીરય ત્વમ્ ॥ ૭૦॥

અહ્ન્યમ્બ રાત્રિસમયે સમયાન્તરે વા
    સઞ્ચિન્તય સ્વવશગાઽવશગાઽથવા મામ્ ।
એષ્યામિ તત્ર સમયં સકલં વિહાય
    વિશ્વાસમાપ્નુહિ મૃતાવપિ સંસ્કરિષ્યે ॥ ૭૧॥

સંન્યસ્ત વાઞ્છિશુરયં વિધવામનાથાં
    ક્ષિપ્ત્વેતિ માં પ્રતિ કદાઽપિ ન ચિન્તનીયમ્ ।
યાવન્મયા સ્થિતવતા ફલમાપનીયં
    માતસ્તતઃ શતગુણં ફલમાપયિષ્યે ॥ ૭૨॥

ઇત્થં સ્વમાતરમનુગ્રહણેચ્છુરુક્ત્વા
    પ્રોચે સનાભિજનમેષ વિચક્ષણાગ્ર્યઃ ।

સંન્યાસકલ્પિતમના વ્રજિતોઽસ્મિ દૂરં
	તાં નિક્ષિપામિ જનનીમધવાં ભવત્સુ ॥ ૭૩॥

એવં સનાભિજનમુત્તમમુત્તમાગ્ર્યઃ
	શ્રીમાતૃકાર્યમભિભાષ્ય કરદ્વયેન ।
સમ્પ્રાર્થયન્ સ્વજનનીં વિનયેન તેષુ
	ન્યક્ષેપયન્નયનજામ્બુ નિષિઞ્ચમાનામ્ ॥ ૭૪॥

આત્મીયમન્દિરસમીપગતામથાસૌ
	ચક્રે વિદૂરગનદીં જનનીહિતાય ।
તત્તીરસંશ્રિતયદૂદ્વહધામ કિઞ્ચિ-
	ત્સા નિમ્નગાऽऽરભત તાડયિતું તરઙ્ગૈઃ ॥ ૭૫॥

વર્ષાસુ વર્ષતિ હરૌ જલમેત્ય કિઞ્ચિ-
	દન્તઃપુરં ભગવતોઽપનુનોદ મૃત્સ્નામ્ ।
આરબ્ધ મૂર્તિરનઘા ચલિતું ક્રમેણ
	દેવોઽબિભેદિવ ન મુઞ્ચતિ ભીરુહિંસામ્ ॥ ૭૬॥

પ્રસ્થાતુકામમનઘં ભગવાનનઙ્ગ-
	વાચાऽવદત્કથમપિ પ્રણિપત્ય માતુઃ ।
પાદારવિન્દયુગલં પરિગૃહ્ય ચાજ્ઞાં
	શ્રીશઙ્કરં જનહિતૈકરસં સ કૃષ્ણઃ ॥ ૭૭॥

આનેષ્ટ દૂરગનદીં કૃપયા ભવાન્ યાં
	સા માऽતિમાત્રમનિશં બહુલોર્મિહસ્તૈઃ ।
ક્લિશ્નાતિ તાડનપરા વદ કોऽભ્યુપાયો
	વસ્તું ક્ષમે ન નિતરાં દ્વિજપુત્ર યાસિ ॥ ૭૮॥

આકર્ણ્ય વાચમિતિ તામતનું ગુરુર્નઃ
	પ્રોદ્ધૃત્ય કૃષ્ણમચલં શનકૈર્ભુજાભ્યામ્ ।
પ્રાતિષ્ઠિપન્નિકટ એવ ન યત્ર બાધા
	નદ્યેત્યુદીર્ય સુખમાસ્સ્વ ચિરાય ચેતિ ॥ ૭૯॥

તસ્માત્સ્વમાતુરપિ ભક્તિવશાદનુજ્ઞા-
	માદાય સંસૃતિમહાબ્ધિવિરક્તિમાન્ સઃ ।
ગન્તું મનો વ્યધિત સંન્યસનાય દૂરં
	કિં નૌસ્થિતઃ પતિતુમિચ્છતિ વારિરાશૌ ॥ ૮૦॥

ઇત્થં સુધીઃ સ નિરવગ્રહમાતૃલક્ષ્મી-
　　શાનુગ્રહો ઘટજબોધિતભાવિવેદી ।
એકાન્તતો વિગતભોગપદાર્થતૃષ્ણઃ
　　કૃષ્ણે પ્રતીચિ નિરતો નિરગાન્નિશાન્તાત્ ॥ ૮૧॥

યસ્ય ત્રિનેત્રાપરવિગ્રહસ્ય કામેન નાસ્થીયત દૃક્પથેઽપિ ।
તન્મૂલકઃ સંસૃતિપાશબન્ધઃ કથં પ્રસજ્યેત મહાનુભાવે ॥ ૮૨॥

સ્મરેણ કિલ મોહિતૌ વિધિવિધૂ ચ જાતૂત્પથૌ
　　તથાઽહમપિ મોહિનીકુચકચાદિવીક્ષાપરઃ ।
અગામહહ મોહિનીમિતિ વિમૃશ્ય સોઽજાગરીત્
　　યતીશવપુષા શિવઃ સ્મરકૃતાર્તિવાર્તોજ્ઝિતઃ ॥ ૮૩॥

નિષ્પત્રાકુરુતાસુરાનપિ સુરાન્ મારઃ સપત્રાઽકરો-
　　દપ્યન્યાનિહ નિષ્કુલાઽકૃતતરાં ગન્ધર્વવિદ્યાધરાન્ ।
યો ધાનુષ્કવરો નરાનનલસાત્કૃત્વોદલાસીદલં
　　યસ્તસ્મિન્નશુશૂરતૈષ મુનિભિર્વર્ણ્યઃ કથં શઙ્કરઃ ॥ ૮૪॥

શાન્તિશ્ચાવશયન્મનો ગતિમુખા દાન્તિર્ન્યરુદ્ધ ક્રિયાઃ
　　આધાત્તા વિષયાન્તરાદુપરતિઃ ક્ષાન્તિર્મૃદુત્વં વ્યધાત્ ।
ધ્યાનૈકોત્સુકતાં સમાધિવિતતિશ્ચક્રે તથાઽઽસ પ્રિયા
　　શ્રદ્ધા હન્ત વસુપ્રથાઽસ્ય તુ કુતો વૈરાગ્યતો વેદ્મિ નો ॥ ૮૫॥

વિજનતાવનિતાપરિતોષિતો વિધિવિતીર્ણકૃતાત્મતનુસ્થિતિઃ ।
પરિહરન્ મમતાં ગૃહગોચરાં હૃદયગેન શિવેન સમં યયૌ ॥ ૮૬॥

ગચ્છન્વનાનિ સરિતો નગરાણિ શૈલાન્
　　ગ્રામાઞ્જનાનપિ પશૂન પથિ સોઽપિ પશ્યન્ ।
નન્વૈન્દ્રજાલિક ઇવાદ્ભુતમિન્દ્રજાલં
　　બ્રહ્મૈવમેવ પરિદર્શયતીતિ મેને ॥ ૮૭॥

વાદિભિર્નિજનિજાધ્વકર્શિતાં વર્તયન્ પથિ જરદ્ગવીં નિજે ।
દણ્ડમેકમવહજ્જગદ્ગુરુર્દણ્ડિતાખિલકદધ્વમણ્ડલઃ ॥ ૮૮॥

સારઙ્ગા ઇવ વિશ્વકદ્રુભિરહઙ્કુર્વદ્ભિરુચ્છૃઙ્ખલૈ-
　　ર્જલ્પાકૈઃ પરમર્મભેદનકલાકણ્ડૂલજિહ્વાઞ્ચલૈઃ ।

પાખણ્ડૈરિહ કાન્દિશીકમનસઃ કં નાપ્નુયુર્વૈદિકાઃ
ક્લેશં દણ્ડધરો યદિ સ્મ ન મુનિસ્ત્રાતા જગદ્દેશિકઃ ॥ ૮૯॥

દણ્ડાન્વિતેન ધૃતરાગનવામ્બરેણ ગોવિન્દનાથવનમિન્દુભવાતટસ્થમ્ ।
તેન પ્રવિષ્ટમજનિષ્ટ દિનાવસાને
ચણ્ડત્વિષા ચ શિખરં ચરમાચલસ્ય ॥ ૯૦॥

તીરદ્રુમાગતમરુદ્ધિગતશ્રમઃ સન્
ગોવિન્દનાથવનમધ્યતલં લુલોકે ।
શંસન્તિ યત્ર તરવો વસતિં મુનીનાં
શાખાભિરુજ્જ્વલમૃગાજિનવલ્કલાભિઃ ॥ ૯૧॥

આદેશમેકમનુયોક્તુમયં વ્યવસ્યન્
પ્રાદેશમાત્રવિવરપ્રતિહારભાજમ્ ।
તત્ર સ્થિતેન કથિતાં યમિનાં ગણેન
ગોવિન્દદેશિકગુહાં કુતુકી દદર્શ ॥ ૯૨॥

યસ્ય પ્રપન્નપરિતોષદુહો ગુહાયાઃ
સ ત્રિઃ પ્રદક્ષિણપરિક્રમણં વિધાય ।
દ્વારં પ્રતિ પ્રણિપતઞ્જનતાપુરોગં
તુષ્ટાવ તુષ્ટહૃદયસ્તમપાસ્તશોકમ્ ॥ ૯૩॥

પર્યઙ્કતાં ભજતિ યઃ પતગેન્દ્રકેતોઃ
પાદાઙ્ગદત્વમથવા પરમેશ્વરસ્ય ।
તસ્યૈવ મૂર્ધ્નિ ધૃતસાબ્ધિમહીધ્રભૂમેઃ
શેષસ્ય વિગ્રહમશેષમહં ભજે ત્વામ્ ॥ ૯૪॥

દૃષ્ટ્વા પુરા નિજસહસ્રમુખીમભૈષુ-
રન્તેવસન્ત ઇતિ તામપહાય શાન્તઃ ।
એકાનનેન ભુવિ યસ્ત્વવતીર્ય શિષ્યા-
નન્વગ્રહીન્નનુ સ એવ પતઞ્જલિસ્ત્વમ્ ॥ ૯૫॥

ઉરગપતિમુખાદધીત્ય સાક્ષાત્સ્વયમવનેર્વિવરં પ્રવિશ્ય યેન ।
પ્રકટિતમચલાતલે સયોગં જગદુપકારપરેણ શબ્દભાષ્યમ્ ॥ ૯૬॥

તમખિલગુણપૂર્ણં વ્યાસપુત્રસ્ય શિષ્યા-
દધિગતપરમાર્થં ગૌડપાદાન્મહર્ષેઃ ।

અધિજિગમિષુરેષ બ્રહ્મસંસ્થામહં ત્વાં
    પ્રસૃમરમહિમાનં પ્રાપમેકાન્તભક્ત્યા ॥ ૯૭॥

તસ્મિન્નિતિ સ્તુવતિ કસ્ત્વમિતિ બ્રુવન્તં
    દિષ્ટ્યા સમાધિપદરુદ્ધવિસૃષ્ટચિત્તમ્ ।
ગોવિન્દદેશિકમુવાચ તતો વચોભિઃ
    પ્રાચીનપુણ્યજનિતાત્મવિબોધચિહ્નૈઃ ॥ ૯૮॥

સ્વામિન્નહં ન પૃથિવી ન જલં ન તેજો
    ન સ્પર્શનો ન ગગનં ન ચ તદ્ગુણા વા ।
નાપીન્દ્રિયાણ્યપિ તુ વિદ્ધિ તતોઽવશિષ્ટો
    યઃ કેવલોઽસ્તિ પરમઃ સ શિવોઽહમસ્મિ ॥ ૯૯॥

આકર્ણ્ય શઙ્કરમુનેર્વચનં તદિત્થ-
    મદ્વૈતદર્શનસમુત્થમુપાત્તહર્ષઃ ।
સ પ્રાહ શઙ્કર સ શઙ્કર એવ સાક્ષા-
    જ્જાતસ્ત્વમિત્યહમવૈમિ સમાધિદૃષ્ટ્યા ॥ ૧૦૦॥

તસ્યોપદર્શિતવતશ્ચરણૌ ગુહાયા
    દ્વારે ન્યપૂજયદુપેત્ય સ શઙ્કરાર્યઃ ।
આચાર ઇત્યુપદિદેશ સ તત્ર તસ્મૈ
    ગોવિન્દપાદગુરવે સ ગુરુર્મુનીનામ્ ॥ ૧૦૧॥

શઙ્કરઃ સવિનયૈરુપચારૈરભ્યતોષયદસૌ ગુરુમેનમ્ ।
બ્રહ્મ તદ્વિદિતમપ્યુપલિપ્સુઃ સમ્પ્રદાયપરિપાલનબુદ્ધ્યા ॥ ૧૦૨॥

ભક્તિપૂર્વકૃતતત્પરિચર્યાતોષિતોઽધિકતરં યતિવર્યઃ ।
બ્રહ્મતામુપદિદેશ ચતુર્ભિર્વેદશેખરવચોભિરમુષ્મૈ ॥ ૧૦૩॥

સામ્પ્રદાયિકપરાશરપુત્રપ્રક્તસૂત્રમતગત્યનુરોધાત્ ।
શાસ્ત્રગૂઢહૃદયં હિ દયાલોઃ કૃત્સ્નમપ્યયમબુદ્ધ સુબુદ્ધિઃ ॥ ૧૦૪॥

વ્યાસઃ પરાશરસુતઃ કિલ સત્યવત્યાં
    તસ્યાત્મજઃ શકમુનિઃ પ્રથિતાનુભાવઃ ।
તચ્છિષ્યતામુપગતઃ કિલ ગૌડપાદો
    ગોવિન્દનાથમુનિરસ્ય ચ શિષ્યભૂતઃ ॥ ૧૦૫॥

શુશ્રાવ તસ્ય નિકટે કિલ શાસ્ત્રજાલં

યશ્ચાશ ૃણોદ્ભુજગસઘગતસ્ત્વનન્તાત્ ।
શબ્દામ્બુરાશિમખિલં સમયં વિધાય
યશ્ચાખિલાનિ ભુવનાનિ બિભર્તિ મૂર્ધ્ના ॥ ૧૦૬॥

સોઽધિગમ્ય ચરમાશ્રમમાર્યઃ પૂર્વપુણ્યનિચયૈરધિગમ્યમ્ ।
સ્થાનમર્ચ્યમપિ હંસપુરોગૈરુન્નતં ધ્રુવ ઇવૈત્ય ચકાશે ॥ ૧૦૭॥

છન્નમૂર્તિરતિપાટલશાટીપલ્લવેન રુરુચે યતિરાજઃ ।
વાસરોપરમરક્તપયોદાચ્છાદિતો હિમગિરેરિવ કૂટઃ ॥ ૧૦૮॥

એષ ધૂર્જટિરબોધમહેભં સન્નિહત્ય રુધિરાપ્લુતચર્મ ।
ઉદ્યદુષ્ણકિરણારુણશાટીપલ્લવસ્ય કપટેન બિભર્તિ ॥ ૧૦૯॥

શ્રુતીનામાક્રીડઃ પ્રથિતપરહંસોચિતગતિ-
ર્નિજે સત્યે ધામ્નિ ત્રિજગદતિવર્તિન્યભિરતઃ ।
અસૌ બ્રહ્મૈવાસ્મિન્ન ખલુ વિશયે કિન્તુ કલયે
બૃહેરર્થં સાક્ષાદનુપચરિતં કેવલતયા ॥ ૧૧૦॥

મિતં પાદેનૈવ ત્રિભુવનમિહૈકેન મહસા
વિશુદ્ધં યત્સત્વં સ્થિતિજનિલયેષ્વપ્યનુગતમ્ ।
દશાકારાતીતં સ્વમહિમનિ નિર્વેદરમણં
તતસ્તદ્વિષ્ણોઃ પરમપદમાખ્યાતિ નિગમઃ ॥ ૧૧૧॥

ન ભૂતેષ્વાસઙ્ગઃ ક્વચન ન ગવા વા વિહરણં
ન ભૂત્યા સંસર્ગો ન પરિચિતતા ભોગિભિરપિ ।
તદપ્યામ્નાયાન્તસ્ત્રિપુરદહનાત્કેવલદૃશા
તુરીયં નિર્દ્વન્દ્વં શિવમતિતરાં વર્ણયતિ તમ્ ॥ ૧૧૨॥

ન ધર્મઃ સૌવર્ણો ન પુરુષફલેષુ પ્રવણતા
ન ચૈવાહોરાત્રસ્ફુરદરિયુતઃ પાર્થિવરથઃ ।
અસાહાય્યેનૈવં સતિ વિતતપુર્યષ્ટકજયે*
(પુર્યષ્ટકં - ૧. જ્ઞાનેન્દ્રિયપઞ્ચકમ્, ૨. કર્મેન્દ્રિયપઞ્ચકં,
૩. પ્રાણપઞ્ચકમ્, ૪. અન્તઃકરણચતુષ્ટયમ્, ૫. અવિદ્યા,
૬. કામઃ, ૭. કર્મ, ૮. વાસના)
કથં તં ન બ્રૂયાન્નિગમનિકુરમ્બં પરશિવમ્ ॥ ૧૧૩॥

દુઃખાસારદુરન્તદુષ્કૃતઘનાં દુઃસંસૃતિપ્રાવૃષં

દુર્વારામિહ દારુણાં પરિહરન્દૂરાદુદારાશયઃ ।
ઉચ્ચણ્ડપ્રતિપક્ષપણ્ડિતયશોનાલીકનાલાઙ્કુર-
ગ્રાસો હંસકુલાવતંસપદભાક્ સન્માનસે ક્રીડતિ ॥ ૧૧૪॥

ક્ષીરં બ્રહ્મ જગચ્ચ નીરમુભયં તદ્યોગમભ્યાગતં
દુર્ભેદં ત્વિતરેતરં ચિરતરં સમ્યગ્વિભક્તીકૃતમ્ ।
યેનાશેષવિશેષદોષલહરીમાસેદુષીં શેમુષીં
સોઽયં શીલવતાં પુનાતિ પરમો હંસો દ્વિજાત્યગ્રણીઃ ॥ ૧૧૫॥

નીરક્ષીરનયેન તથ્યવિતથે સમ્પિણ્ડિતે પણ્ડિતૈ-
ર્દુર્બોધે સકલૈર્વિવેચયતિ યઃ શ્રીશઙ્કરાખ્યો મુનિઃ ।
હંસોઽયં પરમોઽસ્તુ યે પુનરિહાશક્તાઃ સમસ્તાઃ સ્થિતાઃ
જૃમ્ભાન્નિમ્બફલાશનૈકરસિકાન્ કાકાનમૂન્મન્મહે ॥ ૧૧૬॥

દૃષ્ટિં યઃ પ્રગુણીકરોતિ તમસા બાહ્યેન મન્દીકૃતાં
નાલીકપ્રિયતાં પ્રયાતિ ભજતે મિત્રત્વમવ્યાહતમ્ ।
વિશ્વસ્યોપકૃતેર્વિલુમ્પતિ સુહૃચ્ચક્રસ્ય ચાર્તિં ઘનાં
હંસઃ સોઽયમભિવ્યનક્તિ મહતાં જિજ્ઞાસ્યમર્થં મુહુઃ ॥ ૧૧૭॥

હંસભાવમધિગમ્ય સુધીન્દ્રે તં સમર્ચતિ ચ સંસૃતિમુક્ત્યૈ ।
સઞ્ચચાલ કથયન્નિવ મેઘશ્ચઞ્ચલાચપલતાં વિષયેષુ ॥ ૧૧૮॥

એષ નઃ સ્પૃશતિ નિષ્ઠુરપાદૈસ્તત્તુ તિષ્ઠતુ વિતીર્ણમવન્યૈ ।
અસ્મદીયમપિ પુષ્પમનૈષીદિત્યરોધિ નલિનીપતિરબ્દૈઃ ॥ ૧૧૯॥

વારિવાહનિવહે ક્ષણલક્ષ્યશ્રીરરોચત કિલાચિરરોચિઃ ।
અન્તરઙ્ગગતબોધકલેવ વ્યાપૃતસ્ય વિદુષો વિષયેષુ ॥ ૧૨૦॥

કિં નુ વિષ્ણુપદસંશ્રયતોઽબ્દા બ્રહ્મતામુપદિશન્તિ સુહૃદ્ભ્યઃ ।
યન્નિશમ્ય નિખિલાઃ સ્વનમેષાં બિભ્રતિ સ્મ કિલ નિર્ભરમોદાન્ ॥ ૧૨૧॥

દેવરાજમપિ માં ન યજન્તિ જ્ઞાનગર્વભરિતા યતયોઽમી ।
ઇત્યમર્ષવશગેન પયોદસ્યન્દનેન ધનુરાવિરકારિ ॥ ૧૨૨॥

આવવુઃ કુટજકન્દલબાણાસ્ફીતરેણુકલિતા વનવાત્યાઃ ।
સત્વમધ્યમતમોગુણમિશ્રા માયિકા ઇવ જગત્સુ વિલાસાઃ ॥ ૧૨૩॥

બભ્રુમુસ્તિમિરસચ્છવિગાત્રાશ્ચિત્રકાર્મુકભૃતઃ ખરઘોષાઃ ।
ધ્યાનયજ્ઞમથનાય યતીનાં વિદ્યુદુજ્જ્વલદૃશો ઘનદૈત્યાઃ ॥ ૧૨૪॥

ઉત્સસર્જુરસકૃજ્જલધારા વારિદા ગગનધામ પિધાય ।
શઙ્કરો હૃદયમાત્મનિ કૃત્વા સઞ્જહાર સકલેન્દ્રિયવૃત્તીઃ ॥ ૧૨૫॥

શનૈઃ સાન્ત્વાલાપૈઃ સનયમુપનીતોપનિષદાં
ચિરાયત્તં ત્યક્ત્વા સહજમભિમાનં દૃઢતરમ્ ।
તમેત્ય પ્રેયાંસં સપદિ પરહંસં પુનરસા-
વધીરા સંસ્પ્રષ્ટું ક્વનુ સપદિ તદ્ધીર્લયમગાત્ ॥ ૧૨૬॥

ન સૂર્યો નૈવેન્દુઃ સ્ફુરતિ ન ચ તારાતતિરિયં
કુતો વિદ્યુલ્લેખા કિયદિહ કૃશાનોર્વિલસિતમ્ ।
નો વિદ્ રોદસ્યૌ ન ચ સમયમસ્મિન્ન જલદે
ચિદાકાશે સાન્દ્રસ્વમુખરસવર્ષાણ્યવિરતમ્ ॥ ૧૨૭॥

કિમાદેયં હેયં કિમિતિ સહજાનન્દજલધા-
વતિસ્વચ્છે તુચ્છીકૃતસકલમાયે પરશિવે ।
તદેતસ્મિન્નેવ સ્વમહિમનિ વિસ્માપનપદે
સ્વતઃ સત્યે નિત્યે રહસિ પરમે સોઽકૃત કૃતી ॥ ૧૨૮॥

પ્રાપ વિષ્ણુપદભાગપિ મેઘઃ પ્રાવૃડાગમનતો મલિનત્વમ્ ।
વિદ્યુદુજ્જ્વલરુચાઽનુસૃતશ્ચ કોઽધ્યવન્યપિ ભજેન્ન વિરાગમ્ ॥ ૧૨૯॥

આશયે કલુષિતે સલિલાનાં માનસોત્કહૃદયાઃ કલહંસાઃ ।
કોઽન્યથા ભવતિ જીવનલિપ્સુર્નાશ્રયે ભજતિ માનસચિન્તામ્ ॥ ૧૩૦॥

અભ્રવર્ત્મનિ પરિભ્રમમિચ્છઞ્શુભ્રદીધિતિરદભ્રપયોદે ।
ન પ્રકાશનમવાપ કલાવાન્ કશ્ચકાસ્તિ મલિનામ્બરવાસી ॥ ૧૩૧॥

ચાતકાવલિરનલ્પપિપાસા પ્રાપ તૃપ્તિમુદકસ્ય ચિરાય ।
પ્રાપ્નુયાદમૃતમપ્યભિવાઞ્છન્ કાલતો બત ઘનાશ્રયકારી ॥ ૧૩૨॥

ઇત્યુદીર્ણજલવાહવિનીલે સ્ફીતવાતપરિધૂતતમાલે ।
પ્રાણભૃત્પ્રચરણપ્રતિકૂલે નીડનીલઘનશાલિનિ કાલે ॥ ૧૩૩॥

અગ્રહારશતસમ્ભૃતશોભે સુગ્રહાક્ષતુરગઃ સ મહાત્મા ।
અધ્યુવાસ તટમિન્દુભવાયાઃ સુધ્યુપાસ્યચરણં ગુરુમર્ચન્ ॥ ૧૩૪॥

ત્રસ્તમર્ત્યગણમસ્તમિતાશં હસ્તિહસ્તપૃથુલોદકધારાઃ ।
મુઞ્ચતિ સ્મ સમુદશ્ચિતવિદ્યુત્પઞ્ચરાત્રમહિશત્રુરજસ્રમ્ ॥ ૧૩૫॥

તીરભૂરુહતતીરપકર્ષન્નગ્રહારનિકરૈઃ સહ પૂરઃ ।
આયયાવધિકઘોષમનલ્પઃ કલ્પવાર્ધિલહરીવ તટિન્યાઃ ॥ ૧૩૬॥

ઘોષવારિઝરભીરુનરાણાં ઘોષમેષ કલુષં સ નિશમ્ય ।
દેશિકં ધ્રુવસમાધિવિધાનં વીક્ષ્ય ચ ક્ષણમભૂદવિવક્ષુઃ ॥ ૧૩૭॥

સોઽભિમન્ત્ર્ય કરકં ત્વરમાણસ્તત્પ્રવાહપુરતઃ પ્રણિધાય ।
કૃત્સ્નમત્ર સમવેશયદમ્ભઃ કુમ્ભસમ્ભવ ઇવ સ્વકરેઽબ્ધિમ્ ॥ ૧૩૮॥

તં નિશમ્ય નિખિલૈરપિ લોકૈરુત્થિતોઽસ્ય ગુરુરુક્તમુદન્તમ્ ।
યોગસિદ્ધિમચિરાદયમાપેત્યભ્યપદ્યતતરાં પરિતોષમ્ ॥ ૧૩૯॥

છાત્રમુખ્યમમુપાહ કિયદ્ભિર્વાસરૈર્ગતઘને ગગને સઃ ।
પશ્ય સૌમ્ય શરદા વિમલં ખં વિદ્યયેવ વિશદં પરતત્વમ્ ॥ ૧૪૦॥

વારિદા યતિવરાશ્ચ સુપાથોધારયા સદુપદેશગિરા ચ ।
ઓષધીરનુચરાંશ્ચ કૃતાર્થીકૃત્ય સમ્પ્રતિ હિ યાન્તિ યથેચ્છમ્ ॥ ૧૪૧॥

શીતદીધિતિરસૌ જલમુગ્ભિર્મુક્તપદ્ધતિરતિસ્ફુટકાન્તિઃ ।
ભાતિ તત્વવિદુષામિવ બોધો માયિકાવરણનિર્ગમશુભ્રઃ ॥ ૧૪૨॥

વારિવાહનિવહે પ્રતિયાતે ભાન્તિ ભાનિ શુચિભાનિ શુભાનિ ।
મત્સરાદિવિગમે સતિ (૧)મૈત્રીપૂર્વકા ઇવ ગુણાઃ પરિશુદ્ધાઃ ॥ ૧૪૩॥

(૧ “મૈત્રી કરુણામુદિતોપેક્ષાણાં સુખદુઃખપુણ્યાપુણ્યવિષયાણાં
ભાવનાતશ્ચિત્તપ્રસાદનમ્” ઇતિ પાતઞ્જલયોગસૂત્રમ્ ।)

મત્સ્યકચ્છપમયી ધૃતચક્રા ગર્ભવર્તિભુવના નલિનાઢ્યા ।
શ્રીયુતાઽદ્ય તટની પરહંસૈઃ સેવ્યતે મધુરિપોરિવ મૂર્તિઃ ॥ ૧૪૪॥

નીરદાઃ સુચિરસમ્ભૃતમેતે જીવનં દ્વિજગણાય વિતીર્ય ।
ત્યક્તવિદ્યુદબલાઃ પરિશુદ્ધાઃ પ્રવ્રજન્તિ ઘનવીથિગૃહેભ્યઃ ॥ ૧૪૫॥

ચન્દ્રિકાભસિતચર્ચિતગાત્રશ્ચન્દ્રમણ્ડલકમણ્ડલુશોભી ।
બન્ધુજીવકુસુમોત્કરશાટીસંવૃતો યતિરિવાયમનેહાઃ ॥ ૧૪૬॥

હંસસઙ્ગતિલસદ્વિરજસ્કં ક્ષોભવર્જિતમપહ્નુતપઙ્કમ્ ।
વારિ સારસમતીવ ગભીરં તાવકં મન ઇવ પ્રતિભાતિ ॥ ૧૪૭॥

શારદામ્બુધરજાલપરીતં ભ્રાજતે ગગનમુજ્જ્વલભાનુ ।

લિપ્તચન્દનરજઃ સમુદઞ્ચત્કૌસ્તુભં મુરરિપોરિવ વક્ષઃ ॥ ૧૪૮॥

પઙ્કજાનિ સમુદૂઢહરીણિ પ્રોદ્ગતાનિ વિકચાનિ કનન્તિ ।
સૌમ્ય યોગકલયેવ વિફુલ્લાન્યુન્મુખાનિ હૃદયાનિ મુનીનામ્ ॥ ૧૪૯॥

રેણુભસ્મકલિતૈર્દલશાટીસંવૃતૈઃ કુસુમલિઙ્જપમાલૈઃ ।
વૃન્તકુડ્મલકમણ્ડલુયુક્તૈર્ધાર્યતે ક્ષિતિરુહૈર્યતિતૌલ્યમ્ ॥ ૧૫૦॥

ધારણાદિભિરપિ શ્રવણાદ્યૈર્વાર્ષિકાણિ દિવસાન્યપનીય ।
પાદપદ્મરજસાઽદ્ય પુનન્તઃ સઞ્ચરન્તિ હિ જગન્તિ મહાન્તઃ ॥ ૧૫૧॥

તદ્ભવાન્ વ્રજતુ વેદકદમ્બાદુદ્ભવાં ભવદવામ્બુદમાલામ્ ।
તત્વપદ્ધતિમભિજ્ઞ વિવેક્તું સત્વરં હરપુરીમવિવિક્તામ્ ॥ ૧૫૨॥

અત્ર કૃષ્ણમુનિના કથિતં મે પુત્ર તચ્છૃણુ પુરા તુહિનાદ્રૌ ।
વૃત્રશત્રુમુખદૈવતજુષ્ટે સત્રમત્રિમુનિકર્તૃકમાસ ॥ ૧૫૩॥

સંસદિ શ્રુતિશિરોઽર્થમુદારં શંસતિ સ્મ પરાશરસૂનુઃ ।
ઇત્યપૃચ્છમહમત્રભવન્તં સત્યવાચમભિયુક્તતમં તમ્ ॥ ૧૫૪॥

આર્ય વેદનિકરઃ પ્રવિભક્તો ભારતં કૃતમકારિ પુરાણમ્ ।
યોગશાસ્ત્રાપિ સમ્યગભાષિ બ્રહ્મસૂત્રમપિ સૂત્રિતમાસીત્ ॥ ૧૫૫॥

અત્ર કેચિદિહ વિપ્રતિપન્નાઃ કલ્પયન્તિ હિ યથાયથમર્થાન્ ।
અન્યથાગ્રહણનિગ્રહદક્ષં ભાષ્યમસ્ય ભગવન્ કરણીયમ્ ॥ ૧૫૬॥

મદ્વચઃ સ ચ નિશમ્ય સભાયાં વિદ્વદગ્રસર વાચમવોચત્ ।
પૂર્વમેવ દિવિષદ્ભિરુદીર્ણઃ પાર્વતીપતિસદસ્યયમર્થઃ ॥ ૧૫૭॥

વત્સ તં શ◌ૃણુ સમસ્ત વિદેકો મત્સમસ્તવ ભવિષ્યતિ શિષ્યઃ ।
કુમ્ભ એવ સરિતઃ સકલં યઃ સંહરિષ્યતિ મહોલ્બણમમ્ભઃ ॥ ૧૫૮॥

દુર્મતાનિ નિરસિષ્યતિ સોઽયં શર્મદાયિ ચ કરિષ્યતિ ભાષ્યમ્ ।
કીર્તયિષ્યતિ યશસ્તવ લોકઃ કાર્તિકેન્દુકરકૌતુકિ યેન ॥ ૧૫૯॥

ઇત્યુદીર્ય મુનિરાટ્ સ વનાન્તે પત્યુરાપ સુગિરિં ગિરિજાયાઃ ।
તન્મુખાચ્છ્રુતમશેષમિદાનીં સન્મુનિપ્રિય મયા ત્વયિ દૃષ્ટમ્ ॥ ૧૬૦॥

સ ત્વમુત્તમપુમાનસિ કશ્ચિત્તત્ત્વવિત્પ્રવર નાન્યસમાનઃ ।
તદ્યતસ્વ નિરવદ્યનિબન્ધૈઃ સદ્ય એવ જગદુદ્ધરણાય ॥ ૧૬૧॥

ગચ્છ વત્સ નગરં શશિમૌલેઃ સ્વચ્છદેવતટિનીકમનીયમ્ ।
તાવતા પરમનુગ્રહમાદ્યા દેવતા તવ કરિષ્યતિ તસ્મિન્ ॥ ૧૬૨॥

એવમેનમનુશાસ્ય દયાલુઃ પાવયન્નિજદૃશા વિસસર્જ ।
ભાવતઃ સ્વચરણામ્બુજસેવામેવ શશ્વદભિકામયમાનમ્ ॥ ૧૬૩॥

પઙ્કજપ્રતિભટં પદયુગ્મં શઙ્કરોઽસ્ય નિરગાદસહિષ્ણુઃ ।
તદ્વિયોગમભિવન્દ્ય કથઞ્ચિત્તદ્વિલોકનમયન્ હૃદયાબ્જે ॥ ૧૬૪॥

પ્રાપ તાપસવરઃ સ હિ કાશીં નીપકાનનપરીતસમીપામ્ ।
આપગાનિકટહાટકચઞ્ચદ્ધૂપપઙ્ક્તિસમુદઞ્ચિતશોભામ્ ॥ ૧૬૫॥

સન્દદશ સ ભગીરથતપ્તામન્દતીવ્રતપસઃ ફલભૂતામ્ ।
યોગિરાડુચિતતીરનિકુઞ્જાં ભોગિભૂષણજટાતટભૂષામ્ ॥ ૧૬૬॥

વિષ્ણુપાદનખરાજ્જનનાઢ્ઢા શમ્ભુમૌલિશશિસઙ્ગમનાઢ્ઢા ।
યા હિમાદ્રિશિખરાત્પતનાઢ્ઢા સ્ફાટિકોપમજલા પ્રતિભાતિ ॥ ૧૬૭॥

ગાયતીવ કલષટ્પદનાદૈર્નૃત્યતીવ પવનોચ્ચલિતાબ્જૈઃ ।
મુઞ્ચતીવ હસિતં સિતફેનૈઃ શ્લિષ્યતીવ ચપલોર્મિકરૈર્યા ॥ ૧૬૮॥

શ્યામલા ક્વચિદપાઙ્ગમયૂખૈશ્ચિત્રિતા ક્વચન ભૂષણભાભિઃ ।
પાટલા કુચતટીગલિતૈર્યા કુઙ્કુમૈઃ ક્વચન દિવ્યવધૂનામ્ ॥ ૧૬૯॥

સોઽવગાહ્ય સલિલં સુરસિન્ધોરુત્તતાર શિતિકણ્ઠજટાભ્યઃ ।
જાહ્નવીસલિલવેગહૃતસ્તદ્યોગપુણ્યપરિપૂર્ણ ઇવેન્દુઃ ॥ ૧૭૦॥

સ્વર્ણદીજલકણાહિતશોભા મૂર્તિરસ્ય સુતરાં વિલલાસ ।
ચન્દ્રપાદગલદમ્બુકણાઙ્કા પુત્રિકા શશિશિલારચિતેવ ॥ ૧૭૧॥

વિશ્વેશશ્ચરણયુગં પ્રણમ્ય ભક્ત્યા
    હર્યાદ્યૈસ્ત્રિદશવરૈઃ સમર્ચિતસ્ય ।
સોઽનૈષીત્પ્રયતમના જગત્પવિત્રે
    ક્ષેત્રેઽસાવિહ સમયં કિયન્તમાર્યઃ ॥ ૧૭૨॥

ઇતિ શ્રીમાધવીયે તત્સુખાશ્રમનિવાસગઃ ।
સઙ્ક્ષેપશઙ્કરજયે સર્ગોઽયં પઞ્ચમોઽભવત્ ॥ ૫॥

આદિતઃ શ્લોકાઃ ૫૫૬ ।
Eન્ચોદેદ્ અન્દ્ પ્રૂફ઼્ર્ેઅદ્ બ્ય્ ઼ઇહન્ છેત્તૂર્

# શઙ્કરદિગ્વિજયમ્

## ॥ ૬. ષષ્ઠઃ સર્ગઃ આત્મવિદ્યાપ્રતિષ્ઠા ॥

અથ ષષ્ઠઃ સર્ગઃ ॥ ૬॥

અથાગમદ્બ્રાહ્મણસૂનુરાદરાદધીતવેદો દલયન્ સ્વભાસા ।
તેજાંસિ કશ્ચિત્સરસીરુહાક્ષો દિદૃક્ષમાણઃ કિલ દેશિકેન્દ્રમ્ ॥ ૧॥

આગત્ય દેશિકપદામ્બુજયોરપપ્તત્ સંસારવારિધિમનુત્તરમુત્તિતીર્ષુઃ ।
વૈરાગ્યવાનકૃતદારપરિગ્રહશ્ચ કારુણ્યનાવમધિરુહ્ય દૃઢાં દુરાપામ્ ॥ ૨॥

ઉત્થાપ્ય તં ગુરુરુવાચ ગુરુર્દ્વિજાનાં
    કસ્ત્વં ક્વ ધામ કુત આગત આત્તધૈર્યઃ ।
બાલોઽપ્યબાલધિષણઃ પ્રતિભાસિ મે ત્વ-
    મેકોઽપ્યનેક ઇવ નૈકશરીરભાવઃ ॥ ૩॥

પૃષ્ટો બભાણ ગુરુમુત્તરમુત્તરજ્ઞો
    વિપ્રો ગુરો મમ ગૃહં બુધ ચોલદેશે ।
યત્રાપગા વહતિ તત્ર કવેરકન્યા
    યસ્યાઃ પયો હરિપદામ્બુજભક્તિમૂલમ્ ॥ ૪॥

અટાટ્યમાનો મહતો દિદૃક્ષુઃ ક્રમાદિમં દેશમુપાગતોઽસ્મિ ।
બિભેમિ મજ્જન્ ભવવારિરાશૌ તત્પારગં માં કૃપયા વિધેહિ ॥ ૫॥

અપાઙ્ગૈરુત્તુઙ્ગૈરમૃતઝરભઙ્ગૈઃ પરગુરો
    શુચા દૂનં દીનં કલય દયયા મામવિમૃશન્ ।
ગુણં વા દોષં વા મમ કિમપિ સઞ્ચિન્તયસિ ચેત્
    તદા કૈવ શ્લાઘા નિરવધિકૃપાનીરધિરિતિ ॥ ૬॥

સ્યાત્તે દીનદયાલુતાકૃતયશોરાશિસ્ત્રિલોકીગુરો
    તૂર્ણં ચેદ્યસે મમાદ્ય ન તથા કારુણ્યતઃ શ્રીમતિ ।
વર્ષન્ ભૂરિ મરુસ્થલીષુ જલભૃત્સદ્ભિર્યથા પૂજ્યતે

નૈવં વર્ષશતં પયોનિધિજલે વર્ષન્નપિ સ્તૂયતે ॥ ૭॥

(૧)ત્વત્સારસ્વતસારસારસસુધાકૂપારસત્સારસ-
સ્રોતઃસમ્ભૃતસન્તતોજ્જ્વલજલક્રીડા મતિર્મે મુને ।
ચઞ્ચત્પઞ્ચશરાદિવઞ્ચનહતં ન્યઞ્ચં પ્રપઞ્ચં હિત-
જ્ઞાનાકિઞ્ચનમા વિરિઞ્ચમખિલં ચાલોચયન્ત્યઞ્ચતુ ॥ ૮॥

(૧ તવ સરસ્વત્યાઃ સારરૂપઃ સારસસુધાકૂપારઃ ચન્દ્રસમ્બન્ધી
અમૃતસમુદ્રસ્તસ્ય સતાં સારસાનાં પક્ષિણાં કમલાનાં વા સ્રોતોભિઃ
પ્રવાહૈઃ યત્ સમ્ભૃતં સમ્મિશ્રિતં સંશ્રિતં વા સન્તતમુજ્જ્વલં
જલં તસ્મિન્ ક્રીડા યસ્યાસ્તથા ભૂતા સતી મે મતિઃ -ઇતિ વ્યાખ્યા ॥ )
સૌરં ધામ સુધામરીચિનગરં પૌરન્દરં મન્દિરં
કૌબેરં શિબિરં હુતાશનપુરં સામીરસદ્મોત્તરમ્ ।
વૈધં ચાઽઽવસથં ત્વદીયફણિતિશ્રદ્ધાસમિદ્ધાત્મનઃ
શુદ્ધાદ્વૈતવિદો ન દોગ્ધિ કુતુકં વિરતિશ્રીધાતુકં કૌતુકમ્ ॥ ૯॥

ન ભૌમા રામાદ્યાઃ સુષમવિષવલ્લીફલસમાઃ
સમારમ્ભન્તે નઃ કિમપિ કુતુકં જાતુ વિષયાઃ ।
ન ગણ્યં નઃ પુણ્યં રુચિરતરરમ્ભાકુચતટી-
પરીરમ્ભારમ્ભોજ્જ્વલમપિ ચ પૌરન્દરપદમ્ ॥ ૧૦॥

ન ચઞ્ચદ્વૈરિઞ્ચં પદમપિ ભવેદાદરપદં
વચો ભવ્યં નવ્યં યદકૃત કૃતી શઙ્કરગુરુઃ ।
ચકોરાલીચઞ્ચૂપુટદલિતપૂર્ણેન્દુવિગલ-
ત્સુધાધારાકારં તદિહ વયમીહેમહિ મુહુઃ ॥ ૧૧॥

ધાવાભૂમિશિવઙ્કરૈર્નવયશઃપ્રસ્તાવસૌવસ્તિકૈઃ
પૂર્વારવર્વતપઃપચોલિમફલૈઃ સર્વાધિમુષ્ટિંધયૈઃ ।
દીનાઢ્યઙ્કરણૈર્ભવાય નિતરાં વૈરાયમાણૈરલં-
કર્મીણં પ્રસિતં ત્વદીયભજનૈઃ સ્યાન્મામકીનં મનઃ ॥ ૧૨॥

સંસારબન્ધામયદુઃખશાન્ત્યૈ સ એવ નસ્ત્વં ભગવાનુપાસ્યઃ ।
ભિષક્તમં ત્વાં ભિષજાં શ ૃણોમીત્યુક્તસ્ય યોઽભૂદુદિતાવતારઃ ॥ ૧૩॥

ઇત્યુક્તવન્તં કૃપયા મહાત્મા વ્યદીપયત્સંન્યસનં યથાવત્ ।
પ્રાહુર્મહાન્તઃ પ્રથમં વિનેયં તં દેશિકેન્દ્રસ્ય સનન્દનાખ્યમ્ ॥ ૧૪॥

સંસારઘોરજલધેસ્તરણાય શશ્વત્સાંયાત્રિકીભવનમર્દયમાનમેનમ્ ।
હન્તોત્તમાશ્રમતરીમધિરોપ્ય પારં નિન્યે નિપાતિતકૃપારસકેનિપાતઃ ॥ ૧૫॥

યેઽપ્યન્યેઽમું સેવિતું દેવતાંશા યાતાસ્તેઽપિ પ્રાય એવં વિરક્તાઃ ।
ક્ષેત્રે તસ્મિન્નેવ શિષ્યત્વમસ્ય પ્રાપુઃ સ્પષ્ટં લોકરીત્યાઽપિ ગન્તુમ્ ॥ ૧૬॥

વ્યાખ્યા મૌનમનુત્તરાઃ પરિદલચ્છઙ્કાકલઙ્કુરા-
શ્છાત્રા વિશ્વપવિત્રચિત્રચારિતાસ્તે વામદેવાદયઃ ।
તસ્યૈતસ્ય વિનીતલોકતુતિમુદ્ધર્તું ધરિત્રીતલં
પ્રાપ્તસ્યાદ્ય વિનેયતામુપગતા ધન્યાઃ કિલાન્યાદૃશાઃ ॥ ૧૭॥

શેષઃ સાધુભિરેવ તોષયતિ નૄચ્છબ્દૈઃ પુમર્થાર્થિનો
વાલ્મીકિઃ કવિરાજ એષ વિતથૈરર્થૈર્મુહુઃ કલ્પિતૈઃ ।
વ્યાચષ્ટે કિલ દીર્ઘસૂત્રસરણિર્વાચં ચિરાદર્શદાં
વ્યાસઃ શઙ્કરદેશિકસ્તુ કુરુતે સદ્યઃ કૃતાર્થાનહો ॥ ૧૮॥

ચક્રિતુલ્યમહિમાનમુપાસાઞ્ચક્રિરે તમવિમુક્તનિવાસાઃ ।
વક્રસૃત્યનુસૃતામપિ સાધ્વીં ચક્રુરાત્મધિષણાં તદુપાસ્ત્યા ॥ ૧૯॥

ચણ્ડભાનુરિવ ભાનુમણ્ડલૈઃ પારિજાત ઇવ પુષ્પજાતતઃ ।
વૃત્રશત્રુરિવ નેત્રવારિજૈશ્છાત્રપઙ્ક્તિભિરલં લલાસ સઃ ॥ ૨૦॥

એકદા ખલુ વિયત્ત્રિપુરદ્વિડ્ભાલલોચનહુતાશનભાનોઃ
વિસ્ફુલિઙ્ગપદવીં દધતીષુ પ્રજ્જ્વલત્તપનકાન્તિશિલાસુ ॥ ૨૧॥

દર્શયત્પુરુમરીચિસરસ્વત્પૂરસૃજ્યવરમાયિનિ* ભાનૌ ।
(*પરમાયિનિ -લોકવિલક્ષણૈન્દ્રજાલિકે -ઇતિ વ્યાખ્યા ॥ )
સાધુનૈકમણિ કુટ્ટિમમૂર્ચ્છદ્રશ્મિજાલકશિખાવલપિચ્છમ્ ॥ ૨૨॥

પઙ્કજાવલિવિલીનમરાલે પુષ્કરાન્તરભિગત્વરમીને ।
શાખિકોટરશયાલુશકુન્તે શૈલકન્દરશરણ્યમયૂરે ॥ ૨૩॥

શઙ્કરો દિવસમધ્યમભાગે પઙ્કજોત્પલપરાગકષાયામ્ ।
જાહ્નવીમભિયયૌ સહ શિષ્યૈરાહ્નિકં વિધિવદેષ વિધિત્સુઃ ॥ ૨૪॥

સોઽન્ત્યજં પથિ નિરીક્ષ્ય ચતુર્ભિર્ભીષણૈઃ શ્વભિરનુદ્રુતમારાત્ ।
ગચ્છ દૂરમિતિ તં નિજગાદ પ્રત્યુવાચ ચ સ શઙ્કરમેનમ્ ॥ ૨૫॥

અદ્વિતીયમનવદ્યમસઙ્ગં સત્યબોધસુખરૂપમખણ્ડમ્ ।

આમનન્તિ શતશો નિગમાન્તાસ્તત્ર ભેદકલના તવ ચિત્રમ્ ॥ ૨૬॥

દણ્ડમણ્ડિતકરા ધૃતકુણ્ડાઃ પાટલાભવસનાઃ પટુવાચઃ ।
જ્ઞાનગન્ધરહિતા ગૃહસંસ્થાન વઞ્ચયન્તિ કિલ કેચન વેષૈઃ ॥ ૨૭॥

ગચ્છ દૂરમિતિ દેહમુનાહો દેહિનં પરિજિહીર્ષસિ વિદ્વન્ ।
ભિદ્યતેઽન્નમયતોઽન્નમયં કિં સાક્ષિણશ્ચ યતિપુઙ્ગવ સાક્ષી ॥ ૨૮॥

બ્રાહ્મણશ્વપચભેદ વિચારઃ પ્રત્યગાત્મનિ કથં તવ યુક્તઃ ।
બિમ્બિતેઽમ્બરમણૌ સુરનદ્યામન્તરં કિમપિ નાસ્તિ સુરાયામ્ ॥ ૨૯॥

શુચિર્દ્વિજોઽહં શ્વપચ વ્રજેતિ મિથ્યાગ્રહસ્તે મુનિવર્ય કોઽયમ્ ।
સન્તં શરીરેષ્વશરીરમેકમુપેક્ષ્ય પૂર્ણં પુરુષં પુરાણમ્ ॥ ૩૦॥

અચિન્ત્યમવ્યક્તમનન્તમાદ્યં વિસ્મૃત્ય રૂપં વિપલં વિમોહાત્ ।
કલેવરેઽસ્મિન્કરિકર્ણલોલાકૃતિન્યહન્તા કથમાવિરાસ્તે ॥ ૩૧॥

વિદ્યામવાપ્યાપિ વિમુક્તિપદ્યાં જાગર્તિ તુચ્છા જનસઙ્ગ્રહેચ્છા ।
અહો મહાન્તોઽપિ મહેન્દ્રજાલે મજ્જન્તિ માયાવિવરસ્ય તસ્ય ॥ ૩૨॥

ઇત્યુદીર્ય વચનં વિરતેઽસ્મિન્ સત્યવાક્તદનુ વિપ્રતિપન્નઃ ।
અત્યુદારચરિતોઽન્ત્યજમેનં પ્રત્યુવાચ સ ચ વિસ્મિતચેતાઃ ॥ ૩૩॥

સત્યમેવ ભવતા યદિદાનીં પ્રત્યવાદિ તનુભૃત્પ્રવરૈતત્ ।
અન્ત્યજોઽયમિતિ સમ્પતિ બુદ્ધિં સન્ત્યજામિ વચસાઽઽત્મવિદસ્તે ॥ ૩૪॥

જાનતે શ્રુતિશિરાંસ્યપિ સર્વે મન્વતે ચ વિજિતેન્દ્રિયવર્ગાઃ ।
યુઞ્જતે હૃદયમાત્મનિ નિત્યં કુર્વતે ન ધિષણામપભેદામ્ ॥ ૩૫॥

ભાતિ યસ્ય તુ જગદ્ દૃઢબુદ્ધેઃ સર્વમપ્યનિશમાત્મતયૈવ ।
સ દ્વિજોઽસ્તુ ભવતુ શ્વપચો વા વન્દનીય ઇતિ મે દૃઢનિષ્ઠા ॥ ૩૬॥

યા ચિતિઃ સ્ફુરતિ વિષ્ણુમુખે સા પુત્તિકાવધિષુ સૈવ સદાઽહમ્ ।
નૈવ દૃશ્યમિતિ યસ્ય મનીષા પુલ્કસો ભવતુ વા સ ગુરુર્મે ॥ ૩૭॥

યત્ર યત્ર ચ ભવેદિહ બોધસ્તત્તદર્થસમવેક્ષણકાલે ।
બોધમાત્રમવશિષ્ટમહં તદ્યસ્ય ધીરિતિ ગુરુઃ સ નરો મે ॥ ૩૮॥

ભાષમાણ ઇતિ તેન કલાવાનેષ નૈક્ષત તમન્ત્યજમગ્રે ।
ધૂર્જટિં તુ સમુદૈક્ષત મૌલિસ્ફૂર્જદૈન્દવકલં સહ વેદૈઃ ॥ ૩૯॥

ભયેન ભક્ત્યા વિનયેન ધૃત્યા યુક્તઃ સ હર્ષેણ ચ વિસ્મયેન ।
તુષ્ટાવ શિષ્ટાનુમતઃ સ્તવૈસ્તં દૃષ્ટ્વા દૃશોર્ગોચરમષ્ટમૂર્તિમ્ ॥ ૪૦॥

દાસસ્તેઽહં દેહદૃષ્ટ્યાઽસ્મિ શમ્ભો જાતસ્તેંઽશો જીવદૃષ્ટ્યા ત્રિદૃષ્ટે ।
સર્વસ્યાત્મન્નાત્મદૃષ્ટ્યા ત્વમેવેત્યેવં મે ધીર્નિશ્ચિતા સર્વશાસ્ત્રૈઃ ॥ ૪૧॥

યદાલોકાદન્તર્બહિરપિ ચ લોકો વિતિમિરો
  ન મઞ્જૂષા યસ્ય ત્રિજગતિ ન શાણો ન ચ ખનિઃ ।
યતન્તે ચૈકાન્તં રહસિ યતયો યત્પ્રણયિનઃ
  નમસ્તસ્મૈ સ્વસ્મૈ નિખિલનિગમોત્તંસમણયે ॥ ૪૨॥

અહો શાસ્ત્રં શાસ્ત્રાત્કિમિહ યદિ ન શ્રીગુરુકૃપા
  ચિતા સા કિં કુર્યાન્નનુ યદિ ન બોધસ્ય વિભવઃ ।
કિમાલમ્બશ્ચાસૌ ન યદિ પરતત્વં મમ તથા
  નમઃ સ્વસ્મૈ તસ્મૈ યદવધિરિહાશ્ચર્યધિષણા ॥ ૪૩॥

ઇત્યુદારવચનૈર્ભગવન્તં સંસ્તુવન્તમથ ચ પ્રણમન્તમ્ ।
બાષ્પપૂર્ણનયનં મુનિવર્યં શઙ્કરઃ સબહુમાનમુવાચ ॥ ૪૪॥

અસ્મદાદિપદવીમભજસ્ત્વં શોધિતા તવ તપોધનનિષ્ઠા ।
બાદરાયણ ઇવ ત્વમપિ સ્યાઃ સદ્વરેણ્ય મદનુગ્રહપાત્રમ્ ॥ ૪૫॥

સંવિભજ્ય સકળશ્રુતિજાલં બ્રહ્મસૂત્રમકરોદનુશિષ્ટઃ ।
યત્ર કાણભુજસાઙ્ખ્યપુર્ગાણ્યુદ્ધૃતાનિ કુમતાનિ સમૂલમ્ ॥ ૪૬॥

તત્ર મૂઢમતયઃ કલિદોષાદ્ દ્વિત્રવેદવચનોદ્ધલિતાનિ ।
ભાષ્યકાણ્યરચયન્ બહુબુદ્ધૈર્દુષ્યતામુપગતાનિ ચ કૈશ્ચિત્ ॥ ૪૭॥

તદ્ભવાન્વિદિતવેદશિખાર્થસ્તાનિ દુર્મતિમતાનિ નિરસ્ય ।
સૂત્રભાષ્યમધુના વિદ્ધાતુ શ્રુત્યુપોદ્બલિતયુક્ત્યભિયુક્તમ્ ॥ ૪૮॥

એતદેવ વિબુધૈરપિ સેન્દ્રૈરર્ચનીયમનવદ્યમુદારમ્ ।
તાવકં કમલયોનિસભાયામધ્યવાપ્સ્યતિ વરાં વરિવસ્યામ્ ॥ ૪૯॥

ભાસ્કરાભિનવગુપ્તપુરોગાન્નીલકણ્ઠગુરુમણ્ડનમુખ્યાન્ ।
પણ્ડિતાનથ વિજિત્ય જગત્યાં ખ્યાપયાદ્વયમતે પરતત્વમ્ ॥ ૫૦॥

મોહસન્તમસવાસરનાથાંસ્તત્ર તત્ર વિનિવેશ્ય વિનેયાન્ ।
પાલનાય પરતત્ત્વસરણ્યા મામુપૈષ્યસિ તતઃ કૃતકૃત્યઃ ॥ ૫૧॥

એવમેનમનુગૃહ્ય કૃપાવાનાગમૈઃ સહ શિવોऽન્તરધત્ત ।
વિસ્મિતેન મનસા સહ શિષ્યૈઃ શઙ્કરોऽપિ સુરસિન્ધુમયાસીત્ ॥ ૫૨॥

સન્નિવર્ત્ય વિધિમાહ્નિકમીશં ધ્યાયતો ગુરુમથાऽખિલભાષ્યમ્ ।
કર્તુમુગ્રતમભૂદ્ ગુણસિન્ધોર્માનસં નિખિલલોકહિતાય ॥ ૫૩॥

કર્તૃત્વશક્તિમધિગમ્ય સ વિશ્વનાથાત્
કાશીપુરાન્નિરગમત્ત્વવિકાસભાજઃ ।
પ્રીતઃ સરોજમુકુલાદિવ ચઞ્ચરીક
નિર્વન્ધતઃ સુખમવાપ યથા દ્વિજેન્દ્રઃ ॥ ૫૪॥

અદ્વૈતદર્શનવિદાં ભુવિ સાર્વભૌમો યાત્યેષ ઇત્યુડુપબિમ્બસિતાતપત્રમ્ ।
અસ્તાચલે વહતિ ચારુ પુરઃ પ્રકાશવ્યાજેન ચામરમથાદિવ દિક્સુકાન્તા ॥ ૫૫॥

શાન્તાં દિશં દેવનૃણાં વિહાય નાન્યા દિગસ્મૈ સમરોચતાદ્ધા ।
તત્રત્યતીર્થાનિ નિષેવમાણો ગન્તું મનોऽધાદ્બદરીં ક્રમાત્સઃ ॥ ૫૬॥

તેનાન્વવર્તિ મહતા ક્વચિદુષ્ણશાલિ
શીતં ક્વચિત્ક્વચિદૃજુ ક્વચિદપ્યરાલમ્ ।
ઉત્કણ્ટકં ક્વચિદકણ્ટકવત્ક્વચિચ્ચ
તદ્વર્ત્મ મૂર્ખજનચિત્તમિવાવ્યવસ્થમ્ ॥ ૫૭॥

આત્માનમક્રિયમપવ્યયમીક્ષિતાપિ પાન્થૈઃ સમં વિચલિતઃ પથિ લોકરીત્યા ।
આદત્ફલાનિ મધુરાણ્યપિબત્પયાંસિ માયાદુપાવિશદશેત તથોદતિષ્ઠત્ ॥ ૫૮॥

તેન વ્યનીયત તદા પદવી દવીયસ્યાસાદિતા ચ બદરી વનપુણ્યભૂમિઃ ।
ગૌરીગુરુસ્રવદમન્દઝરીપરીતા ખેલત્સુરીયુતદરી પરિભાતિ યસ્યામ્ ॥ ૫૯॥

(૧) સ દ્વાદશે વયસિ તત્ર સમાધિનિષ્ઠૈ
ર્બ્રહ્મર્ષિભિઃ શ્રુતિશિરો બહુધા વિચાર્ય ।
ષડ્ભિશ્ચ સપ્તભિરથો નવભિશ્ચ
ખિન્નૈર્ભવ્યં ગભીરમધુરં ફણતિ સ્મ ભાષ્યમ્ ॥ ૬૦॥

(૧ ક્ષુત્પિપાસે જરામૃત્યૂ શોકમોહો ષડૂર્મયઃ ।
ત્વક્ ચર્મમાંસાસ્થિમેદોમજ્જારેતાંસિ સપ્તધાતવઃ, પઞ્ચજ્ઞાનેન્દ્રિયાણિ,
ચત્વાર્યન્તઃકરણ્યનીતિ નવકમ્, અથવા, ૧) જ્ઞાનેન્દ્રિયપઞ્ચકમ,
૨) કર્મેન્દ્રિયપઞ્ચકમ, ૩) પ્રાણપઞ્ચકમ, ૪) અન્તઃકરણચતુષ્ટયમ્,
"
(મનોબુદ્ધિરહઙ્કારશ્ચિત્તં કરણમન્તરમ્ ।

સંશયો નિશ્ચયો ગર્વઃ સ્મરણં વિષયા ઇમે ॥ ”
(ઇતિ વૃત્તિચતુષ્ટયભેદભિન્નમ્ ૫) ભૂતપઞ્ચકં ૬) અવિદ્યા,
૭) કામઃ, ૮) કર્મ, ૯) વાસના ઇતિ નવ પદાર્થાઃ, નવદ્વારોપિતં શરીરં વા ।
અથવા
૧) ચાર્વાકઃ, ૨) આર્હતઃ, ૩) સૌત્રાન્તિકઃ, ૪) વૈનાશિકઃ, ૫) વૈભાષિકઃ,
૬) યોગાચાર ઇતિ ષડ્ દર્શનકારાઃ
૧) ગૌતમઃ, ૨) કાણાદઃ, ૩) કપિલઃ, ૪) પતઞ્જલિઃ,
૫) જૈમિનિઃ,આસ્તિકદર્શનકારાઃ પઞ્ચ, ૬) સાખ્યૈકદેશિનઃ,
૭) શાક્તમીમાંસકાદ્યેકદશિનઃ ઇતિ આકલવ્ય સપ્ત ।
૧) જીવેશ્વરભેદઃ, ૨) ઈશ્વરજગદ્ભેદઃ, ૩) જીવપરસ્પરભેદઃ,
૪) જગત્પરસ્પરમેદઃ, ૫) જીવજગદ્ભેદઃ,
૬) ૭) ૮) ૯) પૂર્વોક્તવિદ્યાદિચતુષ્ટયમ્ ।
એતૈઃ ખેદં પ્રાપ્તાનાં શ્રેયઃ પ્રદં ભાષ્યમ્ ॥ )
કરતલકલિતાદ્વયાત્મતત્વં ક્ષપિતદુરન્ત ચિરન્તનપ્રમોહમ્ ।
ઉપચિતમુદિતોદિતૈર્ગુણૌઘૈરુપનિષદામયમુજ્જહાર ભાષ્યમ્ ॥ ૬૧॥

તતો મહાભારતસારભૂતાઃ સ વ્યાકરોદ્ભાગવતીશ્ચ ગીતાઃ ।
સનત્સુજાતીયમસત્સુદુરં તતો નૃસિંહસ્ય ચ તાપનીયમ્ ॥ ૬૨॥

ગ્રન્થાનસઙ્ખ્યાંસ્તદનૂપદેશસાહસ્રિકાદીન્વ્યદધાત્સુધીડ્યઃ ।
શ્રુત્વાઽર્થવિદ્યાનવિવેકપાશાન્મુક્તા વિરક્તા યતયો ભવન્તિ ॥ ૬૩॥

શ્રીશઙ્કરાચાર્યરવાવદેત્ય પ્રકાશમાને કુમતિપ્રણીતાઃ ।
વ્યાખ્યાન્ધકારા પ્રલયં સમીયુર્દુર્વાદિચન્દ્રપ્રભયાઽવિયુક્તાત્ ॥ ૬૪॥

અથ વ્રતીન્દુર્વિધિવદ્વિનેયાનધ્યાપયામાસ સ નૈજભાષ્યમ્ ।
તર્કે પરેષાં તરુણૈર્વિવસ્વન્મરીચિભિઃ સિન્ધુબદમશોષ્યમ્ ॥ ૬૫॥

નિજશિષ્યહૃદબ્જભાસ્વતો ગુરુવર્યસ્ય સનન્દનાદયઃ ।
શમપૂર્વગુણૈરશુશ્રુવન્કતિચિચ્છિષ્યગણેષુ મુખ્યતામ્ ॥ ૬૬॥

સ નિતરામિતરાશ્રવતો લસન્નિયમમદ્ભુતમાપ્ય સનન્દનઃ ।
શ્રુતનિજશ્રુતિકોઽપ્યભવત્પુનઃ પિપઠિષુર્ગહનાર્થવિવિત્સયા ॥ ૬૭॥

અધ્વન્દ્વભક્તિમમુમાત્મપદારવિન્દદ્વન્દ્વે નિતાન્તદયમાનમના મુનીન્દ્રઃ ।
આમ્નાયશેખરરહસ્યનિધાનકોશમાત્મીયકોશમખિલં ત્રિરપાઠ્યત્તમ્ ॥ ૬૮॥

ઈર્ષ્યાભરાકુલહૃદામિતરાશ્રવાણાં
પ્રખ્યાપયન્નનુપમામદસીયભક્તિમ્ ।
અભ્રાપગાપરતટસ્થમમું કદાચિ-
દાકારયન્નિગમશેખરદેશિકેન્દ્રઃ ॥ ૬૯ ॥

સન્તારિકાઽનવધિસંસૃતિસાગરસ્ય
કિં તારયેન્ન સરિતં ગુરુપાદભક્તિઃ ।
ઇત્યઞ્જસા પ્રવિશતઃ સલિલં દ્યુસિન્ધુઃ
પદ્માન્યુદઞ્ચયતિ તસ્ય પદે પદે સ્મ ॥ ૭૦ ॥

પાથોરુહેષુ વિનિવેશ્ય પદં ક્રમેણ
પ્રાપ્તોપકણ્ઠમમુમપ્રતિમાનભક્તિમ્ ।
આનન્દવિસ્મયનિરન્તનિરન્તરોઽસા-
વાશ્લિષ્ય પદ્મપદનામપદં વ્યતાનીત્ ॥ ૭૧ ॥

તં પાઠયન્તમનવદ્યતમાત્મવિદ્યાં
યે તુ સ્થિતાઃ સદસિ તત્વવિદાં સગર્વાઃ
આચિક્ષિપુઃ કુમતપાશુપતાભિમાનાઃ
કેચિદ્વિવેકવિટપોગ્રદવાયમાનાઃ ॥ ૭૨ ॥

તદ્વિકલ્પનમનલ્પમનીષઃ શ્રુત્યુદાહરણતઃ સ નિરસ્ય ।
ઈષદસ્તમિતગર્વભરાણામાગમાનપિ મમન્થ પરેષામ્ ॥ ૭૩ ॥

અદ્વિતીયનિરતા સતિ ભેદે મુક્તિરીશસમતૈવ કથં સ્યાત્ ।
ધ્યાનજા કિમિતિ સા ન વિનશ્યેદ્ભાવકાર્યમખિલં હિ ન નિત્યમ્ ॥ ૭૪ ॥

કિઞ્ચ સઙ્ક્રમણમીશગુણાનામિષ્યતે પશુષુ મોક્ષદશાયામ્ ।
તન્ન સાધ્વવયવૈર્વિધુરાણાં સઙ્ક્રમો ન ઘટતે હિ ગુણાનામ્ ॥ ૭૫ ॥

પદ્મગન્ધ ઇવ ગન્ધવહેઽસ્મિન્નાત્મનીશ્વરગુણોઽસ્ત્વિતિ ચેન્ન ।
તત્ર ગન્ધસમવાયિ નભસ્વત્સંયુતં દિશતિ ગન્ધધિયં યત્ ॥ ૭૬ ॥

કિઞ્ચૈકદેશેન સમાશ્રયન્તે કાત્સ્ન્યેન વા શમ્ભુગુણા વિમુક્તાન્ ।
પૂર્વે તુ પૂર્વોદિતદોષસઙ્ગસ્ત્વન્તેઽજ્ઞતાદિઃ પરમેશ્વરે સ્યાત્ ॥ ૭૭ ॥

ઇત્થં તર્કૈઃ કુલિશકઠિનૈઃ પણ્ડિતં મન્યમાના
ભિદ્યત્સ્વાર્થાઃ સ્મયભરમદં તત્યજુસ્તાન્ત્રિકાસ્તે ।
પક્ષાઘાતૈરિવ રયભરૈસ્તાડ્યમાનાઃ ફણાસુ

ક્ષ્વેડજ્વાલાં ખગકુલપતેઃ પન્નગાઃ સાભિમાનાઃ ॥ ૭૮॥

વ્યાખ્યાજૃમ્ભિતપાટવાત્ફણિપતેર્મન્દાક્ષમુદ્દીપયન્
સઙ્ખ્યાલઙ્ઘિતશિષ્યહૃદ્વનરુહેષ્વાદિત્યતામુદ્વહન્ ।
ઉદ્વેલસ્વયશઃ સુમૈઃ સ ભગવત્પાદો જગદ્ભુષયન્
કુર્વન્વાદિમૃગેષુ નિર્ભરમભાચ્છાર્દૂલવિક્રીડિતમ્ ॥ ૭૯॥

વેદાન્તકાન્તારકૃતપ્રચારઃ સુતીક્ષ્ણસદ્યુક્તિનખાગ્રદંષ્ટ્રઃ ।
ભયઙ્કરો વાદિમતઙ્ગજાનાં મહર્ષિકણ્ઠીરવ ઉલ્લલાસ ॥ ૮૦॥

અમાનુષં તસ્ય યતીશ્વરસ્ય વિલોક્ય બાલસ્ય સતઃ પ્રભાવમ્ ।
અત્યન્તમાશ્ચર્યયુતાન્તરઙ્ગાઃ કાશીપુરસ્થા જગદુસ્તદેત્થમ્ ॥ ૮૧॥

અસ્માન્મુહુર્ધૌતિતસર્વતન્ત્રાત્પરાભવં પણ્ડિતપુણ્ડરીકાઃ ।
પ્રપેદિરે ભાસ્કરગુપ્તમિશ્રમુરારિવિદ્યેન્દ્રગુરુપ્રધાનાઃ ॥ ૮૨॥

અસ્યાત્મનિષ્ઠાતિશયેન તુષ્ટઃ પ્રાદુર્ભવન્ કામરિપુઃ પુરસ્તાત્ ।
ચોદયામાસ કિલ પ્રણેતું વેદાન્તશારીરકસૂત્રભાષ્યમ્ ॥ ૮૩॥

કુદૃષ્ટિતિમિરસ્ફુરત્કુમતપઙ્કમગ્નાં પુરા
પરાશરભુવા ચિરાદ્ બુધમુદે બુધેનોદ્ધૃતામ્ ।
અહો બત જરદ્ગવીમનઘભાવ્યસૂક્તામૃતૈ-
રપઙ્કયતિ શઙ્કરઃ પ્રણતશઙ્કરઃ સાદરમ્ ॥ ૮૪॥

ત્રૈલોક્યં સસુખં ક્રિયાફલપયો ભુઙ્ક્તે યયાऽऽવિષ્કૃતં
યસ્યા વૃદ્ધતરે મહીસુરગૃહે વાસઃ પ્રવૃદ્ધાધ્વરે ।
તાં પઙ્કપ્રસૃતે કુતર્કકુહરે ધ્રૈઃ ખરૈઃ પાતિતાં
નિષ્પઙ્કામકરોત્સ ભાષ્યજલધેઃ પ્રક્ષાલ્ય સૂક્તામૃતૈઃ ॥ ૮૫॥

મિથ્યા વક્તીતિ કૈશ્ચિત્પુરુષમુપનિષદ્દૂરમુત્સારિતાऽભૂ-
દન્યૈરસ્મિન્નિયોજ્યં પરિચરિતુમસાવર્હતીતિ પ્રણુન્ના ।
અર્થાભાસં દધાનૈર્મૃદુભિરિવ પરૈર્વઞ્ચિતા ચોરિતાર્થે-
ર્વિન્દત્યાનન્દમેષા સુચિરમશરણા શઙ્કરાર્યં પ્રપન્ના ॥ ૮૬॥

હન્તું બૌદ્ધોऽન્વધાવત્તદનુ કથમપિ સ્વાત્મલાભઃ કણાદા-
જ્જાતઃ કૌમારિલાર્યૈર્નિજપદગમને દર્શિતં માર્ગમાત્રમ્ ।
સાઙ્ખ્યૈર્દુઃખં વિનીતં પરમથ રચિતા પ્રાણધૃત્યર્હતાऽન્યૈ-
રિત્થં ખિન્નં પુમાંસં વ્યધિત કરુણયા શઙ્કરાર્યઃ પરેશમ્ ॥ ૮૭॥

ગ્રસ્તં ભૂતૈર્ન દેવં કતિચન દદૃશુઃ કે ચ દૃષ્ટ્વાઽપ્યધીરાઃ
　　કેચિદ્ભૂતૈર્વિયુક્તં વ્યધુરથ કૃતિનઃ કેઽપિ સર્વૈર્વિમુક્તમ્ ।
કિન્ત્વેતેષામસત્વં ન વિદધુરજહાન્નૈવ ભીતિ તતોઽસૌ
　　તેષામુચ્છિદ્ય સત્તા(ય)મભયમકૃત તં શઙ્કરઃ શઙ્કરાંશઃ ॥ ૮૮॥

ચાર્વાકૈર્નિહ્નુતઃ પ્રાગ્બિલિભિરથ મૃષા રૂપમાપાદ્ય ગુપ્તઃ
　　કાણાદૈર્હા નિયોજ્યો વ્યરચિ બલવતાઽઽકૃષ્ય કૌમારિલેન ।
સાઙ્ખ્યૈરાકૃષ્ય હૃત્વા મલમપિ રચિતો યઃ પ્રધાનૈકતન્ત્રઃ
　　કૃષ્ટ્વા સર્વેશ્વરં તં વ્યતનુત પુરુષં શઙ્કરઃ શઙ્કરાંશઃ ॥ ૮૯॥

વાચઃ કલ્પલતાઃ પ્રસૂનસુમનઃસન્દોહસન્દોહનાઃ
　　ભાષ્યે ભૂષ્યતમે સમીક્ષિતવતાં શ્રેયસ્કરે શાઙ્કરે ।
ભાષ્યાભાસગિરો દુરન્વયગિરાઽઽશ્લિષ્ટા વિસૃષ્ટા ગુણૈ-
　　રિષ્ટાઃ સ્યુઃ કથમમ્બુજાસનવધૂદૌર્ભાગ્યગર્ભીકૃતાઃ ॥ ૯૦॥

કામં કામકિરાતકાર્મુકલતાપર્યાયનિર્યાતયા
　　નારાચચ્છટયા વિપાટિતમનોધૈર્યૈર્ધિયા કલ્પિતાન્ ।
આચાર્યાનનવર્યનિર્યદભિદાસિદ્ધાન્તશુદ્ધાન્તરો
　　ધીરો નાનુસરીસરીતિ વિરસાન્ગ્રન્થાનચન્ધાપહાન્ ॥ ૯૧॥

સુધાસ્યન્દાહન્તાવિજયિભગવત્પાદરચના
　　સમસ્કન્ધાન્ ગ્રન્થાન્ રચયતિ નિબદ્ધા યદિ તદા ।
વિશઙ્કાં ભઙ્ગાનાં મૃડમુકુટશ઼ૃઙ્ગાટસરિતઃ
　　કૃતૌ તુલ્યા કુલ્યા નિયતમુપશલ્યાદૃતગતિઃ ॥ ૯૨॥

યયા દીનાધીના ધનકનકધારા સમરચિ
　　પ્રતીર્તિ નીતાઽસૌ શિવયુવતિસૌન્દર્યલહરી ।
ભુજઙ્ગો રૌદ્રોઽપિ શ્રુતભયહૃદાધાયિ સુગુરો-
　　ર્ગિરાં ધારા સેયં કલયતિ કવેઃ કસ્ય ન મુદમ્ ॥ ૯૩॥

ગિરાં ધારા કલ્પદ્રુમકુસુમધારા પરગુરો-
　　સ્તદર્થાલી ચિન્તામણિકિરણવેણ્યા ગુણનિકા ।
અભઙ્ગવ્યઙ્ગ્યૌઘઃ સુરસુરભિદુગ્ધોર્મિસહભૂ-
　　ર્દિવં ભવ્યૈઃ કાવ્યૈઃ સૃજતિ વિદુષાં શઙ્કરગુરુઃ ॥ ૯૪॥

વાચા મોચાફલાભાઃ શ્રમશમનવિધૌ તે સમર્થાસ્તદર્થા
　　વ્યઙ્ગ્યં ભઙ્ગયન્તરં તત્ખલુ કિમપિ સુધામાધુરીસાધુરીતિઃ ।

મન્યે ધન્યાનિ ગાઢં પ્રશમિકુલપતેઃ કાવ્યગવ્યાનિ ભવ્યા-
ન્યેકશ્લોકોઽપિ યેષુ પ્રથિતકવિજનાનન્દસન્દો હકન્દઃ ॥ ૯૫॥

વાગ્ગુમ્ભૈઃ કુરુવિન્દકન્દલનિભૈરાનન્દકન્દૈઃ સતા-
મર્થૌઘૈરરવિન્દન્દકુહરસ્યન્દન્મરન્દોજ્જ્વલૈઃ ।
વ્યઙ્ગ્યૈઃ કલ્પતરુપ્રફુલ્લસુમનઃસૌરભ્યગર્ભીકૃતૈ-
ર્દત્તે કસ્ય મુદં ન શઙ્કરગુરોર્ભવ્યાર્થકાવ્યાવલિઃ ॥ ૯૬॥

તત્તાદૃગ્યતિશેખરોદ્ધૃતનિષદ્ભાષ્યં નિશમ્યેર્ષ્યયા
કેચિદ્દેવનદીતટસ્થવિદુષામક્ષાઙ્ઘ્રિપક્ષશ્રિતાઃ ।
મૌર્ખ્યાત્ખણ્ડયિતું પ્રયત્નમનુમાનૈકેક્ષણા વિક્ષમા-
ચક્રુર્ભાવ્યવિચાર્ય ચિત્રકિરણં ચિત્રાઃ પતઙ્ગા ઇવ ॥ ૯૭॥

નિઘર્ષણચ્છેદનતાપનાદ્યૈર્યથા સુવર્ણં પરભાગમેતિ ।
વિવાદિભિઃ સાધુ વિમથ્યમાનં તથા મુનેર્ભાષ્યમદીપિ ભૂયઃ ॥ ૯૮॥

સ ભાષ્યચન્દ્રો યતિદુગ્ધસિન્ધોરુત્થાય દાસ્યન્નમૃતં બુધેભ્યઃ ।
વિધૂય ગોભિઃ કુમતાન્ધકારાનતર્પયદ્વિપ્રમનશ્ચકોરાન્ ॥ ૯૯॥

અનાદિવાક્સાગરમન્થનોત્થા સેવ્યા બુધૈર્ધિક્કૃતદુઃસપત્નૈઃ ।
વિશ્રાણયન્તી વિજરામરત્વં વિદિદ્યુતે ભાષ્યસુધા યતીન્દોઃ ॥ ૧૦૦॥

સતાં હૃદબ્જાનિ વિકાસયન્તી તમાંસિ ગાઢાનિ વિદારયન્તી ।
પ્રત્યર્થ્યુલૂકાન પ્રવિલાપયન્તી ભાષ્યપ્રભાઽભાદ્યતિવર્યભાનોઃ ॥ ૧૦૧॥

ન્યાયમન્દરવિમન્થનજાતા ભાષ્યનુતનસુધા શ્રુતિસિન્ધોઃ ।
કેવલશ્રવણતો વિબુધેભ્યશ્ચિત્રમત્ર વિતરત્યમૃતત્વમ્ ॥ ૧૦૨॥

પાદાદાસીત્પદ્મનાભસ્ય ગઙ્ગા શમ્ભોર્વક્ત્રાચ્છાઙ્કરી ભાષ્યસૂક્તિઃ ।
આદ્યા લોકાન્દૃશ્યતે મજ્જયન્તીત્યન્યા મગ્નાનુદ્ધરત્યેષ ભેદઃ ॥ ૧૦૩॥

વ્યાસો દર્શયતિ સ્મ સૂત્રકલિતન્યાયૌઘરત્નાવલી-
રર્થલાભવશાન્ન કૈરપિ બુધૈરેતા ગૃહીતાશ્ચિરમ્ ।
અર્થાસ્યા સુલભાભિરાભિરધુના તે મણ્ડિતાઃ પણ્ડિતા
વ્યાસશ્ચાઽઽપ કૃતાર્થતાં યતિપતેરૌદાર્યમાશ્ચર્યકૃત્ ॥ ૧૦૪॥

વિદ્વજ્જાલતપઃફલં શ્રુતિવધૂધમ્મિલ્લમલ્લીસ્રજં
સદ્વૈયાસકસૂત્રમુગ્ધમધુરાગણ્યાતિપુણ્યોદયમ્ ।
વાગ્દેવીચિરભોગ્યભાગ્યવિભવપ્રાગ્ભારકોશાલયં

ભાષ્યં તે નિપિબન્તિ હન્ત ન પુનર્યેષાં ભવે સમ્ભવઃ ॥ ૧૦૫॥

મન્થાનાદ્રિધુરન્ધરા શ્રુતિસુધાસિન્ધોર્યતિક્ષ્માપતે-
ગ્રન્થાનાં ફણિતિઃ પરાવરવિદામાનન્દસઙ્ધાયિની ।
ઇન્ધાનૈઃ કુમતાન્ધકારપટલૈરન્ધીભવચ્ચક્ષુષાં
પન્થાનં સ્ફુટયન્ત્યકાણ્ડકમભાત્તકોર્કવિદ્યોતિતૈઃ ॥ ૧૦૬॥

આ સીતાનાથનેતુઃ સ્થલકૃતસલિલદ્વૈતમુદ્રાત્સમુદ્રા-
દારુદ્રાકર્ષણાદ્દ્રાગવનતશિખરાદ્ભોગસાન્દ્રાન્નગેન્દ્રાત્ ।
આ ચ પ્રાચીનભૂમીધરમુકુટતટાદા તાત્પશ્ચિમાદ્રે-
રદ્વૈતાદ્યાપવર્ગા જયતિ યતિધરાપોદ્ધૃતા બ્રહ્મવિદ્યા ॥ ૧૦૭॥

ઇતિ શ્રીમાધવીયે તદ્બ્રહ્મવિદ્યામતિષ્ઠિતિઃ ।
સઙ્ક્ષેપશઙ્કરજયે ષષ્ઠઃ સર્ગ ઉપારમત્ ॥ ૬॥

આદિતઃ શ્લોકાઃ ૬૬૩ ।

# શઙ્કરદિગ્વિજયમ્

## ॥ ૭. સપ્તમઃ સર્ગઃ વ્યાસદર્શનાદિચરિતવર્ણનમ્ ॥

અથ સપ્તમઃ સર્ગઃ ॥ ૭॥

સ જાતુ શારીરકસૂત્રભાષ્યમધ્યાપયન્નભ્રસરિત્સમીપે ।
શિષ્યાલિશઙ્કાઃ શમયન્નુવાસ યાવન્નભોમધ્યમિતો વિવસ્વાન્ ॥ ૧॥

શ્રાન્તેષ્વથાધીત્ય શનૈર્વિનેયેષ્વાચાર્ય ઉત્તિષ્ઠતિ યાવદેષઃ ।
તાવદ્ દ્વિજઃ કશ્ચન વૃદ્ધરૂપઃ કસ્ત્વં કિમધ્યાપયસીત્યપૃચ્છત્ ॥ ૨॥

શિષ્યાસ્તમૂચુર્ભગવાનસૌ નો ગુરુઃ સમસ્તોપનિષત્સ્વતન્ત્રઃ ।
અનેન દુરીકૃતભેદવાદમકારિ શારીરકસુલભાષ્યમ્ ॥ ૩॥

સ ચાબ્રવીદ્ભાષ્યકૃતં ભવન્તમેતે વદન્ત્યદ્ભુતમેતદાસ્તામ્ ।
અથૈકમુચ્ચારય પારમાર્ષં યતેઽર્થતસ્ત્વં યદિ વેત્થ સૂત્રમ્ ॥ ૪॥

તમબ્રવીદ્ભાષ્યકૃદગ્ર્યવાચં સુત્રાર્થવિદ્ભ્ય્ઽસ્તુ નમો ગુરુભ્યઃ ।
સૂત્રજ્ઞતાહઙ્કૃતિરસ્તિ નો મે તથાઽપિ યત્પૃચ્છસિ તદ્બ્રવીમિ ॥ ૫॥

પપ્રચ્છ સોઽધ્યાયમથાધિકૃત્ય તૃતીયમારમ્ભગતં યતીશમ્ ।
“તદન્તરે”ત્યાદિકમસ્તિ સૂત્રં બ્રહ્યેતદર્થં યદિ વેત્થ કિઞ્ચિત્ ॥ ૬॥

સ પ્રાહ જીવઃ કરણાવસાદે સંવેષ્ટિતો ગચ્છતિ ભૂતસૂક્ષ્મૈઃ ।
તાણ્ડિશ્રુતૌ ગૌતમજૈવલીયપ્રશ્નોત્તરાભ્યાં પ્રથિતોઽયમર્થઃ ॥ ૭॥

ઇત્યુક્તમર્થં નિશમય્ય તેન સ વાવદૂકઃ શતધા વિકલ્પ્ય ।
અખણ્ડયત્પણ્ડિતકુઞ્જરાણાં મધ્યે મહાવિસ્મયમાદધાનઃ ॥ ૮॥

અનુદ્ય સર્વં ફણિતં તદીયં સહસ્રધા તીર્થકરશ્ચખણ્ડ ।
તયાઃ સુરાચાર્યફણીન્દ્રવાચોર્દિનાષ્ટકં વાક્કલહો જજૃમ્ભે ॥ ૯॥

એવં વદન્તૌ યતિરાડ્દ્વિજેન્દ્રૌ વિલોક્ય પાર્શ્વસ્થિતપદ્મપાદઃ ।
આચાર્યમાહેતિ મહીસુરોઽયં વ્યાસો હિ વેદાન્તરહસ્યવેત્તા ॥ ૧૦॥

ત્વં શઙ્કરઃ શઙ્કર એવ સાક્ષાત્ વ્યાસસ્તુ નારાયણ એવ નૂનમ્ ।
તયોર્વિવાદે સતતં પ્રસક્તે કિ કિઙ્કરોઽહં કરવાણિ સદ્યઃ ॥ ૧૧ ॥

ઇતીદમાકર્ણ્ય વચો વિચિત્રં સ ભાષ્યકૃત્સૂત્રકૃતં દિદૃક્ષુઃ ।
કૃતાઞ્જલિસ્તં પ્રયતઃ પ્રણમ્ય બભાણ વાણીં નવપદ્યરૂપામ્ ॥ ૧૨ ॥

ભવાંસ્તડિચ્ચારુજટાકિરીટપ્રવર્ષુકામ્ભોધરકાન્તિકાન્તઃ ।
શુભ્રોપવીતી ધૃતકૃષ્ણચર્મા કૃષ્ણો હિ સાક્ષાત્કલિદોષહન્તા ॥ ૧૩ ॥

ભાવત્કસૂત્રપ્રતિપાદ્યતાદૃક્પરાપરાર્થપ્રતિપાદકં સત્ ।
અદ્વૈતભાષ્યં તવ સમ્મતં ચેત્સોઢ્વા મમાઽગઃ પુરતો ભવાઽઽશુ ॥ ૧૪ ॥

એવં વદન્નયમથૈક્ષત કૃષ્ણમારાચ્ચામીકરવ્રતતિચારુજટાકલાપમ્ ।
વિદ્યુલ્લતાવલયવેષ્ટિતવારિદાભં ચિન્મુદ્રયા પ્રકટયન્તમભીષ્ટમર્થમ્ ॥ ૧૫ ॥

ગાઢોપગૂઢમનુરાગજુષા રજન્યા ગર્હાપદં વિદધતં શરદિન્દુબિમ્બમ્ ।
તાપિચ્છરીતિતનુકાન્તિઝરીપરીતં કાન્તેન્દુકાન્તઘટિતં કરકં દધાનમ્ ॥ ૧૬ ॥

સપ્તાધિકાચ્છદરવિંશતિમૌક્તિકાઢ્યાં
સત્યસ્ય મૂર્તિમિવ બિભ્રતમક્ષમાલામ્ ।
તત્તાદૃશસ્વપતિવંશવિવર્ધનાત્પ્રા-
ક્તારાવલીમુપગતામિવ ચાનુનેતુમ્ ॥ ૧૭ ॥

શાર્દૂલચર્મોદ્વહનેન ભૂતેરુદ્ધૂલનેનાપિ જટાચ્છટાભિઃ ।
રુદ્રાક્ષમાલાવલયેન શમ્ભોરર્ધાસનાધ્યાસનસખ્યપાત્રમ્ ॥ ૧૮ ॥

અદ્વૈતવિદ્યાસૃણિતીક્ષ્ણધારાવશીકૃતાહઙ્કૃતિકુઞ્જરેન્દ્રમ્ ।
સ્વશાસ્ત્રશઙ્કૂજ્જ્વલસૂત્રદામનિયન્ત્રિતાકૃત્રિમગોસહસ્રમ્ ॥ ૧૯ ॥

તત્તાદૃગત્યુજ્જ્વલકીર્તિશાલિશિષ્યાલિસંશોભિતપાર્શ્વભાગમ્ ।
કટાક્ષબીક્ષામૃતવર્ષધારાનિવારિતાશેષજનાનુતાપમ્ ॥ ૨૦ ॥

વિલોક્ય વાચંયમસાર્વભૌમં સ શઙ્કરોઽશઙ્કિતદર્શનં તમ્ ।
ગુરું ગુરૂણામપિ હૃષ્ટચેતાઃ પ્રત્યુદ્યયૌ શિષ્યગણૈઃ સમેતઃ ॥ ૨૧ ॥

અત્યાદરાચ્છાત્રગણૈઃ સહાસૌ પ્રત્યુદ્ગતસ્તચ્ચરણૌ પ્રણમ્ય ।
યત્યગ્રગામી વિનયી પ્રહૃષ્યન્નિત્યબ્રવીત્સત્યવતીસુતં સઃ ॥ ૨૨ ॥

દ્વૈપાયન સ્વાગતમસ્તુ તુભ્યં દૃષ્ટ્વા ભવન્તં ચરિતા મયાર્થાઃ ।

યુક્તં તદેતત્ત્વયિ સર્વકાલં પરોપકારવ્રતદીક્ષિતત્વાત્ ॥ ૨૩॥

મુને પુરાણાનિ દશાષ્ટ સાક્ષાચ્છ્રુત્યર્થગર્ભાણિ સુદુષ્કરાણિ ।
કૃતાનિ પદ્યદ્વયમત્ર કર્તું કો નામ શક્નોતિ સુસઙ્ગતાર્થમ્ ॥ ૨૪॥

વેદાર્ણવં વ્યતિયુતં વ્યદધાશ્ચતુર્ધા
 શાખાપ્રભેદનવશાદપિ તાન્ વિભક્તાન્ ।
મન્દાઃ કલૌ ક્ષિતિસુરા જનિતાર એતે
 વેદાન્ ગ્રહીતુમલસા ઇતિ ચિન્તયિત્વા ॥ ૨૫॥

એષ્યદ્વિજાનાસિ ભવન્તમર્થં ગતં ચ સર્વં ન ન વેત્સિ યત્તત્ ।
નો ચેત્કથં ભૂતભવદ્ભવિષ્યત્કથાપ્રબન્ધાન્ રચયેરજાનન્ ॥ ૨૬॥

આભાસયન્નન્તરમઙ્ગમાન્ધ્યં સ્થૂલં ચ સૂક્ષ્મં બહિરન્તરં ચ ।
અપાનુદન્ ભારતશીતરશ્મિરભૂદપૂર્વી ભગવત્પયોધેઃ ॥ ૨૭॥

વેદાઃ ષડઙ્ગં નિખિલં ચ શાસ્ત્રં મહાન્ મહાભારતવારિરાશિઃ ।
ત્વત્તઃ પુરાણાનિ ચ સમ્બભૂવુઃ સર્વં ત્વદીયં ખલુ વાઙ્મયાખ્યમ્ ॥ ૨૮॥

દ્વીપે ક્વચિત્ સમુદયન્નૃતમેવ ધામ શાખાસહસ્રસચિવઃ શુકસેવ્યમાનઃ ।
ઉલ્લાસયત્યહહ યસ્તિલકો મુનીર્થન્નામુચ્ચૈઃ ફલાનિ સુદૃશાં નિજપાદભાજામ્ ॥ ૨૯॥

ધત્સે સદાઽઽર્તિશમનાય હૃદા ગિરીશં ગોપાય સેઽધિવદનં ચ ચિરન્તનીર્ગાઃ ।
દૂરીકરોષિ નરકં ચ દયાર્દ્રદૃષ્ટ્યા કસ્તે ગુણાન્ ગદિતુમદ્ભુતકૃષ્ણ શક્તઃ ॥ ૩૦॥

યમામનન્તિ શ્રુતયઃ પદાર્થં ન સન્ન ચાસન્ન બહિર્ન ચાન્તઃ ।
સ સચ્ચિદાનન્દઘનઃ પરાત્મા નારાયણસ્ત્વં પુરુષઃ પુરાણઃ ॥ ૩૧॥

ઇતિ સ્તુતસ્તેન યથાવિધાનમાસેદિવાન્ વિષ્ટરમાત્મનિષ્ઠઃ ।
દ્વૈપાયનઃ પ્રશ્રયનમ્રપૂર્વકાયં યતીશાનમિદં બભાષે ॥ ૩૨॥

ત્વમસ્મદાદેઃ પદવીં ગતોઽભૂરખણ્ડપાણ્ડિત્યમબોધયં તે ।
શુકર્ષિવત્ પ્રીતિકરોઽસિ વિદ્વન્ પુરેવ શિષ્યૈઃ સહ મા ભ્રમીસ્ત્વમ્ ॥ ૩૩॥

કૃતં ત્વયા ભાષ્યમિતીન્દુમૌલેઃ સભાઙ્ગણે સિદ્ધમુખાન્નિશમ્ય ।
હૃદા પ્રહૃષ્ટેન દિદૃક્ષયા તે દૃગધ્વનીનઃ પ્રશમિન્નભૂવમ્ ॥ ૩૪॥

ઇત્થં મુનીન્દ્રવચનશ્રવણોત્થહર્ષ
રોમાઞ્ચપૂરમિષતો બહિરુત્પ્લવન્તં
બિભ્રત્તમભ્રરુચિમાખ્યદદભ્રશક્તિં

શ્રીશઙ્કરઃ શુકમતાર્ણવપૂર્ણચન્દ્રઃ ॥ ૩૫॥

સુમન્તુપૈલપ્રથમા મુનીન્દ્રા મહાનુભાવા નનુ યસ્ય શિષ્યાઃ ।
તૃણાલ્લઘીયાનપિ તત્ર કોઽહં તથાઽપિ કારુણ્યમદર્શિ દીને ॥ ૩૬॥

સોઽહં સમસ્તાર્થવિવેચકસ્ય કૃત્વા ભવત્સૂત્રસહસ્રરશ્મેઃ ।
ભાષ્યપ્રદીપેન મહર્ષિમાન્ય નીરાજનં ધૃષ્ટતયા લજ્જે ॥ ૩૭॥

અકારિ યત્સાહસમાત્મબુદ્ધ્યા ભવત્પ્રશિષ્યવ્યપદેશભાજા ।
વિચાર્ય તત્સૂક્તિદુરુક્તિજાલમર્હઃ સમીકર્તુમિદં કૃપાલુઃ ॥ ૩૮॥

ઇત્થં નિગદ્યોપરતસ્ય હસ્તાદ્ધસ્તદ્વયેનાઽઽદરતઃ સ ભાષ્યમ્ ।
આદાય સર્વત્ર નિરૈક્ષતાસૌ પ્રસાદગામ્ભીર્યગુણાભિરામમ્ ॥ ૩૯॥

સૂત્રાનુકારિમૃદુવાક્યનિવેદિતાર્થં સ્વીયૈઃ પદૈઃ સહ નિરાકૃતપૂર્વપક્ષમ્ ।
સિદ્ધાન્તયુક્તિવિનિવેશિતતત્સ્વરૂપં દૃષ્ટ્વાઽભિનન્દ્ય પરિતોષવશાદવોચત્ ॥ ૪૦॥

ન સાહસં તાત ભવાનકાર્ષીદ્યત્સૂત્રભાષ્યં ગુરુણા વિનીતઃ ।
વિચાર્યતાં સૂત્રદુરુક્તમત્રેત્યેતન્મહત્સાહસમિત્યવૈમિ ॥ ૪૧॥

મીમાંસકાનામપિ મુખ્યભૂતો વેત્થાખિલવ્યાકરણાનિ વિદ્વન્ ।
વિનિઃસરેત્તે વદનાદ્યતીન્દો ગોવિન્દશિષ્યસ્ય કથં દુરુક્તમ્ ॥ ૪૨॥

ન પ્રાકૃતસ્ત્વં સકલાર્થદર્શી મહાનુભાવઃ પુરુષોઽસિ કશ્ચિત્ ।
યો બ્રહ્મચર્યાદ્વિષયાન્નિવાર્ય પર્યવ્રજઃ સૂર્ય ઇવાન્ધકારાન્ ॥ ૪૩॥

બહ્વર્થગર્ભાણિ લઘૂનિ યાનિ નિગૂઢભાવાનિ ચ મત્કૃતાનિ ।
ત્વામેવમિત્થં વિરહય્ય નાસ્તિ યસ્તાનિ સમ્યગ્વિવરીતુમીષ્ટે ॥ ૪૪॥

નિસર્ગદુર્જ્ઞાનતમાનિ કો વા સૂત્રાણ્યલં વેદિતુમર્થતઃ સન્ ।
ક્લેશસ્તુ તાવાન્ વિવરીતુરેષાં યાવાન્ મણેતુર્વિબુધા વદન્તિ ॥ ૪૫॥

ભાવં મદીયમવબુધ્ય યથાવદેવં
 ભાષ્યં પ્રણેતુમનલં ભગવાનપીશઃ ।
સાઙ્ખ્યાદિનાઽન્યથયિતં શ્રુતિમૂર્ધવર્મો-
 દ્ધર્તું કથં પરશિવાંશમૃતે પ્રભુઃ સ્યાત્ ॥ ૪૬॥

રોષાનુષઙ્ગકલયાઽપિ સુદૂરમુક્તો
 ધત્સેઽધિમાનસમહો સકલાઃ કલાશ્ચ ।
સર્વાત્મના ગિરિજયોપહિતસ્વરૂપઃ

શક્યો ન વર્ણયિતુમદ્ભુતશઙ્કરસ્ત્વમ્ ॥ ૪૭॥

વ્યાખ્યાપ્યસઙ્ખ્યૈઃ કવિભિઃ પુરૈતદ્વ્યાખ્યાસ્યતે કૈશ્ચિદિતઃ પરં ચ ।
ભવાનિવાસ્મદ્ધૃદયં કિમેતે સર્વજ્ઞ વિજ્ઞાતુમલં નિગૂઢમ્ ॥ ૪૮॥

વ્યાખ્યાહિ ભૂયો નિગમાન્તવિદ્યાં વિભેદવાદાન્ વિદુષો વિજિત્ય ।
ગ્રન્થાન્ ભુવિ ખ્યાપય સાનુબન્ધાનહં ગમિષ્યામિ યથાભિલાષમ્ ॥ ૪૯॥

ઇત્યુક્તવન્તં તમસાવવોચત્ કૃતાનિ ભાષ્યાણ્યપિ પાઠિતાનિ ।
ધ્વસ્તાનિ સમ્યક્કુમતાનિ ધૈર્યાદિતઃ પરં કિં કરણીયમસ્તિ ॥ ૫૦॥

મુહૂર્તમાત્રં મણિકર્ણિકાયાં વિધેહિ સદ્વત્સલ સન્નિધાનમ્ ।
ચિરાદ્યતેઽહં પરમાયુષોઽન્તે ત્યજામિ યાવદ્વપુરદ્ય હેયમ્ ॥ ૫૧॥

ઇતીદમાકર્ણ્ય વચો વિચિન્ત્ય સ શઙ્કરં માહ કુરુષ્વ મૈવમ્ ।
અનિર્જિતાઃ સન્તિ વસુન્ધરાયાં ત્વયા બુધાઃ કેચિદુદારવિદ્યાઃ ॥ ૫૨॥

જયાય તેષાં કતિ હાયનાનિ વસ્તવ્યમેવ સ્થિરધીસ્ત્વયાઽપિ ।
નો ચેન્મુમુક્ષા ભુવિ દુર્લભા સ્યાત્ સ્થિતિર્યથા માતૃધુતસ્ય બાલ્યે ॥ ૫૩॥

પ્રસન્નગમ્ભીરભવત્પ્રણીતપ્રબન્ધસન્દર્ભભવઃ પ્રહર્ષઃ ।
પ્રોત્સાહત્યાત્મવિદામૃષીણાં વરેણ્ય વિશ્રાણયિતું વરં તે ॥ ૫૪॥

અષ્ટૌ વયાંસિ વિધિના તત્ર વત્સ દત્તા-
ન્યન્યાનિ ચાષ્ટ ભવતા સુધિયાઽઽર્જિતાનિ ।
ભૂયોઽપિ ષોડશ ભવન્તુ ભવાજ્ઞયા તે
ભૂયાચ્ચ ભાષ્યમિદમારવિચન્દ્રતારમ્ ॥ ૫૫॥

ત્વમાયુષાઽનેન વિરોધિવાદિગર્વાઙ્કુરોન્મૂલનજાગરૂકૈઃ ।
વાક્યૈઃ કુરુષ્વ્જિઝતભેદબુદ્ધીનદ્વૈતવિદ્યાપરિપન્થિનોઽન્યાન્ ॥ ૫૬॥

ઇતીરયન્તં પ્રતિ વાચમૂચે સ શઙ્કરઃ પાવિતસર્વલોકઃ ।
ત્વત્સૂત્રસમ્બન્ધવશાન્મદીયં ભાષ્યં પ્રચારં ભુવિ યાતુ વિદ્વન્ ॥ ૫૭॥

ઇતીરયિત્વા ચરણૌ વવન્દે યતિર્મુનેઃ સર્વવિદો મહાત્મા ।
પ્રદાય સમ્ભાવ્ય વરં મુનીશો દ્વૈપાયનઃ સોઽન્તરધાદ્યતાત્મા ॥ ૫૮॥

ઇત્થં નિગદ્ય ઋષિવૃષ્ણિ તિરોહિતેઽસ્મિન્નન્તર્વિવેક નિધિરપ્યથ વિવ્યથે સઃ ।
હૃત્તાપહારિનિરુપાધિકૃપારસાનાં તત્તાદૃશાં કથમહ્ વિરહો વિષહ્યઃ ॥ ૫૯॥

તત્પાદપદ્મે નિજચિત્તપદ્મે પશ્યન્ કથઞ્ચિદ્વિરહં વિષહ્ય ।

યતિક્ષિતીશોઽપિ ગુરોર્નિયોગાન્મનો દધે દિગ્વિજયે મનીષી ॥ ૬૦॥

ભાષ્યસ્ય વાર્તિકમથૈષ કુમારિલેન ભટ્ટેન કારયિતુમાદરવાન્ મુનીન્દ્રઃ ।
વન્ધ્યાયમાનદરવિન્ધ્યમહીધરેણ વાચંયમેન ચરિતાં હરિતં પ્રતસ્થે ॥ ૬૧॥

તતઃ સ વેદાન્તરહસ્યવેત્તા ભેત્તાઽમતાનાં તરસા મતાનામ્ ।
પ્રયાગમાગાત્પ્રથમં જિગીષુઃ કુમારિલં સાધિતકર્મજાલમ્ ॥ ૬૨॥

આમજ્જતાં કિલ તનુમસિતાં સિતાં ચ કર્તું કલિન્દસુતયા કલિતાનુષઙ્ગામ્ ।
અહ્નાય જહ્નુતનયામથ નિહ્નુતાઘાં મધ્યે પ્રયાગમગમન્મુનિરર્થમાર્ગમ્ ॥ ૬૩॥

ગઙ્ગાપ્રવાહૈરુપરુદ્ધવેગા કલિન્દકન્યા સ્તિમિતપ્રવાહા ।
અપૂર્વસખ્યાગતલજ્જયેવ યત્રાધિકં ભાતિ વિચિત્રપાથાઃ ॥ ૬૪॥

અન્તેવસદ્ભિરમલચ્છવિસમ્પ્રદાયમધ્યેતુમાશ્રિતજલાં કુહચિન્મરાલૈઃ ।
ચક્રદ્વયેન રજનીસહવાસસૌખ્યસંશીલનાથ કિલ સંવલિતાં પરત્ર ॥ ૬૫॥

યત્રાપ્લુતા દિવ્યશરીરભાજ આચન્દ્રતારં દિવિ ભોગજાતમ્ ।
સમ્ભુઞ્જતે વ્યાધિકથાનભિજ્ઞાઃ પ્રાહેમમર્થં શ્રુતિરેવ સાક્ષાત્ ॥ ૬૬॥

અજ્ઞાતસમ્ભવતિરોધિકથાઽપિ વાણી યસ્યાઃ સિતાસિતતયૈવ ગૃણાતિ રૂપમ્ ।
ભાગીરથીં યમુનયા પરિચર્યમાણામેતાં વિગાહ્ય મુદિતો મુનિરિત્યભાણીત્ ॥ ૬૭॥

સિદ્ધાપગે પુરવિરોધિજટોપરોધક્રુદ્ધા કુતઃ શતમદઃસદૃશાન્ વિધત્સે ।
બદ્ધા ન કિં નુ ભવિતાસિ જટાભિરેષામદ્ધા જડપ્રકૃતયો ન વિદન્તિ ભાવિ ॥ ૬૮॥

સન્માર્ગવર્તનપરાઽપિ સુરાપગે ત્વમસ્થીનિ નિત્યમશુચીનિ કિમાદદસિ ।
આ જ્ઞાતમમ્બ હૃદયં તવ સજ્જનાનાં પ્રાયઃ પ્રસાધનકૃતે કૃતમજ્જનાનામ્ ॥ ૬૯॥

સ્વાપાનુષઙ્ગજડતાભરિતાઞ્જનૌઘાન્ સ્વાપાનુષઙ્ગજડતાવિધુરાન્વિધત્સે ।
દૂરીભવદ્વિષયરાગહૃદોઽપિ તૂર્ણં ધૂર્તાવતંસયસિ દેવિ ક એષ માર્ગઃ ॥ ૭૦॥

ઇતિ સ્તુવંસ્તાપસરાટ્ ત્રિવેણીં શાટ્યા સમાચ્છાદ્ય કટીં કૃપીટે ।
દોર્દણ્ડયુગ્મોદ્ધૃતવેણુદણ્ડોઽઘમર્ષણસ્નાનમના બભૂવ ॥ ૭૧॥

સસ્નૌ પ્રયાગે સહ શિષ્યસન્ઘૈઃ સ્વયં કૃતાર્થો જનસઙ્ગ્રહાર્થી ।
અસ્મારિ માતાઽપિ ચ સા પુપોષ દધાર યા દુઃખમસોઢ ભૂરિ ॥ ૭૨॥

અનુષ્ઠિતિં દ્રાગવસાય્ય વાતૈઃ કલ્હારશીતૈરુપસેવ્યમાનઃ ।
તીરે વિશશ્રામ તમાલમાલિન્યત્રાન્તરેશ્રૂયત લોકવાર્તા ॥ ૭૩॥

ગિરેરવપ્લુત્ય ગતિઃ સતાં યઃ પ્રામાણ્યમામ્નાય ગિરામવાદીત્ ।
યસ્ય પ્રસાદાત્ત્રિદિવૌકસોઽપિ પ્રપેદિરે પ્રાક્તનયજ્ઞભાગાન્ ॥ ૭૪॥

સોઽયં ગુરોરુન્મથનપ્રસક્તં મહત્તરં દોષમપાકરિષ્ણુઃ ।
અશેષવેદાર્થવિદાસ્તિકત્વાત્તુષાનલં પ્રાવિશદેષ ધીરઃ ॥ ૭૫॥

અયં હ્યધીતાખિલવેદમન્ત્રઃ કૂલઙ્કષાલોડિતમર્વતન્ત્રઃ ।
નિતાન્તદૂરીકૃતદુષ્ટતન્ત્રસ્ત્રૈલોક્યવિભ્રામિતકીર્તિયન્ત્રઃ ॥ ૭૬॥

શ્રુત્વેતિ તાં સત્વરમેષ ગચ્છન્ વ્યાલોકયત્તં તુષરાશિસંસ્થમ્ ।
પ્રભાકરાદ્યૈઃ પ્રથિતપ્રભાવૈરુપસ્થિતં સાશ્રુમુખૈર્વિનેયૈઃ ॥ ૭૭॥

ધૂમાયમાનેન તુષાનલેન સણ્ઢહ્યમાનેઽપિ વપુષ્યશેષે ।
સાદૃશ્યમાનેન મુખેન વાષ્પપરીતપદ્મશ્રિયમાદધાનમ્ ॥ ૭૮॥

દુરે વિધૂતાઘમપાઙ્ગભઙ્ગ્યા તં દેશિકં દૃષ્ટિપથાવતીર્ણમ્ ।
દદર્શ ભટ્ટો જ્વલદગ્નિકલ્પો જુગોપ યો વેદપથં જિતારિઃ ॥ ૭૯॥

અષ્ટપૂર્વં શ્રુતપૂર્વવૃત્તં દૃષ્ટ્વાઽતિમોદં સ જગામ ભટ્ટઃ ।
અચીકરચ્છિષ્યગણૈઃ સપર્યામુપાદદે તામપિ દેશિકેન્દ્રઃ ॥ ૮૦॥

ઉપાત્તભિક્ષઃ પરિતુષ્ટચિત્તઃ પ્રદર્શયામાસ સ ભાષ્યમસ્મૈ ।
સર્વો નિબન્ધો હ્યમલોઽપિ લોકે શિષ્ટેક્ષિતઃ સઞ્ચરણં પ્રયાતિ ॥ ૮૧॥

દૃષ્ટ્વા ભાષ્યં હૃષ્ટચેતાઃ કુમારઃ પ્રોચે વાચં શઙ્કરં દેશિકેન્દ્રમ્ ।
લોકે ત્વલ્પો મત્સરગ્રામશાલી સર્વજ્ઞાનો  નાલ્પભાવસ્ય પાત્રમ્ ॥ ૮૨॥

અષ્ટૌ સહસ્રાણિ વિભાન્તિ વિદ્વન્ સદ્વાર્તિકાનાં પ્રથમેઽત્ર ભાષ્યે ।
અહં યદિ સ્યામગૃહીતદીક્ષો ધ્રુવં વિધાસ્યે સુનિબન્ધમસ્ય ॥ ૮૩॥

ભવાદૃશાં દર્શનમેવ લોકે વિશેષતોઽસ્મિન્ સપયે દુરાપમ્ ।
પુરાઽઽર્જિતૈઃ પુણ્યચયૈઃ કથઞ્ચિત્ત્વમદ્ય મે દૃષ્ટિપથં ગતોઽભૂઃ ॥ ૮૪॥

અસારસંસારપયોબ્ધિમધ્યે નિમજ્જતાં સદ્ભિરુદારવૃત્તૈઃ ।
ભવાદૃશૈઃ સઙ્ગતિરેવ સાધ્યા નાન્યસ્તદુત્તારવિધાવુપાયઃ ॥ ૮૫॥

ચિરં દિદૃક્ષે ભગવન્તમિત્થં ત્વમદ્ય મે દૃષ્ટિપથં ગતોઽભૂઃ ।
નહ્યત્ર સંસારપથે નરાણાં સ્વેચ્છાવિધેયોઽભિમતેન યોગઃ ॥ ૮૬॥

યુનક્તિ કાલઃ ક્વચિદિષ્ટવસ્તુના ક્વચિત્ત્વરિષ્ટેન ચ નીચવસ્તુના ।
તથૈવ સંયોજ્ય વિયોજયત્યસૌ સુખાસુખે કાલકૃતે પ્રવેદ્મ્યતઃ ॥ ૮૭॥

કૃતો નિબન્ધો નિરણાયિ પન્થા નિરાસિ નૈયાયિકયુક્તિજાલમ્ ।
તથાऽન્વભૂવં વિષયોત્થજાતં ન કાલમેનં પરિહર્તુમીશે ॥ ૮૮॥

નિરાસ્થમીશં શ્રુતિલોકસિદ્ધં શ્રુતેઃ સ્વતોમાત્વમુદાહરિષ્યન્ ।
ન નિહ્નુવે યેન વિના પ્રપઞ્ચઃ સૌખ્યાય કલ્પેત ન જાતુ વિદ્વન્ ॥ ૮૯॥

તથાગતાક્રાન્તમભૂદશેષં સ વૈદિકોऽધ્વા વિરલીબભૂવ ।
પરીક્ષ્ય તેષાં વિજયાય માર્ગં પ્રાવર્તિષિ ત્રાતુમનાઃ પુરાણમ્ ॥ ૯૦॥

સશિષ્યસઙ્ઘાઃ પ્રવિશન્તિ રાજ્ઞાં ગેહં તદાદિ સ્વવશે વિધાતુમ્ ।
રાજા મદીયોજિરમસ્મદીયં તદાદ્રિયધ્વં ન તુ વેદમાર્ગમ્ ॥ ૯૧॥

વેદોऽપ્રમાણં બહુમાનબાધાત્ પરસ્પરવ્યાહતવાચકત્વાત્ ।
એવં વદન્તો વિચરન્તિ લોકે ન કાચિદેષાં પ્રતિપત્તિરાસીત્ ॥ ૯૨॥

અવાદિષં વેદવિઘાતદક્ષૈસ્તન્નાશકં જેતુમબુધ્યમાનઃ ।
તદીયસિદ્ધાન્તરહસ્યવાર્ધીર્ન્નિષેધ્યબોધાદ્ધિ નિષેધ્યબાધઃ ॥ ૯૩॥

તદા તદીયં શરણં પ્રપન્નઃ સિદ્ધાન્તમશ્રૌષમનુદ્ધતાત્મા ।
અદૂદુષદ્વૈદિકમેવ માર્ગં તથાગતો જાતુ કુશાગ્રબુદ્ધિઃ ॥ ૯૪॥

તદાऽપતન્મે સહસાऽશ્રુબિન્દુસ્તચ્ચાવિદુઃ પાર્શ્વનિવાસિનોऽન્યે ।
તદા પ્રભૃત્યેવ વિવેશ શઙ્કા મય્યાપ્તભાવં પરિહૃત્ય તેષામ્ ॥ ૯૫॥

વિપક્ષપાઠી બલવાન્ દ્વિજાતિઃ પ્રત્યાદદદ્દર્શનમસ્મદીયમ્ ।
ઉચ્ચાટનીયઃ કથમપ્યુપાયૈર્ન્નૈતાદૃશઃ સ્થાપયિતું હિ યોગ્યઃ ॥ ૯૬॥

સમ્મન્ત્ર્ય ચેત્થં કૃતનિશ્ચયાસ્તે યે ચાપરેऽહિંસનવાદશીલાઃ ।
ન્યપાતયન્નુચ્ચતરાત્ પ્રમત્તં મામગ્રસૌધાદ્વિનિપાતભીરુમ્ ॥ ૯૭॥

પતન્ પતન્ સૌધતલાન્યરોહં યદિ પ્રમાણં શ્રુતયો ભવન્તિ ।
જીવેયમસ્મિન્ પતિતોऽસમસ્થલે મજ્જીવને તચ્છ્રુતિમાનતા ગતિઃ ॥ ૯૮॥

યદીહ સન્દેહપદપ્રયોગાદ્વ્યાજેન શાસ્ત્રશ્રવણાચ્ચ હેતોઃ ।
મમોચ્ચદેશાત્પતતો વ્યનઙ્ક્ષીત્તદેકચક્ષુર્વિધિકલ્પના સા ॥ ૯૯॥

એકાક્ષરસ્યાપિ ગુરુઃ પ્રદાતા શાસ્ત્રોપદેષ્ટા કિમુ ભાષણીયમ્ ।
અહં હિ સર્વજ્ઞગુરોરધીત્ય પ્રત્યાદિશે તેન ગુરોર્મહાગઃ ॥ ૧૦૦॥

તદેવમિત્થં સુગતાદધીત્ય પ્રાઘાતયં તત્કુલમેવ પૂર્વમ્ ।

જૈમિન્યુપજ્ઞેઽભિનિવિષ્ટચેતાઃ શાસ્ત્રે નિરાસ્થં પરમેશ્વરં ચ ॥ ૧૦૧॥

દોષદ્વયસ્યાસ્ય ચિકીર્ષુરર્હન્ યથોદિતાં નિષ્કૃતિમાશ્રયાશમ્ ।
પ્રાવિક્ષમેષા પુનરુક્તભૂતા જાતા ભવત્પાદનિરીક્ષણેન ॥ ૧૦૨॥

ભાષ્યં પ્રણીતં ભવતેતિ યોગિન્નાકર્ણ્ય તત્રાપિ વિધાય વૃત્તિમ્ ।
યશોઽધિગચ્છેયમિતિ સ્મ વાઞ્છા સ્થિતા પુરા સમ્પ્રતિ કિં તદુક્ત્યા ॥ ૧૦૩॥

જાને ભવન્તમહમાર્યજનાર્થજાતમદ્વૈતરક્ષણકૃતે વિહિતાવતારમ્ ।
પ્રાગેવ ચેન્નયનવર્ત્મ કૃતાર્થયેથાઃ પાપક્ષયાય ન તદેદૃશમાચરિષ્યમ્ ॥ ૧૦૪॥

પ્રાયોઽધુના તદુભયપ્રભવાઘશાન્ત્યૈ
    પ્રાવિક્ષમાર્ય તુષપાવકમાત્તદીક્ષઃ ।
ભાગ્યં ન મેઽજનિ હિ શાબરભાષ્યવત્વ-
    દ્ભાષ્યેઽપિ કિઞ્ચન વિલિખ્ય યશોઽધિગન્તુમ્ ॥ ૧૦૫॥

ઇત્યૂચિવાંસમથ ભટ્ટકુમારિલં તમીષદ્વિકસ્વરમુખામ્બુજમાહ મૌની ।
શ્રુત્યર્થકર્મવિમુખાન્ સુગતાન્નિહન્તું જાતં ગુહં ભુવિ ભવન્તમહન્તુ જાને ॥ ૧૦૬॥

સમ્ભાવનાઽપિ ભવતો ન હિ પાતકસ્ય સત્યં વ્રતં ચરસિ સજ્જનશિક્ષણાય ।
ઉજ્જીવયામિ કરકામ્બુકણોક્ષણેન ભાષ્યેઽપિ મે રચય વાર્તિકમઙ્ગભવ્યમ્ ॥ ૧૦૭॥

ઇત્યૂચિવાંસં વિબુધાવતંસં સ ધર્મવિદ્ બ્રહ્મવિદાં વરેણ્યમ્ ।
વિદ્યાધનઃ શાન્તિધનાગ્રગણ્યં સમશ્રયં વાચમુવાચ ભૂયઃ ॥ ૧૦૮॥

નાર્હામિ શુદ્ધમપિ લોકવિરુદ્ધકૃત્યં કર્તું મયીઙ્ય મહિતોક્તિરિયં તવાર્હા ।
આજાનતોઽતિકુટિલેઽપિ જને મહાન્તસ્ત્વારોપયન્તિ હિ ગુણં ધનુષીવ શૂરાઃ ॥ ૧૦૯॥

સઞ્જીવનાય ચિરકાલમૃતસ્ય ચ ત્વં શક્તોઽસિ શઙ્કર દયોર્મિલદૃષ્ટિપાતૈઃ ।
આરબ્ધમેતદધુના વ્રતમાગમોક્તં મુઞ્ચન્ સતાં ન ભવિતાઽસ્મિ બુધાવિનિન્દ્યઃ ॥ ૧૧૦॥

જાને તવાહં ભગવન્ પ્રભાવં સંહૃત્ય ભૂતાનિ પુનર્યથાવત્ ।
સ્રષ્ટું સમર્થોઽસિ તથાવિધો મામુજ્જીવયેશ્ચેદિહ કિં વિચિત્રમ્ ॥ ૧૧૧॥

નાભ્યુત્સહે કિન્તુ યતિક્ષિતીન્દ્ર સઙ્કલ્પિતં હાતુમિદં વ્રતાગ્ર્યમ્ ।
તત્તારકં દેશિકવર્ય મહ્યમાદિશ્ય તદ્બ્રહ્મ કૃતાર્થયેથાઃ ॥ ૧૧૨॥

અયં ચ પન્થા યદિ તે પ્રકાશ્યઃ સુધીશ્વરો મણ્ડનમિશ્રશર્મા ।
દિગન્તવિશ્રાન્તયશા વિજેયો યસ્મિઞ્જિતે સર્વમિદં જિતં સ્યાત્ ॥ ૧૧૩॥

સદા વદન્ યોગપદં ચ સામ્પ્રતં સ વિશ્વરૂપઃ પ્રથિતો મહીતલે ।

મહાગૃહી વૈદિકકર્મતત્પરઃ પ્રવૃત્તિશાસ્ત્રે નિરતઃ સુકર્મઠઃ ॥ ૧૧૪॥

નિવૃત્તિશાસ્ત્રે નકૃતાદરઃ સ્વયં કેનાપ્યુપાયેન વશં સ નીયતામ્ ।
વશં ગતે તત્ર ભવેન્મનોરથસ્તદન્તિકં ગચ્છતુ મા ચિરં ભવાન્ ॥ ૧૧૫॥

ઉંવેક ઇત્યભિહિતસ્ય હિ તસ્ય લોકૈરુંવેતિ બાન્ધવજનૈરભિધીયમાના ।
હેતોઃ કુતશ્ચિદિહ વાવસુરુષાઽભિશમા દુર્વાસસાઽજનિ વધૂર્દયભારતીતિ ॥ ૧૧૬॥

સર્વાસુ શાસ્ત્રસરણીષુ સ વિશ્વરૂપો મત્તોઽધિકઃ પ્રિયતમશ્ચ મદાશ્રવેષુ ।
તત્પ્રેયસીં શમધનેન્દ્ર વિધાય સાક્ષ્યે વાદે વિજિત્ય તમિમં વશગં વિધેહિ ॥ ૧૧૭॥

તેનૈવ તાવકકૃતિષ્વપિ વાર્તિકાનિ કર્મન્દિવર્યતમ કારય મા વિલમ્બમ્ ।
ત્વં વિશ્વનાથ ઇવ મે સમયે સમાગાસ્તત્તારકં સમુપદિશ્ય કૃતાર્થયેથઃ ॥ ૧૧૮॥

નિર્વ્યાજકારુણ્ય મુહૂર્તમાત્રમત્ર ત્વયા ભાવ્યમહં તુ યાવત્ ।
યોગીન્દ્રહૃત્પઙ્કજભાગ્યમેતત્ ત્યજામ્યસૂન્ રૂપમવેક્ષમાણઃ ॥ ૧૧૯॥

ઇત્યૂચિવાંસમિમમિદ્ધસુખપ્રકાશં બ્રહ્મોપદિશ્ય બહિરન્તરપાસ્તમોહમ્ ।
તન્વન્દયાનિધિરસૌ તરસાઽભ્રમાર્ગાચ્છ્રીમણ્ડનસ્ય નિલયં સ ઇયેષ ગન્તુમ્ ॥ ૧૨૦॥

અથ ગિરમુપસંહૃત્યાદરાદ્ભટ્ટપાદઃ શમધનપતિનાસૌ બોધિતાદ્વૈતતત્વઃ ।
પ્રશમિતમમતઃ સંસ્તત્પ્રસાદેન સદ્યો વિદલદખિલબન્ધો વૈષ્ણવં ધામ પેદે ॥ ૧૨૧॥

ઇતિ શ્રીમાધવીયે તદ્વ્યાસસન્દર્શચિત્રગઃ
સઙ્ક્ષેપશઙ્કરજયે સર્ગોઽસૌ સપ્તમોઽભવત્ ॥ ૭॥

આદિતઃ શ્લોકાઃ ૭૮૪ ।

# શઙ્કરદિગ્વિજયમ્

## ॥ ૮. અષ્ટમઃ સર્ગઃ શ્રીમદાચાર્ય મણ્ડનમિશ્રસંવાદઃ ॥

અથાષ્ટમઃ સર્ગઃ ॥ ૮॥

અથ પ્રતસ્થે ભગવાન્ પ્રયાગાત્તં મણ્ડનં પણ્ડિતમાશુ જેતુમ્ ।
ગચ્છન્ ખસૃત્યા પુરમાલુલોકે માહિષ્મતીં મણ્ડનમણ્ડિતાં સઃ ॥ ૧॥

અવાતરદ્ભવિચિત્રવપ્રાં વિલોક્ય તાં વિસ્મિતમાનસોઽસૌ ।
પુરાણવત્પુષ્કરવર્તનીતઃ પુરોપકણ્ઠસ્થવને મનોજ્ઞે ॥ ૨॥

પ્રફુલ્લરાજીવવને વિહારી તરઙ્ગરિઙ્ગત્કણશીકરાર્દ્રઃ ।
રેવામરુત્કમ્પિતસાલમાલઃ શ્રમાપહૃદ્ ભાષ્યકૃતં સિષેવે ॥ ૩॥

તસ્મિન્ સ વિશ્રમ્ય કૃતાહ્નિકઃ સન્ ખસ્વસ્તિકારોહણશાલિનીને ।
ગચ્છન્નસૌ મણ્ડનપણ્ડિતૌકો દાસીસ્તદીયાઃ સ દદર્શ માર્ગે ॥ ૪॥

કુત્રાલયો મણ્ડનપણ્ડિતસ્યેત્યેતાઃ સ પપ્રચ્છ જલાય ગન્ત્રીઃ ।
તાશ્ચાપિ દૃષ્ટ્વાઽદ્ભુતશઙ્કરં તં સન્તોષવત્યો દદુરુત્તરં સ્મ ॥ ૫॥

સ્વતઃપ્રમાણં પરતઃ પ્રમાણં કીરાઙ્ગના યત્ર ગિરં ગિરન્તિ ।
દ્વારસ્થનીડાન્તરસન્નિરુદ્ધા જાનીહિ તન્મણ્ડનપણ્ડિતૌકઃ ॥ ૬॥

ફલપ્રદં કર્મ ફલપ્રદોઽજઃ કીરાઙ્ગના યત્ર ગિરં ગિરન્તિ ।
દ્વારસ્થનીડાન્તરસન્નિરુદ્ધા જાનીહિ તન્મણ્ડનપણ્ડિતૌકઃ ॥ ૭॥

જગદ્ ધ્રુવં સ્યાજ્જગદધ્રુવં સ્યાત્કીરાઙ્ગના યત્ર ગિરં ગિરન્તિ ।
દ્વારસ્થનીડાન્તરસન્નિરુદ્ધા જાનીહિ તન્મણ્ડનપણ્ડિતૌકઃ ॥ ૮॥

પીત્વા તદુક્તીરથ તસ્ય ગેહાદ્ગત્વા બહિઃ સદ્મ કવાટગુપ્તમ્ ।
દુર્વેશમાલોચ્ય સ યોગશક્ત્યા વ્યોમાધ્વનાઽવાતરદઙ્ગણાન્તઃ ॥ ૯॥

તદા સ લેખેન્દ્રનિકેતનાભં સ્ફુરન્મરુચ્ચચ્ચલકેતનાભમ્ ।
સમગ્રમાલોકત મણ્ડનસ્ય નિવેશનં ભૂતલમણ્ડનસ્ય ॥ ૧૦॥

સૌધાગ્રસઞ્છન્નનભોવકાશં પ્રવિશ્ય તત્પ્રાપ્ય કવેઃ સકાશમ્ ।
વિદ્યાવિશેષાત્તયશઃપ્રકાશં દદર્શ તં પદ્મજસન્નિકાશમ્ ॥ ૧૧॥

તપોમહિમ્નૈવ તપોનિધાનં સજૈમિનિં સત્યવતીતનુજમ્ ।
યથાવિધિ શ્રાદ્ધવિધૌ નિમન્ત્ર્ય તત્પાદપદ્માન્યવનેજયન્તમ્ ॥ ૧૨॥

તત્રાન્તરિક્ષાદવતીર્ય યોગિવર્યઃ સમાગમ્ય યથાર્હમેષઃ ।
દ્વૈપાયનં જૈમિનિમપ્યુભાભ્યાં તાભ્યાં સહર્ષં પ્રતિનન્દિતોઽભૂત્ ॥ ૧૩॥

અથ દ્યુમાર્ગાદવતીર્ણમન્તિકે મુન્યોઃ સ્થિતં જ્ઞાનશિખોપવીતિનમ્ ।
સંન્યાસ્યસાવિત્યવગત્ય સોઽભવત્પ્રવૃત્તિશાસ્ત્રૈકરતોઽપિ કોપનઃ ॥ ૧૪॥

તદાઽતિરુષ્ટસ્ય ગૃહાશ્રમેશિતુર્યતીશ્વરસ્યાપિ કુતૂહલમ્ભૃતઃ ।
ક્રમાત્કિલૈવં બુધશસ્તયોસ્તયોઃ પ્રશ્નોત્તરાણ્યાસુરથોત્તરોત્તરમ્ ॥ ૧૫॥

કુતો મુણ્ડ્યાગલામુણ્ડી પન્થાસ્તે પૃચ્છયતે મયા ।
કિમાહ પન્થાસ્ત્વન્માતા મુણ્ડેત્યાહ તથૈવ હિ ॥ ૧૬॥

પન્થાનં ત્વમપૃચ્છસ્ત્વાં પન્થાઃ પ્રત્યાહ મણ્ડન ।
ત્વન્માતેત્યત્ર શબ્દોઽયં ન માં બ્રૂયાદપૃચ્છકમ્ ॥ ૧૭॥

અહો પીતા કિમુ સુરા નૈવ શ્વેતા યતઃ સ્મર ।
કિં ત્વં જાનાસિ તદ્વર્ણમહં વર્ણં ભવાન્ રસમ્ ॥ ૧૮॥

મત્તો જાતઃ કલઞ્જાશી વિપરીતાનિ ભાષતે ।
સત્યં બ્રવીતિ પિતૃવત્ત્વત્તો જાતઃ કલઞ્જભુક્ ॥ ૧૯॥

કન્થાં વહસિ દુર્બુદ્ધે ગર્દભેનાપિ દુર્વહામ્ ।
શિખાયજ્ઞોપત્રીતાભ્યાં કસ્તે ભારો ભવિષ્યતિ ॥ ૨૦॥

કન્થાં વહામિ દુર્બુદ્ધે તવ પિત્રાપિ દુર્વહામ્ ।
શિખાયજ્ઞોપવીતાભ્યાં શ્રુતેર્ભારો ભવિષ્યતિ ॥ ૨૧॥

ત્યક્ત્વા પાણિગૃહીતીં સ્વામશક્ત્યા પરિરક્ષણે ।
શિષ્યપુસ્તકભારેચ્છોર્વ્યાખ્યાતા બ્રહ્મનિષ્ઠતા ॥ ૨૨॥

ગુરુશુશ્રૂષણાલસ્યાત્સમાવર્ત્ય ગુરોઃ કુલાત્ ।
સ્ત્રિયઃ શુશ્રૂષમાણસ્ય વ્યાખ્યાતા કર્મનિષ્ઠતા ॥ ૨૩॥

સ્થિતોઽસિ યોષિતાં ગર્ભે તાભિરેવ વિવર્ધિતઃ ।

અહો કૃતઘ્નતા કૃતાઘ્નતા(?) મૂર્ખ કથં તા એવં નિન્દસિ ॥ ૨૪॥

યાસાં સ્તન્યં ત્વયા પીતં યાસાં જાતોઽસિ યોનિતઃ ।
તાસુ મૂર્ખતમ સ્ત્રીષુ પશુવદ્રમસે કથમ્ ॥ ૨૫॥

વીરહત્યામવાપ્તોઽસિ વહ્નીનુદ્વાસ્ય યત્નતઃ
આત્મહત્યામવાપ્તસ્ત્વમવિદિત્વા પરં પદમ્ ॥ ૨૬॥

દૌવારિકાન્વઞ્ચયિત્વા કથં સ્તેનવદાગતઃ ।
ભિક્ષુભ્યોઽન્નમદત્વા ત્વં સ્તેનવદ્ભક્ષ્યસે કથમ્ ॥ ૨૭॥

કર્મકાલે ન સમ્ભાષ્ય અહં મૂર્ખેણ સમ્પ્રતિ ।
અહો પ્રકટિતં જ્ઞાનં યતિભઙ્ગેન ભાષિણા ॥ ૨૮॥

યતિભઙ્ગે પ્રવૃત્તસ્ય યતિભઙ્ગો ન દોષભાક્ ।
યતિભઙ્ગે પ્રવૃત્તસ્ય પઞ્ચમ્યન્તં સમસ્યતામ્ ॥ ૨૯॥

ક્વ બ્રહ્મ ક્વ ચ દુર્મેધાઃ ક્વ સંન્યાસઃ ક્વ વા કલિઃ ।
સ્વાન્નભક્ષકામેન વેષોઽયં યોગિનાં ધૃતઃ ॥ ૩૦॥

ક્વ સ્વર્ગઃ ક્વ દુરાચારઃ ક્વાગ્નિહોત્રં ક્વ વા કલિઃ ।
મન્યે મૈથુનકામેન વેષોઽયં કર્મિણાં ધૃતઃ ॥ ૩૧॥

ઇત્યાદિ દુર્વાક્યગણં બ્રુવાણે રોષેણ સાઽહઙ્કૃતિવિશ્વરૂપે ।
શ્રીશઙ્કરે વક્તરિ તસ્ય તસ્યોત્તરં ચ કૌતૂહલતશ્ચ ચારુ ॥ ૩૨॥

તં મણ્ડનં સમ્મિતજૈમિનીક્ષિતં વ્યાસોઽબ્રવીજ્જલ્પસિ વત્સ દુર્વચઃ ।
આચારણા નેયમનિન્દિતાત્મનાં જ્ઞાતાત્મતત્ત્વં યમિનં ધુતૈષણમ્ ॥ ૩૩॥

અભ્યાગતોઽસૌ સ્વયમેવ વિષ્ણુરિત્યેવ મત્વાઽઽશુ નિમન્ત્રય ત્વમ્ ।
ઇત્યાશ્રવં જ્ઞાતવિધિં પ્રતીતં સુધ્યગ્રણીઃ સાધ્વશિષન્મુનિસ્તમ્ ॥ ૩૪॥

અથોપસંસ્પૃશ્ય જલં સ શાન્તઃ સસમ્ભ્રમં મણ્ડનપણ્ડિતોઽપિ ।
વ્યાસાજ્ઞયા શાસ્ત્રવિદર્ચયિત્વા ન્યમન્ત્રયદ્ભૈક્ષ્યકૃતે મહર્ષિમ્ ॥ ૩૫॥

સ ચાબ્રવીત્સૌમ્ય વિવાદભિક્ષામિચ્છન્ ભવત્સન્નિધિમાગતોઽસ્મિ ।
સાઽન્યોન્યશિષ્યત્વપણા પ્રદેયા નાસ્ત્યાદરઃ પ્રાકૃતભક્તભૈક્ષ્યે ॥ ૩૬॥

મમ ન કિઞ્ચિદપિ ધ્રુવમીપ્સિતં શ્રુતિશિરઃપથવિસ્તૃતિમન્તરા ।
અવહિતેન મખેષ્વવધીરિતઃ સ ભવતા ભવતાપહિમદ્યુતિઃ ॥ ૩૭॥

જગતિ સમ્પ્રતિ તં પ્રથયામ્યહં સમભિભૂય સમસ્તવિવાદિનમ્ ।
ત્વમપિ સંશ્રય મે મતમુત્તમં વિગદ વા વદ વાઽસ્મિ જિતસ્ત્વિતિ ॥ ૩૮॥

ઇતિ યતિપ્રવરસ્ય નિશમ્ય તદ્વચનમર્થવદાગત વિસ્મયઃ ।
પરિભવેન નવેન મહાયશાઃ સ નિજગૌ નિજગૌરવમાસ્થિતઃ ॥ ૩૯॥

અપિ સહસ્રમુખે ફણિનામકે ન વિજિતસ્ત્વિતિ જાતુ ફણત્યયમ્ ।
ન ચ વિહાય મતં શ્રુતિસમ્મતં મુનિમતે નિપતેત્પરિકલ્પિતે ॥ ૪૦॥

અપિ કદાચિદુદેષ્યતિ કોવિદઃ સરસવાદકથાઽપિ ભવિષ્યતિ ।
ઇતિ કુતૂહલિનો મમ સર્વદા જયમહોઽયમહો સ્વયમાગતઃ ॥ ૪૧॥

ભવતુ સમ્પ્રતિ વાદકથાઽઽત્રયોઃ ફલતુ પુષ્કલશાસ્ત્રપરિશ્રમઃ ।
ઉપનતા સ્વયમેવ ન ગૃહ્યતે નવસુધા વસુધાવસથેન કિમ્ ॥ ૪૨॥

અયમહં યમહન્તુરપિ સ્વયં શમયિતા મયિ તાવકસદ્ગિરામ્ ।
સુકલહં કલહંસકલાભૃતાં દિશ સુધાંશુસુધામલસત્તનો ॥ ૪૩॥

અપિ તુ દુર્હૃદયસ્મયકાનનક્ષતિકઠોરકુઠારધુરન્ધરા ।
ન પટુતા મમ તે શ્રવણાન્તિકં નનુ ગતાઽનુગતાખિલદર્શના ॥ ૪૪॥

અત્યલ્પમેતદ્ભવતેરિતં મુને ભૈક્ષ્યં પ્રકુર્વે યદિ વાદદિત્સુતા ।
ગતોદ્યમોઽહં શ્રુતવાદવાર્તયા ચિરેપ્સિતેયં વદિતા ન કશ્ચન ॥ ૪૫॥

વાદં કરિષ્યામિ ન સન્દિહેઽત્ર જયાજયૌ નૌ વદિતા ન કશ્ચિત્ ।
ન કણ્ઠશોષૈકફલો વિવાદો મિથો જિગીષુ કુરુતસ્તુ વાદમ્ ॥ ૪૬॥

વાદે હિ વાદિપ્રતિવાદિનૌ દ્વૌ વિપક્ષપક્ષગ્રહણં વિધત્તઃ ।
કા નૌ પ્રતિજ્ઞા વદતોશ્ચ તસ્યાં કિં માનમિષ્ટં વદ કઃ સ્વભાવઃ ॥ ૪૭॥

કઃ પાર્ષ્ણિકોઽહં ગૃહમેધિસત્તમસ્ત્વં ભિક્ષુરાજો વદતામનુત્તમઃ ।
જયાજયો નૌ સુપણૌ વિધીયતાં તતઃ પરં સાધુ વદાવ સુસ્મિતૌ ॥ ૪૮॥

અદ્યાતિધન્યોઽસ્મિ યદાર્યપાદો મયા સહાભ્યર્થયતે વિવાદમ્ ।
ભવિષ્યતે વાદકથાઽપરેદ્યુર્માધ્યાહ્નિકિં સમ્પ્રતિ કર્મ કુર્યામ્ ॥ ૪૯॥

તથેતિ સૂક્તે સ્મિતશઙ્કરેણ ભવિષ્યતે વાદકથા શ્વ એવ ।
તત્સાક્ષિભાવં વ્રજતં મુનીન્દ્રાવિત્યર્થયદ્વાદરજૈમિની સઃ ॥ ૫૦॥

વિધાય ભાર્યાં વિદુષીં સદસ્યાં વિધીયતાં વાદકથા સુધીન્દ્ર ।
ઇત્થં સરસ્વત્યવતારતાજ્ઞૌ તદ્ધર્મપત્ન્યાસ્તમભાષિષાતામ્ ॥ ૫૧॥

અથાનુમોદ્યાભિહિતં મુનિભ્યાં સ મણ્ડનાર્યઃ પ્રકૃતં ચિકીર્ષુઃ ।
આનર્ચ દૈવોપગતાન્મુનીન્દ્રાનગ્નીનિવ ત્રીન્મુનિશેખરાંસ્તાન્ ॥ ૫૨॥

ભુક્ત્વોપવિષ્ટસ્ય મુનિત્રયસ્ય શ્રમાપનોદાય તદીયશિષ્યૌ ।
અતિષ્ઠતાં પાર્શ્વગતૌ વટૂ દ્વૌ સચામરૌ વીજનમાચરન્તૌ ॥ ૫૩॥

અથ ક્રિયાન્તે કિલ સુપવિષ્ટાસ્ત્રય્યન્તવેદ્યાર્થવિદસ્ત્રયોઽપી ।
અમન્ત્રયંશ્ચારુ પરસ્પરં તે મુહૂર્તમાત્રં કિમપિ પ્રહૃષ્ટાઃ ॥ ૫૪॥

તેષાં દ્વિજેન્દ્રાલયનિર્ગતાનામદર્શનં જગ્મતુરઞ્જસા દ્વૌ ।
રેવાતટે રમ્યકદમ્બજાલે દેવાલયેઽત્ર સ્થિતવાંસ્તૃતીયઃ ॥ ૫૫॥

ઇતિ સ યતિવરેણ્યો દૈવયોગાદ્ગુરૂણાં
  ઇતરજનદુરાપં દર્શનં પ્રાપ્ય હૃષ્ટઃ ।
તદુદિતવચનાનિ શ્રાવયન્નાત્મશિષ્યાન્
  અનયદમૃતતુલ્યાન્યાત્મવિત્તાં ત્રિયામામ્ ॥ ૫૬॥

પ્રાતઃ શોણસરોજબાન્ધવરુચિપ્રદ્યોતિતે વ્યોમનિ
  પ્રખ્યાતઃ સ વિધાય કર્મ નિયતં પ્રજ્ઞાવતામગ્રણીઃ ।
સાકં શિષ્યવરૈઃ પ્રપદ્ય સદનં સન્મણ્ડિતં માણ્ડનં
  વાદાયોપવિવેશ પણ્ડિતસભામધ્યે મુનિધ્યેર્ધ્યેયવિત્ ॥ ૫૭॥

તતઃ સમાદિશ્ય સદસ્યતાયાં સધર્મિણીં મણ્ડનપણ્ડિતોઽપિ
અ શારદાં નામ સમસ્ત વિદ્યાવિશારદાં વાદસમુત્સુકોઽભૂત્ ॥ ૫૮।
પત્યા નિયુક્તા પતિદેવતા સા સદસ્યભાવે સુદતી ચકાશે ।
તયોર્વિવેક્તું શ્રુતતારતમ્યં સમાગતા સંસદિ ભારતીવ ॥ ૫૯॥

પ્રવૃદ્ધવાદોત્સુકતાં તદીયાં વિજ્ઞાય વિજ્ઞઃ પ્રથમં યતીન્દ્રઃ ।
પરાવરજ્ઞઃ સ પરાવરૈક્યપરાં પ્રતિજ્ઞામકરોત્સ્વકીયામ્ ॥ ૬૦॥

બ્રહ્મૈકં પરમાર્થસચ્ચિદમલં વિશ્વમપ્રઞ્ચાત્મના
  શુક્તી રૂપ્યપરાત્મનેવ બહલાજ્ઞાનાવૃતં ભાસતે ।
તજ્જ્ઞાનાન્નિખિલમપ્રપઞ્ચનિલયા સ્વાત્મવ્યવસ્થા પરં
  નિર્વાણં જનિમુક્તમભ્યુપગતં માનં શ્રુતેર્મસ્તકમ્ ॥ ૬૧॥

બાઢં જયે યદિ પરાજયભાગહં સ્યાં સંન્યાસમઙ્ગ પરિહત્ય કષાયચેલમ્ ।
શુક્લં વસીય વસનં દ્વયભારતીયં વાદે જયાજયફલપ્રતિદીપિકાઽસ્તુ ॥ ૬૨॥

ઇત્થં પ્રતિજ્ઞાં કૃતવત્યુદારાં શ્રીશઙ્કરે ભિક્ષુવરે સ્વકીયામ્ ।
સ વિશ્વરૂપો ગૃહમેધિવર્યશ્ચક્રે પ્રતિજ્ઞાં સ્વમતપ્રતિષ્ઠામ્ ॥ ૬૩॥

વેદાન્તા ન પ્રમાણં ચિતિવપુષિ પદે તત્ર સઙ્ગત્યયોગા-
ત્પૂર્વો ભાગઃ પ્રમાણં પદચયગમિતે કાર્યવસ્તુન્યશેષે ।
શબ્દાનાં કાર્યમા પ્રતિ સમધિગતા શક્તિરભ્યુન્નતાનાં
કર્મભ્યો મુક્તિરિષ્ટા તદિહ તનુભૃતામાऽऽયુષઃ સ્યાત્સમાપ્તેઃ ॥ ૬૪॥

વાદે કૃતેऽસ્મિન્યદિ મે જયાન્યસ્ત્વયોદિતાત્સ્યાદ્વિપરીતભાવઃ ।
યેયં ત્વયાऽભૂદ્વદિતા પ્રસાક્ષ્યે જાનાતિ ચેત્સા ભવિતા વધૂર્મે ॥ ૬૫॥

જેતુઃ પરાજિત ઇહાશ્રમમાદદીતેત્યેતૌ મિથઃ કૃતપણૌ યતિવિશ્વરૂપૌ ।
અમ્બામુદારધિષણામભિષિચ્ય સાક્ષ્યે જલ્પં વિતેનતુરથો જયદત્તદૃષ્ટી ॥ ૬૬॥

આવશ્યકં પરિસમાપ્ય દિને દિને તૌ વાદં સમં વ્યતનુતાં કિલ સર્વવેદૌ ।
એવં વિજેતુમનસોરુપવિષ્ટયોસ્તાં માલાં ગલે ન્યધિતસોભયભારતીયમ્ ॥ ૬૭॥

માલા યદા મલિનભાવમુપૈતિ કણ્ઠે યસ્યાપિ તસ્ય વિજયેતરનિશ્ચયઃ સ્યાત્ ।
ઉક્ત્તવા ગૃહં ગતવતી ગૃહકર્મસક્તા ભિક્ષાશને પિચરિતું ગૃહિમસ્કરિભ્યામ્ ॥ ૬૮॥

અન્યોન્યસઞ્જયફલે વિહિતાદરૌ તૌ વાદં વિવાદપરિનિર્ણયમાતનિષ્ટામ્ ।
બ્રહ્માદયઃ સુરવરા અપિ વાહનસ્થાઃ શ્રોતું તદીયસદને સ્થિતવન્ત ઊર્ધ્વમ્ ॥ ૬૯॥

તતસ્તયોરાસ મહાન્વિવાદઃ સદસ્યવિશ્રાણિતસાધુવાદઃ
સ્વપક્ષસાક્ષીકૃતસર્વવેદઃ પરસ્પરસ્યાપિ કૃતપ્રમોદઃ ॥ ૭૦॥

દિને દિને ચાધિગતપ્રકર્ષો ભૂરીભવત્પણ્ડિતસન્નિકર્ષઃ
અન્યોન્યભઙ્ગાહિતતીવ્રતર્ષસ્તથાऽપિ દુરીકૃતજન્યમર્ષઃ ॥ ૭૧॥

દિને દિને વાસરમધ્યમે સા બ્રૂતે પતિં ભોજનકાલમેવ ।
સમેત્ય ભિક્ષું સમયં ચ ભૈક્ષ્યે દિનાન્યભૂન્નિતિ પઞ્ચષાણિ ॥ ૭૨॥

અન્યોન્યમુત્તરમખણ્ડયતાં પ્રગલ્ભં
બદ્ધાસનૌ સ્મિતવિકાસિમુખારવિન્દૌ
ન સ્વેદકમ્પગગનેક્ષણશાલિનૌ વા
ન ક્રોધવાક્છલમવાદિ નિરુત્તરાભ્યામ્ ॥ ૭૩॥

તતો યતિક્ષ્માભૃદવેક્ષ્ય દાક્ષ્યં ક્ષોદક્ષમં તસ્ય વિચક્ષણસ્ય ।
ચિક્ષેપ તં ક્ષોભિત સર્વપક્ષં વિદ્વત્સમક્ષાપ્રતિભાતકક્ષ્યમ્ ॥ ૭૪॥

તતઃ સ્વસિદ્ધાન્તસમર્થનાય પ્રાગલ્ભ્યહીનોઽપિ સ સભ્યમુખ્યઃ ।
જગાદ વેદાન્તવચઃપ્રસિદ્ધમદ્વૈતસિદ્ધાન્તમપાકરિષ્ણુઃ ॥ ૭૫॥

ભો ભો યતિક્ષ્માધિપતે ભવદ્ભિર્જીવેશયોર્વાસ્તવમૈકરૂપ્યમ્ ।
વિશુદ્ધમઙ્ગીક્રિયતે હિ તત્ર પ્રમાણમેવં ન વયં પ્રતીમઃ ॥ ૭૬॥

સ પ્રત્યવાદીદિદમેવ માનં યચ્છ્વેતકેતુપ્રમુખાન્વિનેયાન્ ।
ઉદ્દાલકાદ્યા ગુરવો મહાન્તઃ સઙ્ગ્રાહયન્ત્યાત્મતયા પરેશમ્ ॥ ૭૭॥

વેદાવસાનેષુ હિ તત્ત્વમાદિવચાંસિ જપ્તાન્યઘમર્પણાનિ ।
હુમ્ફણ્મુખાનીવ વચાંસિ યોગિન્નેષાં વિવક્ષાઽસ્તિ કુહસ્વિદર્થે ॥ ૭૮॥

અર્થાપ્રતીતૌ કિલ હુમ્ફડાદેર્જપોપયોગિત્વમભાણિ વિજ્ઞૈઃ ।
અર્થપ્રતીતૌ સ્ફુટમત્ર સત્યાં કથં ભવેત્પ્રાજ્ઞ જપાર્થતૈવ ॥ ૭૯॥

આપાતતસ્તત્વમસીતિ વાક્યાદ્યતીશ જીવેશ્વરયોરભેદઃ ।
પ્રતીયતેઽથાઽપિ મખાદિકર્તૃપ્રશંસયા સ્યાદ્વિધિશેષ એવ ॥ ૮૦॥

ક્ત્વઙ્ગયૂપાદિકમર્યમાદિદેવાત્મના વાક્યગણઃ પ્રશંસન્ ।
શેષઃ ક્રિયાકાણ્ડગતો યદિ સ્યાત્કાણ્ડાન્તરસ્થોઽપિ ભવેત્કથં સઃ ॥ ૮૧॥

તર્હ્યસ્તુ જીવે પરમાત્મદૃષ્ટિવિધાયકઃ કર્મસમૃદ્ધયેઽર્હન્ ।
અબ્રહ્મણિ બ્રહ્મધિયં વિધત્તે યથા મનોઽન્નાર્કનભસ્વદાદૌ ॥ ૮૨॥

સંશ્રૂયતેઽન્યત્ર યથા લિઙાદિર્વિધાયકો બ્રહ્મવિભાવનાય ।
તથા વિધેરશ્રવણાન્મનીષિન્ સઞ્જાઘટીત્યત્ર કથં વિધાનમ્ ॥ ૮૩॥

યદ્વત્પ્રતિષ્ઠાફલદર્શનેન વિધિર્યતીનાં વર રાત્રિસત્રે ।
પ્રકલ્પ્યતે તદ્વદિહાપિ મુક્તિફલશ્રુતેઃ કલ્પયિતું સ યુક્તઃ ॥ ૮૪॥

તર્હિ ક્રિયાજન્યતયા વિમુક્તિઃ સ્વર્ગાદિવદ્ધન્ત વિનશ્વરા સ્યાત્ ।
ઉપાસના કર્તુમકર્તુમન્યથા વા કર્તુમર્દા મનસઃ ક્રિયૈવ ॥ ૮૫॥

મા ભૂદિદં તસ્વમસીતિ વાક્યમુપાસનાપર્યવસાયિ કામમ્ ।
કિન્ત્વસ્ય જીવસ્ય પરેણ સામ્યપ્રત્યાયકં સત્તમ બોભવીતુ ॥ ૮૬॥

કિં ચેતનત્વેન વિવક્તિ સામ્યં સાર્વજ્ઞ્યસાર્વાત્મ્યમુખૈર્ગુણૈર્વા ।
આદ્યે પ્રસિદ્ધં ન ખલૂપદેશ્યમન્તે સ્વસિદ્ધાન્તવિરુદ્ધતા સ્યાત્ ॥ ૮૭॥

નિત્યત્વમાત્રેણં મુને પરાત્મગુણોપમાનૈઃ સુખબોધપૂર્વૈઃ ।
ગુણૈરવિદ્યાવૃતિતોઽપ્રતીતૈઃ સામ્યં બ્રવીત્વસ્ય તતો ન દોષઃ ॥ ૮૮॥

યદ્યેવમેતસ્ય પરત્વમેવ પ્રત્યાયયત્વત્ર દુરાગ્રહઃ કઃ ।
ત્વયૈવ તસ્ય પ્રતિભાસશઙ્કા વિદ્ધન્નવિદ્યાવરણાન્નિરસ્તા ॥ ૮૯ ॥

ભોશ્ચેતનત્વેન શરીરિસામ્યમાવેદ્યતાપસ્ય જગત્પ્રસૃતેઃ ।
ચિદુત્થિતત્વેન પરોદિતસ્યાપ્યણુપ્રધાનપ્રભૃતેર્નિરાસઃ ॥ ૯૦ ॥

હન્તૈવમસ્તીતિ તદા પ્રયોગઃ સ્યાત્ત્વન્મતે તત્ત્વમસીતિ ન સ્યાત્ ।
તદૈક્ષતેત્યત્ર જડત્વશઙ્કાવ્યાવર્તનાચ્ચાત્ર પુનર્ન ચોદ્યમ્ ॥ ૯૧ ॥

ન ત્વેવમપ્યૈક્યપરત્વમસ્ય પ્રત્યક્ષપૂર્વપ્રમિતિપ્રકોપાત્ ।
ન યુજ્યતે તજ્જપમાત્રયોગિસ્વાધ્યાયવિધ્યાશ્રિતમભ્યુપેયમ્ ॥ ૯૨ ॥

અક્ષેણ ચેદ્ભેદમિતિસ્તદા સ્યાદભેદવાદિશ્રુતિવાક્યબાધઃ ।
અસન્નિકર્ષાન્ન ભવેદ્ધિ ભેદપ્રમૈવ તેનાસ્ય કુતો વિરોધઃ ॥ ૯૩ ॥

ભિન્નોઽહમીશાદિતિ ભાસતે હિ ભેદસ્ય જીવાત્મવિશેષણત્વમ્ ।
તત્સન્નિકર્ષોઽસ્ત્વથ સમ્પ્રયોગાભાવેઽપિ ભેદેન્દ્રિયયોર્મનીષિન્ ॥ ૯૪ ॥

અતિપ્રસક્તેર્ન તુ કેવલસ્ય વિશેષણત્વસ્ય તદભ્યુપેયમ્ ।
ભેદાશ્રયે હીન્દ્રિયસન્નિકૃષ્ટે ન સન્નિકૃષ્ટત્વમિહાત્મનોઽસ્તિ ॥ ૯૫ ॥

ભેદાશ્રયાત્મેન્દ્રિયસન્નિકર્ષો નેત્યુક્તમેતચ્ચતુરં ન યસ્માત્ ।
ચિત્તાત્મનોર્દ્રવ્યતયા દ્વયોરપ્યસ્ત્યેવ સંયોગસમાશ્રયત્વમ્ ॥ ૯૬ ॥

આત્મા વિભુઃ સ્વાદથવાઽણુમાત્રઃ સંયોગિતા નોભયથાઽપિ યુક્તા ।
દૃષ્ટા હિ સા સાવયવસ્ય લાકે સંયોગિતા સાવયવેન યોગિન્ ॥ ૯૭ ॥

મનોઽક્ષમિત્યભ્યુપગમ્ય ભેદાસઙ્ગિત્વમુક્તં પરમાર્થતસ્તુ ।
સાહાય્યકૃલ્લોચનપૂર્વકસ્ય દીપાદિવન્નેન્દ્રિયમેવ ચિત્તમ્ ॥ ૯૮ ॥

ભેદપ્રમા નેન્દ્રિયજાઽસ્તુ તર્હિ સાક્ષિસ્વરૂપૈવ તથાઽપિ યોગિન્ ।
તયા વિરોધાત્પરમાત્મજીવાભેદં કથં બોધયિતું પ્રમાણમ્ ॥ ૯૯ ॥

પ્રત્યક્ષમાત્મેશ્વરયોરવિદ્યામાયાયુજોર્દ્યોતયતિ પ્રભેદમ્ ।
શ્રુતિસ્તયોઃ કેવલયોરભેદં ભિન્નાશ્રયત્વાન્ન તયોર્વિરોધઃ ॥ ૧૦૦ ॥

સ્યાદ્વા વિરોધસ્તદપિ પ્રવૃત્તં પ્રત્યક્ષમગ્રેઽબલમેવ બાધ્યમ્ ।
પ્રાબલ્યવત્યા ચરમપ્રવૃત્યા શ્રુત્યાહ્યપચ્છેદનયોક્તરીત્યા ॥ ૧૦૧ ॥

નન્વેવમપ્યસ્ત્યનુમાનબાધોઽભેદશ્રુતેઃ સંયમિચક્રવર્તિન્ ।

ઘટાદિવદ્બ્રહ્મનિરૂપિતેન ભેદેન યુક્તોઽયમસર્વવિત્વાત્ ॥ ૧૦૨॥

કિમેષ ભેદઃ પરમાર્થભૂતઃ પ્રસાધ્યતે કાલ્પનિકોઽથવાઽઽદ્યે ।
દૃષ્ટાન્તહાનિશ્ચરમે તુ વિદ્વન્નૂરીકૃતોઽસ્માભિરસાધનીયઃ ॥ ૧૦૩॥

સ્વપ્રત્યયાબાધ્યભિદાશ્રયત્વં સાધ્યં ઘટાદૌ ચ તદસ્તિ યોગિન્ ।
ત્વયાઽઽત્મબોધેન ભિદા ન બાધ્યેત્યનભ્યુપેતેતિ ન કોઽપિ દોષઃ ॥ ૧૦૪॥

નનુ સ્વશબ્દેન સુખાદિમાન્વા વિવક્ષિતસ્તદ્વિધુરોઽથવાઽઽત્મા ।
આદ્યોઽસ્મદિષ્ટં નનુ સાધ્યમન્ત્યે દૃષ્ટાન્તહાનિઃ પુનરેવ તે સ્યાત્ ॥ ૧૦૫॥

યોગિન્નનૌપાધિકભેદવત્ત્વં વિવક્ષિતં સાધ્યમિહ ત્વદિષ્ટઃ ।
ઔપાધિકસ્ત્વીશ્વરજીવભેદો ઘટેશભેદો નિરુપાધિકશ્ચ ॥ ૧૦૬॥

ઘટેશભેદેઽપ્યુપધિર્હ્યવિદ્યા તવાનુમાનેષુ જડત્વમેવ ।
ચિત્વાદભિન્નઃ પરવત્પરસ્માદાત્મેતિ વાઽત્ર પ્રતિપક્ષહેતુઃ ॥ ૧૦૭॥

ધર્મિપ્રમાબાધ્યશરીરિભેદો હ્યસંસૃતૌ બ્રહ્મણિ સાધ્યમિષ્ટમ્ ।
ત્વયેષ્યતે બ્રહ્મધિયાઽઽત્મભેદો બાધ્યો ઘટાદિપ્રમયા ત્વબાધ્યઃ ॥ ૧૦૮॥

કિં કૃત્સ્નધર્મિપ્રમયા ન બાધ્યઃ કિં વા સ યત્કિઞ્ચનધર્મિબોધાત્ ।
ઘટાધિકે બ્રહ્મણિ ચાત્મભેદસ્યૈક્યાત્ પુનઃ સ્યાન્નનુ પૂર્વદોષઃ ॥ ૧૦૯॥

કિઞ્ચાગુણો વા સગુણો મનીષિન્વિવક્ષ્યતે ધર્મિપદેન નાન્ત્યઃ ।
ભેદસ્ય તદ્બુધ્યવિબાધ્યતેષ્ટેર્નાદ્યશ્ચ તત્રોભયથાઽપિ દોષાત્ ॥ ૧૧૦॥

કિં નિર્વિશેષ પ્રમિતં ન વાઽન્ત્યે પ્રાપ્તાઽઽશ્રયાસિદ્ધિરથાદ્યકલ્પે ।
શરીર્યભેદેન પરસ્ય સિદ્ધેઃ પ્રાપ્તિ ધર્મિગ્રહમાનકોષઃ ॥ ૧૧૧॥

ભો દ્વા “સુપર્ણા સયુજા સખાયે”ત્યાદ્યા શ્રુતિર્ભેદમુદીરયન્તી ।
જીવેશયોઃ પિપ્પલભોક્ત્રભોક્ત્રસ્તયોરભેદશ્રુતિબાધિકાઽસ્તુ ॥ ૧૧૨॥

પ્રત્યક્ષસિદ્ધે વિફલે પરાત્મભેદે શ્રુતિર્નો નયવિત્પ્રમાણમ્ ।
સ્યાદન્યથા માનમતત્પરોઽપિ સ્વાર્થેઽર્થવાદઃ સકલોઽપિ વિદ્વન્ ॥ ૧૧૩॥

સ્મૃતિપ્રસિદ્ધાર્થવિબોધિ વાક્યં યથેષ્યતે મૂલતયા પ્રમાણમ્ ।
પ્રત્યક્ષસિદ્ધાર્થકવાક્યમેવં સ્યાદેવ તન્મૂલતયા પ્રમાણમ્ ॥ ૧૧૪॥

શ્રુતિઃ સ્મૃતેઽર્થે યદિ વેદવિદ્ભિર્ભવેન્ન તન્મૂલતયા પ્રમાણમ્ ।
કથં ભવેદ્વેદકથાનભિજ્ઞૈર્જ્ઞાતેઽપિ ભેદે પરજીવયોઃ સા ॥ ૧૧૫॥

જીવેશ્વરૌ સા વદતીત્યુપેત્ય પ્રાવોચમેતત્પરમાર્થતસ્તુ ।
વિવિચ્ય સત્વાત્પુરુષં સમસ્તસંસારરાહિત્યમમુષ્ય વક્તિ ॥ ૧૧૬॥

યદીયમાખ્યાત્યથ સત્ત્વજીવૌ વિહાય સર્વજ્ઞશરીરભાજૌ ।
જડસ્ય ભોક્તૃત્વમુદાહરન્તી પ્રામાણ્યમર્હન્ કથમશ્નુવીત ॥ ૧૧૭॥

ન ચોદનીયા વયમત્ર વિદ્વન્ યતસ્ત્વયા પૈઙ્ગિરહસ્યમેવ ।
અત્તીતિ સત્વં ત્વભિપશ્યતિ જ્ઞ ઇતિ સ્મ સમ્યગ્વિવૃણોતિ મન્ત્રમ્ ॥ ૧૧૮॥

શરીરવાચી નનુ સત્ત્વશબ્દઃ ક્ષેત્રજ્ઞશબ્દઃ પરમાત્મવાચી ।
તત્રાપ્યતો નાન્યપરત્વમસ્ય વાક્યસ્ય પૈઙ્ગયોદિતવર્ત્મનાઽપિ ॥ ૧૧૯॥

તદેતદિત્યાદિગિરા હિ ચિત્તે પ્રદર્શિતા સત્વપદસ્ય વૃત્તિઃ ।
ક્ષેત્રજ્ઞશબ્દસ્ય ચ વૃત્તિરુક્તા શારીરકે દ્રષ્ટરિ તત્ર વિદ્વન્ ॥ ૧૨૦॥

યેનેતિ હિ સ્વપ્નદૃશિક્રિયાયાઃ કર્તોચ્યતે તત્ર સ જીવ એવ ।
ક્ષેત્રજ્ઞશબ્દાભિહિતશ્ચ યોગિન્ સ્યાત્સ્વપ્નદૃક્ સર્વવિદીશ્વરોઽપિ ॥ ૧૨૧॥

તિઙ્પ્રત્યયેનાભિહિતોઽત્ર કર્તા તતસ્તૃતીયા કરણેઽભ્યુપેયા ।
દ્રષ્ટા ચ શારીરતયા મનીષિન્ વિશેષ્યતે તેન સ નેશ્વરઃ સ્યાત્ ॥ ૧૨૨॥

વૃત્તિઃ શરીરે ભવતીત્યમુષ્મિન્નર્થે હિ શારીરપદસ્ય યોગિન્ ।
તસ્મિન્ ભવન્ સર્વગતો મહેશઃ કથં ન શારીરપદાભિધેયઃ ॥ ૧૨૩॥

ભવચ્છરીરાદિતરત્ર ચેશઃ કથં ચ શારીરપદાભિધેયઃ ।
નભઃ શરીરેઽપિ ભવત્યથાપિ ન કેઽપિ શારીરમિતીરયન્તિ ॥ ૧૨૪॥

યદ્યેષ મન્ત્રોઽનભિધાય જીવપ્રાજ્ઞૌ વદેદ્બુદ્ધિશરીરભાજૌ ।
અત્તીતિ ભોક્તૃત્વમચેતનાયા બુદ્ધેર્વદેત્તર્હિ કથં પ્રમાણમ્ ॥ ૧૨૫॥

અદાહકસ્યાપ્યયસઃ કૃશાનોરાશ્લેષણાદ્દાહકતા યથાઽઽસ્તે ।
તથૈવ ભોક્તૃત્વમચેતનાયા બુદ્ધેરપિ સ્યાચ્ચિદનુપ્રવેશાત્ ॥ ૧૨૬॥

છાયાતપૌ યદ્વદ્વતીવ ભિન્નૌ જીવેશ્વરૌ તદ્વદિતિ બ્રુવાણા ।
ઋતં પિબન્તાવિતિ કાઠકેષુ શ્રુતિસ્ત્વભેદશ્રુતિબાધિકાઽસ્તુ ॥ ૧૨૭॥

ભેદં વદન્તી વ્યવહારસિદ્ધં ન બાધતેઽભેદપરશ્રુતિં સા ।
એષા ત્વપૂર્વાર્થતયા બલિષ્ઠા ભેદશ્રુતેઃ પ્રત્યુત બાધિકા સ્યાત્ ॥ ૧૨૮॥

માનાન્તરોપોદ્બલિતા હિ ભેદશ્રુતિર્બલિષ્ઠા યમિનાં વરેણ્ય ।
તદ્બાધિતું સા પ્રભવત્યભેદશ્રુતિં પ્રમાણાન્તરબાધિતાર્થામ્ ॥ ૧૨૯॥

પ્રાબલ્યમાપાદયતિ શ્રુતીનાં માનાન્તરં નૈવ બુધાગ્રયાયિન્ ।
ગતાર્થતાદાનમુખેન તાસાં દૌર્બલ્યસમ્પાદકમેવ કિન્તુ ॥ ૧૩૦॥

ઇત્યાદ્યા દૃઢયુક્તિરસ્ય શુશુભે દત્તાનુમોદા ગિરાં
દેવ્યા તાદૃશવિશ્વરૂપરભસાવષ્ટમ્ભમુષ્ટિન્ધયા ।
ભર્તૃન્યાસવિલક્ષ્યસૂક્તિજનનીસાક્ષિત્વકુક્ષિમ્ભરિઃ
સશ્લાઘાદ્ભુતપુષ્પવૃષ્ટિલહરી સૌગન્ધ્યપાણિન્ધયા ॥ ૧૩૧॥

ઇત્થં યતિક્ષિતિપતેરનુમોદ્ય યુક્તિં માલાં ચ મણ્ડનગલે મલિનામવેક્ષ્ય ।
ભિક્ષાર્થમુચ્ચલતમદ્ય યુવામિતીમાવાચષ્ટ તં પુનરુવાચ યતીન્દ્રમમ્બા ॥ ૧૩૨॥

કોપાતિરેકવશતઃ શપતા પુરા માં દુર્વાસસા તદવધિર્વિહિતો જયસ્તે ।
સાઽહં યથાગતમુપૈમિ શમિપ્રવીરેત્યુક્ત્વા સસમ્ભ્રમમમું નિજધામ યાન્તીમ્ ॥ । ૧૩૩॥

બબન્ધ નિઃશઙ્કમરણ્યદુર્ગામન્ત્રેણ તાં જેતુમના મુનીન્દ્રઃ ।
જયોઽપિ તસ્યાઃ સ્વમતૈક્યસિદ્ધ્યૈ સાર્વજ્ઞતઃ સ્વસ્ય ન માનહેતોઃ ॥ ૧૩૪॥

જાનામિ દેવીં ભવતીં વિધાતુર્દેવસ્ય ભાર્યાં પુરભિત્સગર્ભ્યામ્ ।
ઉપાત્તલક્ષ્મ્યાદિવિચિત્રરૂપાં ગુપ્ત્યૈ પ્રપઞ્ચસ્ય કૃતાવતારામ્ ॥ ૧૩૫॥

વ્રજ જનનિ તદા ત્વં ભક્તચૂડામણિસ્તે
નિજપદમનુદાસ્યામ્યભ્યનુજ્ઞાં યદૈતુમ્ ।
ઇતિ નિજવચનેઽસ્મિઞ્છારદાસમ્મતેઽસૌ
મુનિરથ મુદિતોઽભૂન્માણ્ડનં હૃદ્ભુભુત્સુઃ ॥ ૧૩૬॥

ઇતિ શ્રીમાધવીયે તન્મણ્ડનાર્યકથાપરઃ ।
સઙ્ક્ષેપશઙ્કરજયે સર્ગોઽસાવષ્ટમોઽભવત્ ॥ ૮॥

આદિતઃ શ્લોકાઃ ૯૨૦ ।

# શઙ્કરદિગ્વિજયમ્

## ॥ ૯. નવમઃ સર્ગઃ શ્રીમદાચાર્યસરસ્વતીસંવાદઃ ॥

અથ નવમઃ સર્ગઃ ॥ ૯॥

અથ સંયમિક્ષિતિપતેર્વચનૈર્નિગમાર્થનિર્ણયકરૈઃ સનયૈઃ ।
શમિતાગ્રહોઽપિ પુનરપ્યવદત્ કૃતસંશયઃ સપદિ કર્મજડઃ ॥ ૧॥

યતિરાજ સમ્પ્રતિ મમાભિનવાન્ન વિષાદિતોઽસ્મ્યપજયાદપિ તુ ।
અપિ જૈમિનીયવચનાન્યહહોન્મથિતાનિ હીતિ ભૃશમસ્મિ કૃશઃ ॥ ૨॥

સ હિ વેત્ત્યનાગતમતીતમપિ પ્રિયકૃત્સમસ્તજગતોઽધિકૃતઃ ।
નિગમપ્રવર્તનવિધૌ સ કથં તપસાં નિધિર્વિતથસૂત્રપદઃ ॥ ૩॥

ઇતિ સન્દિહાનમવદત્તમસૌ ન હિ જૈમિનાવપનયોઽસ્તિ મનાક્ ।
પ્રમિમીમહે ન વયમેવ મુનેર્હૃદયં યથાવદનભિજ્ઞતયા ॥ ૪॥

યદિ વિદ્યતે કવિજનાવિદિતં હૃદયં મુનેસ્તદિહ વર્ણય ભોઃ ।
યદિ યુક્તમત્ર ભવતા કથિતં હૃદિ કુર્મહે દલદહઙ્કૃતયઃ ॥ ૫॥

અભિસન્ધિમાનપિ પરે વિષયપ્રસન્મતીનનુજિઘૃક્ષુરસૌ ।
તદવાપ્તિસાધનતયા સકલં સુકૃતં ન્યરૂપયદિતિ સ્મ પરમ્ ॥ ૬॥

વચનં તમેતમિતિ ધર્મચયં વિદધાતિ બોધજનિહેતુતયા ।
તદપેક્ષયૈવ સ ચ મોક્ષપરો નિરધારયન્ન પરથેતિ વયમ્ ॥ ૭॥

શ્રુતયઃ ક્રિયાર્થકતયા સફલા અતદર્થકાનિ તુ વચાંસિ વૃથા ।
ઇતિ સૂત્રયન્નનુ કથં મુનિરાડપિ સિદ્ધવસ્તુપરતાં મનુતે ॥ ૮॥

શ્રુતિરાશિરદ્વયપરોઽપિ પરમ્પરયાઽઽત્મબોધફલકર્મણિ ચ ।
પ્રસરત્કટાક્ષ ઇતિ કાર્યપરત્વમસૂચિ તત્પ્રકરણસ્થગિરામ્ ॥ ૯॥

નનુ સચ્ચિદાત્મપરતાઽભિમતા યદિ કૃત્સ્નવેદનિચયસ્ય મુનેઃ ।
ફલદાતૃતામપુરુષસ્ય વદન્ સ કથં નિરાહ પરમેશમપિ ॥ ૧૦॥

નનુ કર્તૃપૂર્વકમિદં જગદિત્યનુમાનમાગમવચાંસિ વિના ।
પરમેશ્વરં પ્રથયતિ શ્રુતયસ્ત્વનુવાદમાત્રમિતિ કાણભુજાઃ ॥ ૧૧॥

ન કથઞ્ચિદૌપનિષદં પુરુષં મનુતે બૃહન્તમિતિ વેદવચઃ ।
કથયત્યવેદવિદગોચરતાં ગમયેત્ કથં તમનુમાનમિદમ્ ॥ ૧૨॥

ઇતિ ભાવમાત્મનિ નિધાય મુનિઃ સ નિરાકરોન્નિશિતયુક્તિશતૈઃ ।
અનુમાનમીશ્વરપરં જગતઃ પ્રભવં લયં ફલમપીશ્વરતઃ ॥ ૧૩॥

તદિહાસ્મદુક્તવિધયા નિષદા ન વિરુદ્ધમણ્વપિ મુનેર્વચસિ ।
ઇતિ ગૂઢભાવમનવેક્ષ્ય બુધાસ્તમનીશવાદ્યયમિતિ બ્રુવતે ॥ ૧૪॥

કિમુ તાવતૈવ સ નિરીશ્વરવાદ્યભવત્ પરાત્મવિદુષાં પ્રવરઃ ।
ન નિશાટનાહિતતમઃ કચિપ્યદહનિ પ્રભાં મલિનયેત્તરણેઃ ॥ ૧૫॥

ઇતિ જૈમિનીયવચસાં હૃદયં કથિતં નિશમ્ય યતિકેસરિણા ।
મનસા નનન્દ કવિરાણ્ણિતરાં સહ શારદાશ્ચ સદસસ્પતયઃ ॥ ૧૬॥

વિદિતાશયોઽપિ પરિવર્તિમનાગ્વિશયઃ સ જૈમિનિમવાપ હૃદા ।
અવગન્તુમસ્ય વચસાઽપિ પુનઃ સ ચ સંસ્મૃતઃ સવિધમાપ કવેઃ ॥ ૧૭॥

અવદચ્ચ શ્રૃણ્વિતિ સ ભાષ્યકૃતિ પ્રજહાહિ સંશયમિમં સુમતે ।
યદવોચદેષ મમ સૂત્રતતેર્હૃદયં તદેવ મમ નાપરથા ॥ ૧૮॥

ન મમૈવ વેદ હૃદયં યમિરાડપિ તુ શ્રુતેઃ સકલશાસ્ત્રતતેઃ ।
યદભૂદ્ભવિષ્યતિ ભવત્તદપિ હ્યયમેવ વેદ ન તથા ત્વિતરઃ ॥ ૧૯॥

ગુરુણા ચિદેકરસતત્પરતા નિરણાયિ હિ શ્રુતિશિરોવચસામ્ ।
કથમેકસૂત્રમપિ તદ્વિમતં કથયામ્યહં તદુપસાદિતધીઃ ॥ ૨૦॥

અલમાકલય્ય વિશયં સુયશઃ શૃણુ મે રહસ્યમિમમેવ પરમ્ ।
ત્વમવેહિ સંસૃતિનિમગ્નજનોત્તરણે ગૃહીતત્રપુષં પુરુષમ્ ॥ ૨૧॥

આદ્યે સત્વમુનિઃ સતાં વિતરતિ જ્ઞાનં દ્વિતીયે યુગે
    દત્તો દ્વાપરનામકે તુ સુમતિર્વ્યાસઃ કલૌ શઙ્કરઃ ।
ઇત્યેવં સ્ફુટમીરતોઽસ્ય મહિમા શૈવે પુરાણે યત-
    સ્તસ્ય ત્વં સુમતે મતે ત્વવતરેઃ સંસારવાર્ધિં તરેઃ ॥ ૨૨॥

ઇતિ બોધિતદ્વિજવરોઽન્તરધાન્મનસોપગુહ્ય યમિનામૃષભમ્ ।
સ ચ યાયજૂકપરિષત્પ્રમુખઃ પ્રણિપત્ય શઙ્કરમવોચદિદમ્ ॥ ૨૩॥

વિદિતોઽસ્તિ સમ્પ્રતિ ભવાઞ્જગતઃ પ્રકૃતિર્નિરસ્તસમતાતિશયઃ
અવબોધમાત્રવપુરપ્યબુધોદ્ધરણાય કેવલમુપાત્તતનુઃ ॥ ૨૪॥

યદેકમુદિતં પદં યતિવર ત્રયીમસ્ત કૈ-
સ્તદસ્ય પરિપાલકસ્ત્વમસિ તત્ત્વમસ્યાયુધઃ ।
પરં ગલિતસૌગતપ્રલપિતાન્ધકૂપાન્તરે
પતત્કથમિવાન્યથા પ્રલયમદ્ય નાપત્સ્યતે ॥ ૨૫॥

પ્રબુદ્ધોઽહં સ્વપ્નાદિતિ કૃતમતિઃ સ્વપ્નમપરં
યથા મૂઢઃ સ્વપ્ને કલયતિ તથા મોહવશગાઃ ।
વિમુક્તિં મન્યન્તે કતિચિદિહ લોકાન્તરગતિં
હસન્ત્યેતાન્ દાસાસ્તવ ગલિતમાયાઃ પરગુરોઃ ॥ ૨૬॥

મુહુર્ધિગ્ધિગ્ભેદિપ્રલપિતવિમુક્તિં યદુદયેઽપ્ય-
સારઃ સંસારો વિરમતિ ન કર્તૃત્વમુખરઃ ।
ભૃશં વિદ્વન્મોદે સ્થિરતમવિમુક્તિં ત્વદુદિતાં
ભવાતીતા યેયં નિરવધિચિદાનન્દલહરી ॥ ૨૭॥

અવિદ્યારાક્ષસ્યા ગિલિતમખિલેશં પરગુરો
પિચણ્ડં ભિત્ત્વાસ્યાઃ સરભસમમુષ્માદુદહરઃ ।
વૃતાં પશ્યન્ રક્ષોયુવતિભિરમુષ્ય પ્રિયતમાં
હનૂમાંલ્લોકેઽપ્યસ્તવ તુ કિયતી સ્યાન્મહિતતા ॥ ૨૮॥

જગદાર્તિહન્નનવગમ્ય પુરા મહિમાનમીદૃશમચિન્ત્યમહમ્ ।
તવ યત્પુરોઽબ્રવમસામ્પ્રતમપ્યખિલં ક્ષમસ્વ કરુણાજલધે ॥ ૨૯॥

કપિલાક્ષપાદકણભુક્પ્રમુખા અપિ મોહમીયુરમિતપ્રતિભાઃ ।
શ્રુતિભાવનિર્ણયવિધાવિતરઃ પ્રભવેત્કથં પરશિવાંશમૃતે ॥ ૩૦॥

સમેતૈરેતૈઃ કિં કપિલકણભુગ્ગૌતમવચ-
સ્તમસ્તોમૈશ્ચેતોમલિનિમસમારમ્ભણચણૈઃ ।
સુધાધારોદ્ગારપ્રચુરભગવત્પાદવદન-
પ્રરોહદ્વ્યાહારામૃતકિરણપુઞ્જે વિજયિનિ ॥ ૩૧॥

ભિન્દાનૈરદેવમેતૈરભિનવયવનૈઃ સદ્ગવીભઞ્જનોત્કૈ-
ર્વ્યાપ્તા સર્વેયમુર્વી ક્વ જગતિ ભજતાં કૈવ મુક્તિપ્રસક્તિઃ ।
યદ્વા સદ્વાદિરાજા વિજિતકલિમલા વિષ્ણુતત્ત્વાચુરક્તા

ઉજ્જૃમ્ભન્તે સમન્તાદ્દૃશિ દિદિ કૃતિનઃ કિં તયા ચિન્તયા મે ॥ ૩૨॥

કથમલ્પબુદ્ધિવિવૃતિપ્રચયપ્રચલોરગક્ષતિહતાઃ શ્રુતયઃ ।
ન યદિ ત્વદુક્ત્યમૃતસેકધૃતા વિહરેયુરાત્મવિધૃતાનુશયાઃ ॥ ૩૩॥

ભવદુક્તસૂક્ત્યમૃતથાનુકરા ન ચરેયુરાર્ય યદિ કઃ શમયેત્ ।
અતિતીવ્રદુઃસહભવોષ્ણકરપ્રચુરાતપપ્રભવતાપમિમમ્ ॥ ૩૪॥

બત કર્મયન્ત્રમધિરુહ્ય તપઃશ્રુતગેહદારસુતભૃત્યધનૈઃ ।
અતિરૂઢમાનભરિતઃ પતિતો ભવતોદ્ધૃતોઽસ્મિ ભવકૂપબિલાત્ ॥ ૩૫॥

અહમચરં બહુતપોઽસુકરં નનુ પૂર્વજન્મસુ ન ચેદધુના ।
જગદીશ્વરેણ કરુણાનિધિના ભવતા કથા મમ કથં ઘટતે ॥ ૩૬॥

શાન્તિપ્રાક્સુકૃતાઙ્કુરં દમસમુલ્લાસોલ્લસત્પલ્લવં
વૈરાગ્યદ્રુમકોરકં સહનતાવલ્લીપ્રસૂનોત્કરમ્ ।
ઐકાગ્રીસુમનોમરન્દવિસૃતિં શ્રદ્ધાસમુદ્યત્ફલં
વિન્દેયં સુગુરોર્ગિરાં પરિચયં પુણ્યૈરગણ્યૈરહમ્ ॥ ૩૭॥

ત્રિદિવૌકસામપિ પુમર્થકરીમિહ સંસરજ્જનવિમુક્તિકરીમ્ ।
કરુણોર્મિલાં તવ કટાક્ષઝરીમવગાહતેઽત્ર ખલુ ધન્યતમઃ ॥ ૩૮॥

કેચિચ્ચઞ્ચલલોચનાકુચતટીચેલાઞ્ચલોચ્ચાલન-
સ્પર્શદ્રાક્પરિરમ્ભસમ્ભ્રમકલાલીલાસુ લોલાશયાઃ ।
સન્ત્વેતે કૃતિનસ્તુ નિસ્તુલયશઃ કોશાદયઃ શ્રીગુરુ-
વ્યાહારક્ષરિતામૃતાબ્ધિલહરીદોલાસુ ખેલન્ત્યમી ॥ ૩૯॥

ચિન્તાસન્તાનતન્તુગ્રથિતનવભવત્સુક્તિમુક્તાફલૌઘૈ-
રુદ્યદ્વૈશદ્યસદ્યઃપરિહૃતતિમિરૈર્હારિણો હારિણોઽમી ।
સન્તઃ સન્તોષવન્તો યતિવર કિમતો મણ્ડનં પણ્ડિતાનાં
વિદ્યા હૃદ્યા સ્વયં તાન્ શતમખમુખરાન્ વારયન્તી વૃણીતે ॥ ૪૦॥

સન્તઃ સન્તોષપોષં દધતુ તવ કૃતામ્નાયશોભૈર્યશોભિઃ
સૌરાલોકૈરુલૂકા ઇવ નિખિલખલા મોહમાહો વહન્તુ ।
ધીરશ્રીશઙ્કરાર્યપ્રણતિપરિણતિભ્રશ્યદન્તર્દુરન્ત -
ધ્વાન્તાઃ સન્તો વયં તુ પ્રચુરતરનિજાનન્દસિન્ધૌ નિમગ્નાઃ ॥ ૪૧॥

ચિન્તાસન્તાનશાખી પદસરસિજયોર્વન્દનં નન્દનં તે
સઙ્કલ્પઃ કલ્પવલ્લી મનસિ ગુણનુતેર્વર્ણના સ્વર્ણદીયમ્ ।

સ્વર્ગો દૃગ્ગોચરસ્ત્વત્પદભજનમતઃ સંવિચાર્યેદમાર્યા
  મન્યન્તે સ્વર્ગમન્યં તૃણવદતિલઘું શઙ્કરાર્ય ત્વદીયાઃ ॥ ૪૨॥

તદહં વિસૃજ્ય સુતદારગૃહં દ્રવિણાનિ કર્મ ચ ગૃહે વિહિતમ્ ।
શરણં વૃણોમિ ભગવચ્ચરણાવનુશાધિ કિઙ્કરમમું કૃપયા ॥ ૪૩॥

ઇતિ સૂનૃતોક્તિભિરુદીર્ણગુણઃ સુધિયાઽઽત્મવાનનુજિઘૃક્ષુરસૌ ।
સમુદૈક્ષતાસ્ય સહધર્મચરીં વિદિતાશયા મુનિમવોચત સા ॥ ૪૪॥

યતિપુણ્ડરીક તવ વેદ્મિ મનો નનુ પૂર્વમેવ વિદિતં ચ મયા ।
ઇહ ભાવિ તાપસમુખાદખિલં તદુદીર્યતે શ્ૃણુ સસભ્યજનઃ ॥ ૪૫॥

મયિ જાતુ માતુરુપકણ્ઠજુષિ પ્રભયા તડિત્પ્રતિભટોચ્ચજટઃ ।
સિતભૂતિરૂષિતસમસ્તતનુઃ શ્રમણોઽભ્યયાદપરસૂર્ય ઇવ ॥ ૪૬॥

પરિગૃહ્ય પાદ્યમુખયાઽર્હણયા રચિતાઞ્જલિર્નમિતપૂર્વતનુઃ
જનની તદાઽઽત્તવરવિસ્યમમું મુનિમન્વયુઙ્ત મમ ભાવ્યખિલમ્ ॥ ૪૭॥

ભગવન્ન વેદ્મિ દુહિર્તુમમ ભાવ્યખિલં ચ વેત્તિ તપસા હિ ભવાન્ ।
પ્રણતે જને હિ સુધિયઃ કથયન્ત્યપિ ગોપ્યમાર્યસદૃશાઃ કૃપયા ॥ ૪૮॥

કિયદાયુરવાપ્સ્યતિ સુતાન્ કતિ વા દયિતં કથંવિધમુપૈષ્યતિ ચ ।
અથ ચ ક્રતૂનપિ કરિષ્યતિ મે દુહિતા પ્રભૂતધનધાન્યવતી ॥ ૪૯॥

ઇતિ પૃષ્ટભાવિચરિતઃ પ્રસુવા ક્ષણમાત્રમીલિતવિલોચનકઃ ।
સકલં ક્રમેણ કથયન્નિદમપ્યપરં જગાદ સુરહસ્યમપિ ॥ ૫૦॥

નિગમાધ્વનિ પ્રબલબાહ્યમતૈરમિતૈરધિક્ષિતિ ખિલે દ્રુહિણઃ ।
પુનરુદ્દિધીર્ષુરવતીર્ય ખલુ પ્રતિભાતિ મણ્ડનકવીન્દ્રમિષાત્ ॥ ૫૧॥

તમવાપ્ય રુદ્રમિવ સાઽદ્રિસુતા દુહિતા તવાચ્યુતમિવાબ્ધિસુતા ।
અનુરૂપમાહૃતસમસ્તમખા સસુતા ભવિષ્યતિ ચિરં મુદિતા ॥ ૫૨॥

અથ નષ્ટમૌપનિષદં પ્રબલૈઃ કુમતૈઃ કૃતાન્તમિહ સાધયિતુમ્ ।
નનુ માનુષં વપુરુપેત્ય શિવઃ સમલઙ્કરિષ્યતિ ધરાં સ્વપદૈઃ ॥ ૫૩॥

સહ તેન વાદમુપગમ્ય ચિરં દુહિતુઃ પતિસ્તુ યતિવેષજુષા ।
વિજિતસ્તમેવ શરણં જગતાં શરણં ગમિષ્યતિ વિસૃષ્ટગૃહઃ ॥ ૫૪॥

ઇતિ ગામુદીર્ય સ મુનિઃ પ્રયયૌ સકલં યથાતથમભૂચ્ચ મમ ।
ભવદીયશિષ્યપદમસ્ય કથં વિતથં ભવિષ્યતિ મુનેર્વચસિ ॥ ૫૫॥

અપિ તુ ત્વયાઽદ્ય ન સમગ્રજિતઃ પ્રથિતાગ્રણીર્મમ પતિર્યદહમ્ ।
વપુરર્ધમસ્ય ન જિતા મતિમન્નપિ માં વિજિત્ય કુરુ શિષ્યમિમમ્ ॥ ૫૬॥

યદપિ ત્વમસ્ય જગતઃ પ્રભવો નનુ સર્વવિચ્ચ પરમઃ પુરુષઃ ।
તદપિ ત્વયૈવ સહ વાદકૃતે હૃદયં બિભર્તિ મમ તૂત્કલિકામ્ ॥ ૫૭॥

ઇતિ યાયજૂકસહધર્મચરીકથિતં વચોર્થવગર્હ્યપદમ્ ।
મધુરં નિશમ્ય મુદિતઃ સુતરાં પ્રતિવક્તુમૈહત યતિપ્રવરઃ ॥ ૫૮॥

યદવાદિ વાદકલહોત્સુકતાં પ્રતિપદ્યતે હૃદયમિત્યબલે ।
તદસાસામ્પ્રતં ન હિ મહાયશસો મહિલાજનેન કથયન્તિ કથામ્ ॥ ૫૯॥

સ્વમતં પ્રભેત્તુમિહ યો યતતે સ વધૂજનોઽસ્તુ યદિ વાઽસ્ત્વિતરઃ ।
યતિતવ્યમેવ ખલુ તસ્ય જયે નિજપક્ષરક્ષણપરૈર્ભગવન્ ॥ ૬૦॥

અત એવ ગાર્ગ્યભિધયા કલહં સહ યાજ્ઞવલ્ક્યમુનિરાઽકરોત્ ।
જનકસ્તથા સુલભયાઽબલયા કિમમી ભવન્તિ ન યશોનિધયઃ ॥ ૬૧॥

ઇતિ યુક્તિમદ્વદિતમાકલયન્મુદિતાન્તરઃ શ્રુતિસરિજ્જલધિઃ ।
સ તયા વિવાદમધિદેવતયા વચસામિયેષ વિદુષાં સદસિ ॥ ૬૨॥

અથ સા કથા પ્રવવૃતે સ્મ તયોરુભયોઃ પરસ્પરજયોત્સુકયોઃ ।
મતિચાતુરીરચિતશબ્દઝરી શ્રુતિવિસ્મયીકૃતવિચક્ષણયોઃ ॥ ૬૩॥

અનયોર્વિચિત્રપદયુક્તિભરૈર્નિશમય્ય સઙ્કથનમાકલિતમ્ ।
ન ફણીશમપ્યતુલયન્ન પપીં ન ગુરું કવિં કિમપરં જગતિ ॥ ૬૪॥

ન દિવા ન નિશ્યપિ ચ વાદકથા વિરરામ નૈયમિકકાલમૃતે ।
ઇતિ જલ્પતોઃ સમમનલ્પધિયોર્દિવસાશ્ચ સપ્ત દશ ચાત્યગમન્ ॥ ૬૫॥

અથ શારદાઽકૃતકવાક્પ્રમુખેષ્વખિલેષુ શાસ્ત્રનિચયેષુ પરમ્ ।
તમજય્યમાત્મનિ વિચિન્ત્ય મુનિં પુનરપ્યચિન્તયદિદં તરસા ॥ ૬૬॥

અતિબાલ્ય એવ કૃતસંન્યસનો નિયમૈઃ પરૈરવિધુરશ્ચ સદા ।
મદનાગમેષ્વકૃતબુદ્ધિરસૌ તદનેન સમ્પ્રતિ જયેયમહમ્ ॥ ૬૭॥

ઇતિ સમ્પ્રધાર્ય પુનરપ્યમુના કથને પ્રસઙ્ગમથ સઙ્ગતિતઃ ।
યમિનં સદસ્યમુમપૃચ્છદસૌ કુસુમાસ્ત્રશાસ્ત્રહૃદયં વિદુષી ॥ ૬૮॥

કલાઃ કિયન્ત્યો વદ પુષ્પધન્વનઃ કિમાત્મિકાઃ કિઞ્ચ પદં સમાશ્રિતાઃ ।

પૂર્વે ચ પક્ષે કથમન્યથા સ્થિતિઃ કથં યુવત્યાં કથમેવ પુરુષે ॥ ૬૯॥

નેતીરિતઃ કિઞ્ચિદુવાચ શઙ્કરો વિચિન્તયન્નત્ર ચિરં વિચક્ષણઃ ।
તાસામનુક્તૌ ભવિતાઽલ્પવેદિતા ભવેત્તદુક્તૌ મમ ધર્મસઙ્ક્ષયઃ ॥ ૭૦॥

ઇતિ સંવિચિન્ત્ય સ હૃદાઽઽશુ તદાઽનવબુદ્ધપુષ્પશરશાસ્ત્ર ઇવ ।
વિદિતાગમોઽપિ સુરિરક્ષયિષુર્નિયમં જગાદ જગતિ વ્રતિનામ્ ॥ ૭૧॥

ઇહ માસમાત્રમવધિઃ ક્રિયતામનુમન્યતે હિ દિવસસ્ય ગણઃ ।
તદનન્તરં સુદતિ હાસ્યસિ ભોઃ કુસુમાસ્ત્રશાસ્ત્રનિપુણત્વમપિ ॥ ૭૨॥

ઉરરીકૃતે સતિ તથેતિ તયાઽઽક્રમતે સ્મ યોગિમૃગરાડ્ ગગનમ્ ।
શ્રુતવિગ્રહઃ શ્રુતવિનેયયુતો દધદભ્રચારમથ યોગદૃશા ॥ ૭૩॥

સ દદર્શ કુત્રચિદમર્ત્યમિવ ત્રિદિવચ્યુતં વિગતસત્ત્વમપિ ।
મનુજેશ્વરં પરિવૃતં પ્રલપત્પ્રમદાભિરાર્તિમદમાત્યજનમ્ ॥ ૭૪॥

અથો નિશાખેટવશાદટવ્યાં મૂલે તરોર્મોહવશાત્પરાસુમ્ ।
તં વીક્ષ્ય માર્ગેઽમરુકં નૃપાલં સનન્દનં માહ સ સંયમીન્દ્રઃ ॥ ૭૫॥

સૌન્દર્યસૌભાગ્યનિકેતસીમાઃ પરઃશતા યસ્ય પયોરુહાક્ષ્યઃ ।
સ એવ રાજાઽમરુકાભિધાનઃ શેતે ગતાસુઃ શ્રમતો ધરણ્યામ્ ॥ ૭૬॥

પ્રવિશ્ય કાયં તમિમં પરાસોર્નૃપસ્ય રાજ્યેઽસ્ય સુતં નિવેશ્ય ।
યોગાનુભાવાત્પુનરપ્યુપૈતુમુત્કણ્ઠતે માનસમસ્મદીયમ્ ॥ ૭૭॥

અન્યાદૃશાનામદસીયાનાકુશેશયાક્ષીકિલકિઞ્ચિતાનામ્ ।
સર્વજ્ઞતાનિર્વહણાય સોઽહં સાક્ષિત્વમપ્યાશ્રયિતું સમીહે ॥ ૭૮॥

ઇત્યૂચિવાંસં યતિતલ્લજં તં સનન્દનઃ પ્રાહ સસાન્ત્વમેનમ્ ।
સર્વજ્ઞ નૈવાવિદિતં તવાસ્તિ તથાઽપિ ભક્તિર્મુખરં તનોતિ ॥ ૭૯॥

મત્સ્યેન્દ્રનામા હિ પુરા મહાત્મા ગોરક્ષમાદિશ્ય નિજાઙ્ગગુપ્ત્યૈ ।
નૃપસ્ય કસ્યાપિ તનું પરાસોઃ પ્રવિશ્ય તત્પત્તનમાસસાદ ॥ ૮૦॥

ભદ્રાસનાધ્યાસિનિ યોગિવર્યે ભદ્રાણ્યનિદ્રાણ્યભવન્પ્રજાનામ્ ।
વવર્ષ કાલેષુ બલાહકોઽપિ સસ્યાનિ ચાશાસ્યફલાન્યભૂવન્ ॥ ૮૧॥

વિજ્ઞાય વિજ્ઞાઃ સચિવા નૃપસ્ય કાયે પ્રવિષ્ટં કમપીહ દિવ્યમ્ ।
સમાદિશન્ રાજસરોરુહાક્ષીઃ સર્વાત્મના તસ્ય વશીક્રિયાયૈ ॥ ૮૨॥

સઙ્ગીતલાસ્યાભિનયાદિકેષુ સંસક્તચેતા લલિતેષુ તાસામ્ ।
સ એષ વિસ્મૃત્ય પુનઃ સમાધિં સર્વાત્મના પ્રાકૃતવદ્બભૂવ ॥ ૮૩॥

ગોરક્ષ એષોઽથ ગુરોઃ પ્રવૃત્તિં વિજ્ઞાય રક્ષન્ બહુધાઽસ્ય દેહમ્ ।
નિશાન્તકાન્તાનટનોપદેષ્ટા નિતાન્તમસ્યાભવદન્તરઙ્ગઃ ॥ ૮૪॥

તત્રૈકદા તત્વનિબોધનેન નિવૃત્તરાગં નિજદેશિકં સઃ ।
યોગાનુપૂર્વીમુપદિશ્ય નિન્યે યથાપુરં પ્રાક્તનમેવ દેહમ્ ॥ ૮૫॥

હન્તેદૃશોઽયં વિષયાનુરાગઃ કિઞ્ચોર્ધ્વરેતોવ્રતખણ્ડનેન ।
કિં નોદયેત્કિલ્બિષમુલ્બણં તે કૃત્યં ભવાનેવ કૃતીં વિવેક્તુમ્ ॥ ૮૬॥

વ્રતમસ્મદીયમતુલં ક્વ મહત્ ક્વ ચ કામશાસ્ત્રમતિગર્હ્યમિદમ્ ।
તદપીષ્યતે ભગવતૈવ યદિ હ્યનવસ્થિતં જગદિહૈવ ભવેત્ ॥ ૮૭॥

અધિમેદિનિ પ્રથયિતું શિથિલં ધૃતકઙ્કણસ્ય યતિધર્મમિમમ્ ।
ભવતઃ કિમસ્ત્ય વિદિતં તદપિ પ્રણયાન્મયોદિતમિદં ભગવન્ ॥ ૮૮॥

સ નિશમ્ય પદ્મચરણસ્ય ગિરં ગિરતિ સ્મ ગીષ્પતિસમપ્રતિભઃ ।
અવિગીતમેવ ભવતા ફણિતં શ‍ૃણુ સૌમ્ય વચ્મિ પરમાર્થમિદમ્ ॥ ૮૯॥

અસઙ્ગિનો ન પ્રભવન્તિ કામા હરેરિવાભીરવધૂસખસ્ય ।
વજ્રોલિયોગપ્રતિભૂઃ સ એષ વત્સાવકીર્ણિત્વવિપર્યયો નઃ ॥ ૯૦॥

સઙ્કલ્પ એવાખિલકામમૂલં સ એવ મે નાસ્તિ સમસ્ય વિષ્ણોઃ ।
તન્મૂલહાનૌ ભવપાશનાશઃ કર્તુઃ સદા સ્યાદ્ભવદોષદૃષ્ટેઃ ॥ ૯૧॥

અવિચાર્ય યસ્તુ વપુરાદ્યહમિત્યભિમન્યતે જડમતિઃ સુદૃઢમ્ ।
તમબુદ્ધતત્ત્વમધિકૃત્ય વિધિપ્રતિષેધશાસ્ત્રમખિલં સફલમ્ ॥ ૯૨॥

કૃતધીસ્ત્વનાશ્રમમવર્ણમજાત્યવવોધમાત્રમજમેકરસમ્ ।
સ્વતયાઽવગત્ય ન ભજેન્નિવસન્નિગમસ્ય મૂર્ધ્નિ વિધિકિઙ્કરતામ્ ॥ ૯૩॥

કલશાદિ મૃત્પ્રભવમસ્તિ યથા મૃદમન્તરા ન જગદેવમિદમ્ ।
પરમાત્મજન્યમપિ તેન વિના સમયત્રયેઽપિ ન સમસ્તિ ખલુ ॥ ૯૪॥

કથમજ્યતે જગદશેષમિદં કલયન્મૃષેતિ હૃદિ કર્મફલૈઃ ।
ન ફલાય હિ સ્વપનકાલકૃતં સુકૃતાદિ જાત્વનૃતબુદ્ધિહતમ્ ॥ ૯૫॥

તદયં કરોતુ હયમેધશતાન્યમિતાનિ વિપ્રહનનાન્યથવા ।
પરમાર્થવિન્ન સુકૃતૈર્દુરિતૈરપિ લિપ્યતેઽસ્તમિતકર્તૃતયા ॥ ૯૬॥

અવધીત્ત્રિશીર્ષમદદાચ્ચ યતીન્ વૃકમણ્ડલાય કુપિતઃ શતશઃ ।
બત લોમહાનિરપિ તેન કૃતા ન શતક્રતોરિતિ હિ બહ્વૃચગીઃ ॥ ૯૭ ॥

બહુદક્ષિણૈરયજત ક્રતુભિર્વિબુધાનતર્પયદસઙ્ખ્યધનૈઃ ।
જનકસ્તથાઽપ્યભયમાપ પરં ન તુ દેહયોગમિતિ કાણ્વવચઃ ॥ ૯૮ ॥

ન વિહીયતેઽહિરિપુવદ્દુરિતૈર્ન ચ વર્ધતે જનકવત્સુકૃતૈઃ ।
ન સ તાપમેત્યકરવં દુરિતં કિમહં ન સાધ્વકરવં ત્વિતિ ચ ॥ ૯૯ ॥

તદનઙ્ગશાસ્ત્રપરિશીલનમપ્યમુનૈવ સૌમ્ય કરણેન કૃતમ્ ।
ન હિ દોષકૃત્તદપિ શિષ્ટસરણ્યવનાર્થમન્યવપુરેત્ય યતે ॥ ૧૦૦ ॥

ઇતિ સત્કથઃ સ કથનીયયશા ભવભીતિભઞ્જનકરીઃ કથયન્ ।
સુદુરાસદં ચરણચારિજનૈર્ગિરિશૃઙ્ગમેત્ય પુનરેવ જગૌ ॥ ૧૦૧ ॥

અધિસાનુ પશ્યત વિભાતિ ગુહા પુરતઃશિલા સમતલા વિપુલા ।
સરસી ચ તત્પરિસરેઽચ્છજલા ફલભારનમ્રતરુરમ્યતટા ॥ ૧૦૨ ॥

પરિપાલયતામિહ વસદ્ભિરિદં વપુરપ્રમાદમનવદ્યગુણાઃ ।
અહમાસ્થિતસ્તદુચિતં કરણં કલયામિ યાવદસમેષુકલામ્ ॥ ૧૦૩ ॥

ઇતિ શિષ્યવર્ગમનુશાસ્ય યતિમવરો વિસૃષ્ટકરણોઽધિગુહમ્ ।
મહિપસ્ય વર્ષ્મ ગુરુયોગવલોઽવિશદાતિવાહિકશરીરયુતઃ ॥ ૧૦૪ ॥

અઙ્ગુષ્ઠમારભ્ય સમીરણં નયન્ કરન્ધ્રમાર્ગાદ્બહિરેત્ય યોગવિત્ ।
કરન્ધ્રમાર્ગેણ શનૈઃ પ્રવિષ્ટવાન્ મૃતસ્ય યાવચ્ચરણાગ્રમેકધીઃ ॥ ૧૦૫ ॥

ગાત્રં ગતાસોર્વસુધાધિપસ્ય શનૈઃ સમાસ્પન્દત હૃત્પ્રદેશે ।
તથોદમીલન્નયનં ક્રમેણ તથોદતિષ્ઠત્સ યથાપુરૈવ ॥ ૧૦૬ ॥

આદૌ તદઙ્ગમુદયન્મુખકાન્તિ પશ્ચાન્નાસાન્તનિર્યદનિલં શનકૈઃ પરસ્તાત્ ।
ઉન્મીલદઙ્ઘ્રિચલનં તદનુદ્યદક્ષિવ્યાકોચમુત્થિતમુપાત્તબલં ક્રમેણ ॥ ૧૦૭ ॥

તં પ્રાપ્તજીવમુપલભ્ય પતિં પ્રભૂતહર્ષસ્વનાઃ પ્રમુદિતાનનપઙ્કજાસ્તાઃ ।
નાર્યો વિરેજુરરુણોદયસમ્પ્રફુલ્લપદ્માઃ સસારસરવા ઇવ વારિજિન્યઃ ॥ ૧૦૮ ॥

હર્ષં તાસામુદિતમતુલં વીક્ષ્ય વામેક્ષણાના-
    માત્તપ્રાણં નૃપમપિ મહામાત્યમુખ્યાઃ પ્રહૃષ્ટાઃ ।
દધ્મુઃ શઙ્ખાન્ પણવપટહાન્ દુન્દુભીશ્ચાભિજઘ્નુ-

સ્તેષાં ઘોષાઃ સપદિ બધિરીચક્રિરે દ્યાં ભુવં ચ ॥ ૧૦૯॥

ઇતિ શ્રીમાધવીયે તત્સાર્વજ્ઞ્યોપાયગોચરઃ ।
સઙ્ક્ષેપશઙ્કરજયે સર્ગોઽયં નવમોઽભવત્ ॥ ૯॥

આદિતઃ શ્લોકાઃ ૧૦૨૯ ।

# શઙ્કરદિગ્વિજયમ્

## ॥ ૧૦. દશમઃ સર્ગઃ રાજદેહપ્રવેશાદિ કથનમ્ ॥

અથ દશમઃ સર્ગઃ ॥ ૧૦॥

અથ પુરોહિતમન્ત્રિપુરઃસરૈર્નરપતિઃ કૃતશાન્તિકકર્મભિઃ ।
વિહિતમાઙ્ગલિકઃ સ યથોચિતં નગરમાસ્થિતભદ્રગજો યયૌ ॥ ૧॥

સમધિગમ્ય પુરં પરિસાન્ત્વિતપ્રિયજનઃ સચિવૈઃ સહ સમ્પ્રતૈઃ ।
ભુવમપાલયદાદૃતશાસનો નૃપતિભિર્દિવમિન્દ્ર ઇવાધિરાટ્ ॥ ૨॥

ઇતિ નૃપત્વમુપેત્ય વસુન્ધરામવતિ સંયમિભૂભૃતિ મન્ત્રિણઃ ।
તમધિકૃત્ય પરં કૃતસંશયા ઇતિ જજલપુરનલ્પધિયો મિથઃ ॥ ૩॥

મૃતિમુપેત્ય યથા પુનરુત્થિતઃ પ્રકૃતિભાગ્યવશેન તથા ત્વયમ્ ।
નરપતિઃ પ્રતિભાતિ ન પૂર્વવત્સમુદિતાખિલદિવ્યગુણોદયઃ ॥ ૪॥

વસુ દદાતિ યયાતિવદર્થિને વદતિ ગોષ્પતિવદ્ગિરમર્થવિત્ ।
જયતિ ફાલ્ગુનવત્પ્રતિપાર્થિવાન્ સકલમપ્યવગચ્છતિ શર્વવત્ ॥ ૫॥

અનુસવનવિસૃત્વરૈરપૂર્વૈર્વિતરણપૌરુષશૌર્યધૈર્યપૂર્વૈઃ ।
અનિતરસુલભૈર્ગુણૈર્વિભાતિ ક્ષિતિપતિરેષ પરઃ પુમાનિવાદ્યઃ ॥ ૬॥

અનૃતુષુ તરવઃ સુપુષ્પિતાગ્રા બહુતરદુગ્ધદુધાશ્ચ ગોમહિષ્યઃ ।
ક્ષિતિરભિમતવૃષ્ટિરાઢ્યસસ્યા સ્વવિહિતધર્મરતાઃ પ્રજાશ્ચ સર્વાઃ ॥ ૭॥

કાલસ્તિષ્યઃ સર્વદોષાકરોઽપિ ત્રેતામત્યેત્યદ્ય રાજ્ઞઃ પ્રભાવાત્
તસ્માદસ્મદ્રાજવર્ષ્મ પ્રવિશ્ય પ્રાપ્તૈશ્વર્યઃ શાસ્તિ કશ્ચિદ્ધરિત્રીમ્ ॥ ૮॥

તદયં ગુણવારિધિર્યથા પ્રતિપદ્યેત ન પૂર્વકં વપુઃ ।
કરવામ તથેતિ નિશ્ચયં કૃતવન્તઃ સચિવાઃ પરસ્પરમ્ ॥ ૯॥

અથ તે ભુવિ યસ્ય કસ્યચિદ્વિગતાસોર્વપુરસ્તિ દેહિનઃ ।
અવિચાર્ય તદાશુ દહ્યતામિતિ ભૃત્યાન્ રહસિ ન્યયોજયન્ ॥ ૧૦॥

અથ રાજ્યધુરં ધરાધિપઃ પરમાપ્તેષુ નિવેશ્ય મન્ત્રિષુ ।
બુભુજે વિષયાન્ વિલાસિનીસચિવોઽન્યક્ષિતિપાલદુર્લભાન્ ॥ ૧૧॥

સ્ફટિકફલકે જ્યોત્સ્નાશુભ્રે મનોજ્ઞશિરોગૃહે
વરયુવતિભિર્દીવ્યન્નક્ષૈર્દુરોદરકેલિષુ ।
અધરદશનં બાહ્વાવાહં મહોત્પલતાડનં
રતિવિનિમયં રાજાઽકાર્ષીદ્ગ્લહં વિજયે મિથઃ ॥ ૧૨॥

અધરજસુધાશ્લેષાદ્હૃદ્યં સુગન્ધિ મુખાનિલ-
વ્યતિકરવશાત્કામં કાન્તાકરાત્તમતિપ્રિયમ્ ।
મધુ મદકરં પાયં પાયં પ્રિયાઃ સમપાયયત્-
કનકચષકૈરિન્દુચ્છાયાપરિષ્કૃતમાદરાત્ ॥ ૧૩॥

મધુમદકલં મન્દસ્વિન્નં મનોહરભાષણં
નિભૃતપુલકં સીત્કારાઢ્યં સરોરુહસૌરભમ્ ।
દરમુકુલિતાક્ષીષલજ્જં વિસૃત્વરમન્મથં
પ્રચરદલકં કાન્તાવક્ત્રં નિપીય કૃતી નૃપઃ ॥ ૧૪॥

વિવૃતજઘનં સન્દષ્ટોષ્ઠં પ્રણુન્નપયોધરં
પ્રસૃતભણિતં પ્રામોત્સાહં રણન્મણિમેખલમ્ ।
નિભૃતકરણં નૃત્યદ્ગાત્રં ગતેતરભાવનં
પ્રસૃમરસુખં પ્રાદુર્ભૂતં કિમપ્યપદં ગિરામ્ ॥ ૧૫॥

મનસિજકલાતત્ત્વાભિજ્ઞો મનોજ્ઞવિચેષ્ટિતઃ
સકલવિષયવ્યાવૃત્તાક્ષઃ સદાનુસૃતોત્તમઃ ।
કૃતકુચગુરૂપાસ્ત્યાઽત્યન્તં સુનિર્વૃતમાનસો
નિધુવનવરબ્રહ્માનન્દં નિરર્ગલમન્વભૂત્ ॥ ૧૬॥

પુરેવ ભોગાન્ બુભુજે મહીભૃત્સ ભોગિનીભિઃ સહિતોઽપ્યરંસ્ત ।
કન્દર્પશાસ્ત્રાનુગતઃ પ્રવીણૈર્વાત્સ્યાયને તચ્ચ નિરૈક્ષતાદ્ધા ॥ ૧૭॥

વાત્સ્યાયનપ્રોદિતસૂત્રજાતં તદીયભાષ્યં ચ નિરીક્ષ્ય સમ્યક્ ।
સ્વયં વ્યધત્તાભિનવાર્થગર્ભં નિબન્ધમેકં નૃપવેષધારી ॥ ૧૮॥

પારાશર્યવનિભૃતિ પ્રવિશ્ય રાજ્ઞો વર્ષ્મૈવં વિહરતિ તદ્વિલાસિનીભિઃ ।
દૃષ્ટ્વા તત્સમયમતીતમસ્ય શિષ્યા રક્ષન્તો વપુરિતરેતરં જજલ્પુઃ ॥ ૧૯॥

આચાર્યૈરવધિરકારિ માસમાત્રં સોઽતીતઃ પુનરપિ પઞ્ચષાશ્ચ ઘસ્રાઃ ।
અદ્યાપિ સ્વકરણમેત્ય નઃ સનાથાન્ કર્તું તન્મનસિ ન જાયતેઽનુકમ્પા ॥ ૨૦॥

કિં કુર્મઃ ક્વ નુ મૃગયામહે ક્વ યામઃ કો જાનન્નિહ વસતીતિ નોઽભિદધ્યાત્ ।
વિજ્ઞાતું કથમિમમીશ્મહે વિચિન્ત્યાપ્યા સિન્ધુ ક્ષિતિતલમન્યગાત્રગૂઢમ્ ॥ ૨૧॥

ગુરુણા કરુણાનિધિના હ્યધુના યદિ નો નિહિતા વિહિતાસ્ત્યજિતાઃ ।
જગતિ ક્વ ગતિર્ભજતાં ત્યજતાં સ્વપદં વિપદન્તકરં તદિદમ્ ॥ ૨૨॥

નિઃશેષેન્દ્રિયજાડ્યહૃન્નવનવાહ્લાદં મુહુસ્તન્વતી
 નિત્યાશ્લિષ્ટરજોયતીશચરણામ્ભોજાશ્રયા શ્રેયસી ।
નિષ્પત્યૂહવિજૃમ્ભમાણજિનસ્યોદ્વાસના વાસના
 નિઃસીમા હૃદયેન કલ્પિતપરીરમ્ભા ચિરં ભાવ્યતે ॥ ૨૩॥

ફલિતૈરિવ સત્વપાદપૈઃ પરિણામૈરિવ યોગસમ્પદામ્ ।
સમયૈરિવ વૈદિકશ્રિયાં સશરીરૈરિવ તત્વનિર્ણયૈઃ ॥ ૨૪॥

સઘનૈર્નિજલાભવૈભવાત્ સકુટુમ્બૈરુપશાન્તિકાન્તયા ।
અતદન્યતયાઽખિલાત્મકૈરનુગૃહ્યેય કદા નુ ધામભિઃ ॥ ૨૫॥

અવિનયં વિનયન્નસતાં સતામતિરયં તિરયન્ ભવપાવકમ્ ।
જયતિ યો યતિયોગભૃતાં વરો જગતિ મે ગતિમેષ વિધાસ્યતિ ॥ ૨૬॥

વિગતમોહતમોહતિમાપ્ય યં વિધુતમાયતમા યતયોઽભવન્ ।
અમૃતદસ્ય તદસ્ય દૃશઃ સૃતવાવતરેમ તરેમ શુગર્ણવમ્ ॥ ૨૭॥

શુભાશુભવિભાજકસ્ફુરણદૃષ્ટિમુષ્ટિન્ધયઃ
 ક્ષપાન્ધમતપાન્થ દુષ્કથકદમ્ભકુક્ષિમ્ભરિઃ ।
કદા ભવસિ મે પુનઃપુનરનાદ્યવિદ્યાતમઃ
 પ્રમૃદ્ય ગલિતદ્વયં પદમુદઞ્ચયન્નદ્વયમ્ ॥ ૨૮॥

મર્ત્યાનાં નિજપાદપઙ્કજજુષામાચાર્ય વાચા યયા
 રુન્ધાનો મતિકલ્મષં ત્વમિહ કિં કુર્વાણનિર્વાણયા ।
દ્રાઙ્ નાયાસ્યસિ ચેત્સુધીકૃતપરીહાસસ્ય દસસ્ય તે
 દુઃખાન્તો ન ભવેદિતીડ્ય સ પુનર્જાનીહિ મીનીહિ મા ॥ ૨૯॥

ઇતિ ખેદમુપેયુષિ મિત્રજને પ્રતિપન્નયતિક્ષિતિભૃન્મહિમા ।
શુચમર્થવતા શમયન્વચસા નિજગાદ સરોરુહપાદ ઇદમ્ ॥ ૩૦॥

પર્યાપ્તં નઃ ક્લૈબ્યમુપેત્યાત્ર સખાયઃ કૃત્વોત્સાહં ભૂમિમશેષામપિધાનાત્ ।
અન્વેષ્યામો ભૂવિવરાણ્યપ્યથ ચ દ્યાં યદ્વદ્દેવં દેવમનુષ્યાદિષુ ગૂઢમ્ ॥ ૩૧॥

અનિર્વિણ્ણચેતાઃ સમાસ્થાય યત્નં સુદુષ્પ્રાપમપ્યર્થમાપ્નોત્યવશ્યમ્ ।
મુહુર્વિઘ્ન જાલૈઃ સુરા હન્યમાના સુધામપ્યવાપુર્હ્યનિર્વિણ્ણચિત્તાઃ ॥ ૩૨॥

યદપ્યન્યગાત્રપ્રતિચ્છન્નરૂપો દુરન્વેષણઃ સ્યાદ્ગુરુર્નસ્તથાપિ ।
સ્વભાનુદરસ્થઃ શશીવ પ્રકાશૈસ્તદીયૈર્ગુણૈરેવ વેત્તું સ શક્યઃ ॥ ૩૩॥

ઇક્ષુચાપાગમાપેક્ષયા નિર્ગતો વર્ષ્મ તસ્ચ્યિતં કૃષ્ણવર્ત્મદ્યુતિઃ ।
વિભ્રમાણાં પદં સુભ્રુવાં ભૂપતેઃ પ્રાપ્તુમર્હત્યકામાગ્રણીઃ સંયમી ॥ ૩૪॥

નિત્યતૃપ્તાગ્રયાચ્યાશ્રિતે નિર્વૃતાઃ પ્રાણિનો રોગશોકાદિના નેક્ષિતાઃ ।
દસ્યુપીડોજ્ઝિતાઃ સ્વસ્વધર્મે રતાઃ કાલવર્ષી સ્વરાણ્મેદિની કામસૂઃ ॥ ૩૫॥

તદિહાઽઽસ્યમપાસ્ય વિચેતું નિરવધિસંસૃતિજલધેઃ સેતુમ્ ।
દેશિકવરપદકમલં યામો ન વૃથાઽનેહસમત્ર નયામઃ ॥ ૩૬॥

ઇતિ જલરુહપદવચનં સર્વે મનસિ નિધાય નિરાકૃતગર્વે ।
કાંશ્ચિત્તત્ર નિવેશ્ય શરીરં રક્ષિતુમન્યે નિરગુરુદારમ્ ॥ ૩૭॥

તે ચિન્વન્તઃ શૈલાચ્છૈલં વિષયાદ્વિષયં ભુવમનુવેલમ્ ।
પ્રાપુર્ધિક્કૃતવિબુધનિવેશાન્ સ્ફીતાનમરુકનૃપતેર્દેશાન્ ॥ ૩૮॥

મૃત્વા પુનરપ્યુત્થિતમેનં શ્રુત્વા વૈન્યદિલીપસમાનમ્ ।
ત્યક્ત્વા વિરહજદૈન્યમમન્દં મત્વાઽઽચાર્યં ધૈર્યમવિન્દન ॥ ૩૯॥

તે ચ જ્ઞાત્વા ગાનવિલોલં તરુણીસક્તં ધરણીપાલમ્ ।
વિવિશુઃ સ્વીકૃતગાયકવેષા નગરં વિદિતસમસ્તવિશેષાઃ ॥ ૪૦॥

રાજ્ઞે જ્ઞાપિતવિદ્યાતિશયાસ્તે તત્સઙ્ગ્રહવિધૃતાતિશયાઃ ।
રમણીશતમધ્યગમવનીન્દ્રં દદૃશુસ્તારાવૃતમિવ ચન્દ્રમ્ ॥ ૪૧॥

વરચામરકરતરુણીકઙ્કણરઞ્જિતમનોહરપશ્ચાદ્ભાગમ્ ।
ગીતિગતિજ્ઞોદ્ગીતશ્રુતિસુખતાનસમુલ્લસદગ્રિમદેશમ્ ॥ ૪૨॥

ધૃતચામીકરદણ્ડસિતાતપવારણરઞ્જિતરત્નકિરીટમ્ ।
શ્રિતવિગ્રહમિવ રતિપતિમાશ્રિતભુવમિવ સાન્તઃપુરમમરેશમ્ ॥ ૪૩॥

રુચિરવેષાઃ સમાસાદ્ય તાં સંસદં નયનસંજ્ઞાવિતીર્ણાસના ભૂભુજા ।
સમતિસૃષ્ટાસ્તતઃ સુખરં મુર્च્છનાપદવિદસ્તે જગુર્મોહયન્તઃ સભામ્ ॥ ૪૪॥

ભૃઙ્ગ તવ સઙ્ગતિમપાસ્ય ગિરિશ‌ૃઙ્ગે તુઙ્ગવિટપિનિ સઙ્ગમજુષિ ત્વદઙ્ગે ।
સ્વાઙ્ગરચિતાઃ સકલુષાન્તરઙ્ગાઃ સઙ્ગમકૃતે ભઙ્ગમુપયન્તિ ભૃઙ્ગાઃ ॥ ૪૫॥

પઞ્ચશરસમયસઞ્ચયકૃતે પ્રાઞ્ચં મુઞ્ચન્નિવેહ સઞ્ચરસિ પ્રપઞ્ચમ્ ।
પઞ્ચજનમુખ પઞ્ચમુખમપ્યનઞ્ચંસ્ત્વં ચ ગતિરિતિ કિઞ્ચ કિલ વઞ્ચિતોઽસૌ ॥। ૪૬॥

પર્વશશિમુખ સર્વમપહાય પૂર્વં કુર્વદિહ ગર્વમનુસૃત્ય હૃદપૂર્વમ્ ।
ન સ્મરસિ વસ્ત્વસ્મદીયમિતિ કસ્માત્સંસ્મર તદસ્મર પરમસ્મદુત્ત્યા ॥ ૪૭॥

નેતિનેતીત્યાદિનિગમવચનેન નિપુણં નિષિધ્ય મૂર્તમૂર્તરાશિમ્ ।
યદશક્યનિહ્નવં સ્વાત્મરૂપતયા જાનન્તિ કોવિદાસ્તત્ત્વમસિ તત્ત્વમ્ ॥ ૪૮॥

ખાદ્યમુત્પાદ્ય વિશ્વમનુપ્રવિશ્ય ગૂઢમન્નમયાદિકોશતુષજાલે ।
કવયો વિવિચ્ય યુક્ત્યવઘાતતો યત્તણ્ડુલવદાદદતિ તત્વમસિ તત્ત્વમ્ ॥ ૪૯॥

વિષમવિષયેષુ સઞ્ચારિણોઽક્ષાશ્વાન્ દોષદર્શનકશાભિઘાતતઃ ।
સ્વૈરં સન્નિવર્ત્ય સ્વાન્તરશ્મિભિર્ધીરા બધ્નન્તિ યત્ર તત્ત્વમસિ તત્ત્વમ્ ॥ ૫૦॥

વ્યાવૃત્તજાગ્રદાદિષ્વનુસ્યૂતં તેભ્યોઽન્યદિવ પુષ્પેભ્ય ઇવ સુત્રમ્ ।
ઇતિ યદૌપાધિકત્રયપૃથક્ત્વેન વિદન્તિ સૂરયસ્તત્ત્વમસિ તવમ્ ॥ ૫૧॥

પુરુષ એવેદમિત્યાદિવેદેષુ સર્વકારણતયા યસ્ય ।
સાર્વાત્મ્યં હાટકસ્યેવ મુકુટાદિતાદામ્યં સરસમામ્નાયતે તત્ત્વમસિ તત્ત્વમ્ ॥ ૫૨॥

યશ્ચાહમત્ર વર્ષ્મણિ ભામિ સોઽસૌ યોઽસૌ વિભાતિ રવિમણ્ડલે સોઽહમિતિ ।
વેદવાદિનો વ્યતિહારતો યદધ્યાપયન્તિ યત્નતસ્તત્વમસિ તત્ત્વમ્ ॥ ૫૩॥

વેદાનુવચનસદાનમુખધમઃ શ્રદ્ધયાઽનુષ્ઠિતૈર્વિદ્યયા યુક્તૈઃ ।
વિવિદષન્ત્યત્યન્ત વિમલસ્વાન્તા બ્રાહ્મણા યદ્બ્રહ્મ તત્ત્વમસિ તત્ત્વમ્ ॥ ૫૪॥

શમદમોપરમાદિસાધનૈર્ધીરાઃ સ્વાત્મનાઽઽત્મનિ યદન્વિષ્ય કૃતકૃત્યાઃ ।
અધિગતામિતસચ્ચિદાનન્દરૂપા ન પુનરિહ ખિદ્યન્તે તત્ત્વમસિ તત્ત્વમ્ ॥ ૫૫॥

અવિગીતમેવં નરપતિરાકર્ણ્ય વર્ણિતાત્માર્થમ્ ।
વિસસર્જ પૂરિતાશાનેતાન્નિર્જ્ઞાતકર્તવ્યઃ ॥ ૫૬॥

ઉદ્બોધિતઃ સદસિ તૈરવલમ્બ્ય મૂર્ચ્છાં નિર્ગત્ય રાજતનુતો નિજમાવિવેશ ।
ગાત્રં પુરોદિતનયેન સ દેશિકેન્દ્રઃ સંજ્ઞામવાપ્ય ચ પુરેવ સમુત્થિતોઽભૂત્ ॥ ૫૭॥

તદનુ કુહરમેત્ય પૂર્વદૃષ્ટે નરપતિભૃત્યવિસૃષ્ટપાવકેન ।

નિજવપુરવલોક્ય દહ્યમાનં ઝટિતિ સ યોગધુરન્ધરો વિવેશ ॥ ૫૮॥

સપદિ દહનશાન્તયે મહાન્તં નરમૃગરૂપમધોક્ષજં શરણ્યમ્ ।
સ્તુતિભિરધિકલાલસત્પદાભિસ્ત્વરિતમતોષયદાત્મવિત્પ્રધાનઃ ॥ ૫૯॥

નરહરિકૃપયા તતઃ પ્રશાન્તે પ્રબલતરે સ હુતાશને પ્રવિષ્ટઃ ।
નિરગમદચલેન્દ્રકન્દરાન્તાદ્વિધુરિવ વક્ત્રબિલાદ્વિધુન્તુદસ્ય ॥ ૬૦॥

તદનુ શમધનાધિપો વિનેયૈશ્ચિરવિરહાદતિવર્ધમાનહાર્દૈઃ ।
સનક ઇવ વૃતઃ સનન્દનાદ્યૈર્જિગમિષુરાજનિ મણ્ડનસ્ય ગેહમ્ ॥ ૬૧॥

તદનુ સદનમેત્ય પૂર્વદૃષ્ટં ગગનપથાદ્ગલિતક્રિયાભિમાનમ્ ।
વિષયવિષનિવૃત્તતર્ષમુચ્ચૈરતનુત મણ્ડનમિશ્રમક્ષિપાત્રમ્ ॥ ૬૨॥

તં સમીક્ષ્ય નભશ્ચ્યુતં સ ચ પ્રાઞ્જલિઃ પ્રણતપૂર્વવિગ્રહઃ ।
અર્હણાભિરભિપૂજ્ય તસ્થિવાનીક્ષણૈરનિમિષૈઃ પિબન્નિવ ॥ ૬૩॥

સ વિશ્વરૂપો બત સત્યવાદી પપાત પાદામ્બુજયોર્યતીશઃ ।
ગૃહં શરીરં મમ યચ્ચ સર્વં તવેતિ વાદી મુદિતો મહાત્મા ॥ ૬૪॥

પ્રેયસા પ્રથમમર્ચિતં મુનિં પ્રાપ્તવિષ્ટરમુપસ્થિતં બુધૈઃ ।
પ્રશ્રયાવનતમૂર્તિરબ્રવીચ્છારદાઽભિવદને વિશારદા ॥ ૬૫॥

ઈશાનઃ સર્વવિદ્યાનામીશ્વરઃ સર્વદેહિનામ્ ।
બ્રહ્મણોઽધિપતિર્બ્રહ્મન્ ભવાન્ સાક્ષાત્સદાશિવઃ ॥ ૬૬॥

સદસિ મામવિજિત્ય તથૈવ યન્મદનશાસન કામકલાસ્વપિ ।
તદવબોધકૃતે કૃતિમાચરસ્તદિહ મર્ત્યચરિત્રવિડમ્બનમ્ ॥ ૬૭॥

ત્વયા યદાવાં વિજિતૌ પરાત્મન્ન ત્રપામાવહતીઽય સર્વથા ।
કૃતાભિભૂતિર્ન મયૂખશાલિના નિશાકરાદેરપકીર્તયે ખલુ ॥ ૬૮॥

આદાવાત્મ્યં ધામ કામં પ્રયાસ્યામ્યર્હસ્યચ્છ મામનુજ્ઞાતુમર્હન્ ।
ઇત્યામન્ત્ર્યાન્તર્હિતાં યોગશક્ત્યા પશ્યન્ દેવીં ભાષ્યકર્તા બભાષે ॥ ૬૯॥

જાનામિ ત્વાં દેવિ દેવસ્ય ધાતુર્ભાર્યામિષ્ટામષ્ટમૂર્તેઃ સગર્ભ્યામ્ ।
વાચામાદ્યાં દેવતાં વિશ્વગુપ્ત્યૈ ચિન્માત્રામપ્યાત્તલક્ષ્મ્યાદિરૂપામ્ ॥ ૭૦॥

તસ્માદસ્મત્કલ્પિતેષ્વર્ચ્યમાના સ્થાનેષુ ત્વં શારદાખ્યા દિશન્તી ।
ઇષ્ટાનર્થાનૃષ્યશૃઙ્ગાદિકેષુ ક્ષેત્રેષ્વાસ્સ્વ પ્રાપ્તસત્સન્નિધાના ॥ ૭૧॥

તથેતિ સંશ્રુત્ય સરસ્વતી સા પ્રાયાત્પ્રિયં ધામ પિતામહસ્ય ।
અદર્શનં તત્ર સમીક્ષ્ય સર્વ આકસ્મિકં વિસ્મયમીયુરુચ્ચૈઃ ॥ ૭૨॥

તસ્યા યતીશજિતભર્તૃયતિત્વજાતવૈધવ્યસમ્ભવશુચા ભુવમસ્પૃશન્ત્યાઃ ।
અન્તર્ધિમેક્ષ્ય મુદિતોઽજનિ મણ્ડનોઽપિ તત્સાધુ વીક્ષ્ય મુમુદે યતિશેખરશ્ચ ॥ ૭૩॥

મણ્ડનમિશ્રોઽપ્યથ વિધિપૂર્વં દત્વા વિત્તં યાગે સર્વમ્ ।
આત્મારોપિતશોચિષ્કેશો ભેજે શઙ્કરમસ્તમિતાશઃ ॥ ૭૪॥

સંન્યાસગૃહ્યવિધિના સકલાનિ કર્માણ્યઙ્ગાય શઙ્કરગુરુર્વિદુષોઽસ્ય કુર્વન્ ।
કર્ણે જગૌ કિમપિ તત્ત્વમસીતિ વાક્યં કર્ણેજપં નિખિલસંસૃતિદુઃખહાનેઃ ॥ ૭૫॥

સંન્યાસપૂર્વં વિધિવદ્વિભિક્ષે પશ્ચાદુપાદિક્ષદથાઽઽત્મતત્ત્વમ્ ।
આચાર્યવર્યઃ શ્રુતિમસ્તકસ્થં તદાદિવાક્યં પુનરાવભાષે ॥ ૭૬॥

ત્વં નાસિ દેહો ઘટવદ્ધ્યનાત્મા રૂપાદિમત્ત્વાદિહ જાતિમત્વાત્ ।
મમેતિ ભેદપ્રથનાદભેદસમ્પ્રત્યયં વિદ્ધિ વિપર્યયોત્થમ્ ॥ ૭૭॥

લોપ્યો હિ લોપ્યવ્યતિરિક્તલોપકો દૃષ્ટો ઘટાદિઃ ખલુ તાદૃશી તનુઃ ।
દૃશ્યત્વહેતોર્વ્યતિરેકસાધને ત્વત્તઃ શરીરં કથમાત્મતાગતિઃ ॥ ૭૮॥

નાપીન્દ્રિયાણિ ખલુ તાનિ ચ સાધનાનિ
દાત્રાદિવત્કથમમીષુ તવાઽઽત્મભાવઃ ।
ચક્ષુર્મદીયમિતિ ભેદગતેરમીષાં
સ્વપ્નાદિભાવવિરહાચ્ચ ઘટાદિસામ્યમ્ ॥ ૭૯॥

યદ્યાત્મતૈષાં સમુદાયગા સ્યાદેકવ્યયેનાપિ ભવેન્ન તદ્ધીઃ ।
પ્રત્યેકમાત્મત્વમુદીર્યતે ચેન્નશ્યેચ્છરીરં બહુનાયકત્વાત્ ॥ ૮૦॥

આત્મત્વમન્યતમગં યદિ ચક્ષુરાદેશ્ચક્ષુર્વિનાશસમયે સ્મરણં ન હિ સ્યાત્ ।
એકાશ્રયત્વનિયમાત્સ્મરણાનુભૂત્યોર્દૃષ્ટશ્રુતાર્થવિષયાવગતિશ્ચ ન સ્યાત્ ॥ ૮૧॥

મનોઽપિ નાઽઽત્મા કરણત્વહેતોર્મનો મદીયં ગતમન્યતોઽભૂત્ ।
ઇતિ પ્રતીતેર્વ્યભિચારિતાયાઃ સુપ્તૌ ચ તચ્ચિન્મનસોર્વિવિક્તતા ॥ ૮૨॥

અનયૈવ દિશા નિરાકૃતા ન ચ બુદ્ધેરપિ ચાઽઽત્મતા સ્ફુટમ્ ।
અપિ ભેદગતેરનન્વયાત્કરણાદાવિવ બુદ્ધિમુજ્ઝ ભોઃ ॥ ૮૩॥

નાહઙ્કૃતિશ્ચરમધાતુપદપ્રયોગાત્ પ્રાણા મદીયા ઇતિ લોકવાદાત્ ।
પ્રાણોઽપિ નાઽઽત્મા ભવિતું પ્રગલ્ભઃ સર્વોપસંહારિણિ સન્ સુષુપ્તે ॥ ૮૪॥

એવં શરીરાદ્યવિવિક્ત આત્મા ત્વંશબ્દવાચ્યોઽભિહિતોઽત્ર  વાક્યે ।
તદોદિતં બ્રહ્મ જગન્નિદાનં તથા તથૈક્યં પદયુગ્મબોધ્યમ્ ॥ ૮૫॥

કથં તદૈક્યં પ્રતિપાદયેદ્વચઃ સર્વજ્ઞસમ્મૃઢપદાભિષિક્તયોઃ ।
ન હ્યેકતા સન્તમસપ્રકાશયોઃ સન્દૃષ્ટપૂર્વા ન ચ દૃશ્યતેઽધુના ॥ ૮૬॥

સત્યં વિરોધગતિરસ્તિ તુ વાચ્યગેયં સોઽયં પુમાનિતિવદત્ર વિરોધહાનેઃ ।
આદાય વાચ્યમવિરોધિ પદદ્વયં તલ્લક્ષ્યૈક્યબોધનપરં નનુ કો વિરોધઃ ॥ ૮૭॥

જહીહિ દેહાદિગતામહન્ધિયં ચિરાર્જિતાં કર્મશઠૈઃ સુદુસ્ત્યજામ્ ।
વિવેકબુદ્ધ્યા પરમેવ સન્તતં ધ્યાયાઽઽત્મભાવેન યતો વિમુક્તતા ॥ ૮૮॥

સાધારણે વપુષિ કાકશૃગાલવહ્નિમાત્રાદિકસ્ય મમતાં ત્યજ દુઃખહેતુમ્ ।
તદ્વજ્જહીહિ બહિરર્થગતાં ચ વિદ્વંશ્ચિત્તં બધાન પરમાત્મનિ નિર્વિશઙ્કમ્ ॥ ૮૯॥

તીરાત્તીરં સઞ્ચરન્ દીર્ઘમત્સ્યસ્તીરાદ્ભિન્નો લિપ્યતે નાપિ તેન ।
એવં દેહી સઞ્ચરજાગ્રદાદૌ તસ્માદ્ભિન્નો નાપિ તદ્ધર્મકો વા ॥ ૯૦॥

જાગ્રત્સ્વપ્નસુષુપ્તિલક્ષણમદોઽવસ્થાત્રયં ચિત્તનૌ
    ત્વય્યેવાનુગતે મિથો વ્યભિચરદ્ધીસંજ્ઞમજ્ઞાનતઃ ।
ક્લૃપ્તં રજ્જિવદમંશકે વસુમતીચ્છિદ્રાહિદણ્ડાદિવત્
    તદ્બ્રહ્માસિ તુરીયમુજ્ઝિતભયં મા ત્વં પુરેવ ભ્રમીઃ ॥ ૯૧॥

પ્રત્યક્તમં પરપદં વિદુષોઽન્તિકસ્થં
    દૂરં તદેવ પરિમૂઢમતેર્જનસ્ય ।
અન્તર્બહિશ્ચ ચિતિરસ્તિ ન વેત્તિ કશ્ચિ-
    ચ્ચિન્વન્ બહિર્બહિરહો મહિમાઽઽત્મશક્તેઃ ॥ ૯૨॥

યથા પ્રપાયાં બહવો મિલન્તે ક્ષણે દ્વિતીયે બત ભિન્નમાર્ગાઃ ।
પ્રયાન્તિ તદ્વદ્બહુનામભાજો ગૃહે ભવન્ત્યત્ર ન કશ્ચિદન્તે ॥ ૯૩॥

સુખાય યદ્યત્ ક્રિયતે દિવાનિશં સુખં ન કિઞ્ચિદ્બહુદુઃખમેવ તત્ ।
વિના ન હેતું સુખજન્મ દૃશ્યતે હેતુશ્ચ હેત્વન્તરસન્નિધૌ ભવેત્ ॥ ૯૪॥

પરિપક્વમતેઃ સકૃચ્છ્રુતં જનયેદાત્મધિયં શ્રુતેર્વચઃ ।
પરિમન્દમતેઃ શનૈઃ શનૈર્ગુરુપાદાબ્જનિષેવણાદિના ॥ ૯૫॥

પ્રણવાભ્યસનોક્તકર્મણોઃ કરણેનાપિ ગુરોર્નિષેવણાત્ ।
અપગચ્છતિ માનસં મલં ક્ષમતે તત્ત્વમુદીરિતં તતઃ ॥ ૯૬॥

મનોઽનુવર્તેત દિવાનિશં ગુરૌ ગુરુર્હિ સાક્ષાચ્છિવ એવ તત્ત્વવિત્ ।
નિજાનુવૃત્યા પરિતોષિતો ગુરુર્વિનેયવવક્ત્રં કૃપયા હિ વીક્ષતે ॥ ૯૭॥

સા કલ્પવલ્લીંવ નિજેષ્ટમર્થં ફલત્યવશ્યં કિમકાર્યમસ્યાઃ ।
આજ્ઞા ગુરોસ્તત્પરિપાલનીયા સા મોદમાનીય વિધાતુમિષ્ટા ॥ ૯૮॥

ગુરૂપદિષ્ટા નિજદેવતા ચેત્કુપ્યેત્તદા પાલયિતા ગુરુઃ સ્યાત્ ।
રુષ્ટે ગુરૌ પાલયિતા ન કશ્ચિદ્ગુરૌ ન તસ્માજ્જનયેત કોપમ્ ॥ ૯૯॥

પુમાન્ પુમર્થં લભતેઽપિ ચોદિતં ભજજન્નિવૃત્તઃ પ્રતિષિદ્ધસેવનાત્ ।
વિધિં નિષેધં ચ નિવેદયત્યસૌ ગુરોરનિષ્ટચ્યુતિરિષ્ટસમ્ભવઃ ॥ ૧૦૦॥

આરાધિતં દૈવતમિષ્ટમર્થં દદાતિ તસ્યાધિગમો ગુરોઃ સ્યાત્ ।
નો ચેત્કથં વેદિતુમીશ્વરોઽયમતીન્દ્રિયં દૈવતમિષ્ટદં નઃ ॥ ૧૦૧॥

તુષ્ટે ગુરૌ તુષ્યતિ દેવતાગણો રુષ્ટે ગુરૌ રુષ્યતિ દેવતાગણઃ ।
સદાઽઽત્મભાવેન સદાત્મદેવતાઃ પશ્યન્નસૌ વિશ્વમયો હિ દેશિકઃ ॥ ૧૦૨॥

એવં પુરાણગુરુણા પરમાત્મતત્ત્વં શિષ્ટો ગુરોશ્ચરણયોર્નિપપાત તસ્ય ।
ધન્યોઽસ્મ્યહં તવ ગુરો કરુણાકટાક્ષપાતેન પાતિતતમા ઇતિ ભાષમાણઃ ॥ ૧૦૩॥

તતઃ સ સમ્પ્રાપ્ય સુરેશ્વરાખ્યાં દિગઙ્ગનાભિઃ ક્રિયમાણસખ્યામ્ ।
સચ્છિષ્યતાં ભાષ્યકૃતશ્ચ મુખ્યામવાપ તુચ્છીકૃતધાતૃસૌખ્યામ્ ॥ ૧૦૪॥

નિખિલનિગમચૂડાચિન્તયા હન્ત યાવત્
　　સ્વમનવધિકસૌખ્યં નિર્વિશન્નિર્વિશઙ્કમ્ ।
બહુતિથમભિતોઽસૌ નર્મદાં નર્મદાં તાં
　　મગધભુવિ નિવાસં નિર્મમે નિર્મમેન્દ્રઃ ॥ ૧૦૫॥

ઇતિ વશીકૃતમણ્ડનપણ્ડિતઃ પ્રણતસત્કરણત્રયદણ્ડિતઃ ।
સકલસદ્ગુણમણ્ડલમણ્ડિતઃ સ નિરગાત્ કૃતદુર્મતખણ્ડિતઃ ॥ ૧૦૬॥

કુસુમિતવિવિધપલાશભ્રમદલિકુલગીતમધુરસ્વનમ્ ।
પશ્યન્ વિપિનમયાસીદાશાં કીનાશપાલિતામેષઃ ॥ ૧૦૭॥

તત્ર મહારાષ્ટ્રમુખે દેશે ગ્રન્થાન્ પ્રચારયન્ પ્રાજ્ઞતમઃ ।
શમિતપતાન્તરમાનઃ શનકૈઃ સનકોપમોઽગમચ્છ્રીશૈલમ્ ॥ ૧૦૮॥

પ્રફુલ્લમલ્લિકાવનપ્રસઙ્ગસઙ્ગતામિતપ્રકાણ્ડ ગન્ધબન્ધુરપ્રવાતધૂતપાદપમ્ ।
સદામદદ્વિપાધિપપ્રહારશૂરકેસરિવ્રજં ભુજઙ્ગભૂષણપ્રિયં સ્વયમ્ભુકૌશલમ્ ॥ ૧૦૯॥

કલિકલ્મષભઙ્ગાયાં સોઽદ્રેરારાચ્ચલત્તરઙ્ગાયામ્ ।
અધરીકૃતતુઙ્ગાયાં સસ્નૌ પાતાલગામિગઙ્ગાયામ્ ॥ ૧૧૦॥

નમન્મોહભઙ્ગં નમોલેહિશ‌ૃઙ્ગં ત્રુટત્પાપસઙ્ગં રટત્પક્ષિભૃઙ્ગમ્ ।
સમાશ્લિષ્ટગઙ્ગં પ્રહૃષ્ટાન્તરઙ્ગં તમારુહ્ય તુઙ્ગં દદર્શેશલિઙ્ગમ્ ॥ ૧૧૧॥

પ્રણમદ્ભવબીજભર્જનં પ્રણિપત્યામૃતસમ્પદાર્જનમ્ ।
પ્રમુમોદ સ મલ્લિકાર્જુનં ભ્રમરામ્બાસચિવં નતાર્જુનમ્ ॥ ૧૧૨॥

તીરરુહૈઃ કૃષ્ણાયાસ્તીરેઽવાત્સીત્તિરોહિતોષ્ણાયાઃ ।
આવર્જિતતૃષ્ણાયા આચાર્યેન્દ્રો નિરસ્તકાર્ષ્ણ્યાયાઃ ॥ ૧૧૩॥

તત્રાતિચિત્રપદમત્રભવાન્ પવિત્રકીર્તિર્વિચિત્રસુચરિત્રનિધિઃ સુધીન્દ્રાન્ ।
અગ્રાહયત્કૃતમસદ્ગ્રહનિગ્રહાર્થમગ્ર્યાન્ સમગ્રસુગુણાન્ મહદગ્રયાયી ॥ ૧૧૪॥

અધ્યાપયન્તમસદર્થનિરાસપૂર્વં કિન્ત્વન્યતીર્થયશસં શ્રુતિભાષ્યજાતમ્ ।
આક્ષિપ્ય પાશુપતવૈષ્ણવવીરશૈવમાહેશ્વરાશ્ચ વિજિતા હિ સુરેશ્વરાદ્યૈઃ ॥ ૧૧૫॥

કે ચદ્વિસૃજ્ય મતમાત્મ્યમમુષ્ય શિષ્ય-
    ભાવં ગતા વિગતમત્સરમાનદોષાઃ ।
અન્યે તુ મન્યુવશમેત્ય જઘન્યચિત્તા
    નિન્યુઃ ક્ષણં નિધનમસ્ય નિરીક્ષમાણાઃ ॥ ૧૧૬॥

વેદાન્તીકૃતનીચશૂદ્રવચસો વેદાઃ સ્વયં કલ્પનાઃ
    પાપિષ્ઠાઃ સ્વમપિ ત્રયીપથમપિ પ્રાયો દહન્તઃ ખલાઃ ।
સાક્ષાદ્બ્રમણિ શઙ્કરે વિદધતિ સ્પર્ધાનિબદ્ધાં મતિં
    કૃષ્ણે પૌણ્ડ્રકવત્તથા ન ચરમાં કિં તે લભન્તે ગતિમ્ ॥ ૧૧૭॥

વાણી કાણભુજી ચ નૈવ ગણિતા લીના ક્વચિત્કાપિલી
શૈવં ચાશિવભાવમેતિ ભજતે ગર્હાપદં ચાર્હતમ્ । -
દૌગં દુર્ગતિમશ્નુતે ભુવિ જનઃ પુષ્ણાતિ કો વૈષ્ણવં
નિષ્ણાતેષુ યતીશસૂક્તિષુ કથાકેલીકૃતાસૂક્તિષુ ॥ ૧૧૮॥

તથાગતકથા ગતા તદનુયાયિ નૈયાયિકં
    વચોઽજનિ ન ચોદિતો વદતિ જાતુ તૌતાતિતઃ ।
વિદગ્ધતિ ન દગ્ધધીર્વિદિતચાપલં કાપિલં
    વિનિર્દયવિનિર્દલદ્વિમતસઙ્કુરે શઙ્કરે ॥ ૧૧૯॥

ઇતિ શ્રીમાધવીયે તત્કલાજ્ઞત્વપ્રપઞ્ચનમ્ ।

સઙ્ક્ષેપશઙ્કરજયે સર્ગોઽયં દશમોઽભવત્ ॥ ૧૦॥

આદિતઃ શ્લોકાઃ ૧૧૪૮ ।

# શઙ્કરદિગ્વિજયમ્

## ॥ ૧૧. એકાદશઃ સર્ગઃ ઉગ્રભૈરવવધઃ ॥

અથૈકાદશઃ સર્ગઃ ॥

તત્રૈકદાચ્છાદિતનૈજદોષઃ પૌલસ્ત્યવત્કલ્પિતસાધુવેષઃ ।
નિર્માનમાયં સ્થિતકાર્યશેષઃ કાપાલિકઃ કશ્ચિદનલ્પદોષઃ ॥ ૧॥

અસાવપશ્યન્મદનાદ્યવશ્યં વશ્યેન્દ્રિયાશ્રૈર્મુનિભિર્વિમૃગ્યમ્ ।
આદિશ્ય ભાષ્યં સપદિ પ્રશસ્યમાસીનમાશ્રિત્ય મુનિં રહસ્યમ્ ॥ ૨॥

દૃષ્ટ્વૈવ હૃષ્ટઃ સ ચિરાદભીષ્ટં નિર્ધાર્ય સંસિદ્ધમિવ સ્વમિષ્ટમ્ ।
મહદ્ભિશિષ્ટં નિજલાભતુષ્ટં વિસ્પષ્ટમાચષ્ટ ચ કૃત્યશિષ્ટમ્ ॥ ૩॥

ગુણાંસ્તવાકર્ણ્ય મુનેઽનવદ્યાન્સાર્વજ્ઞ્યસૌશીલ્યદયાલુતાદ્યાન્ ।
દ્રષ્ટું સમુત્કણ્ઠિતચિત્તવૃત્તિર્ભવન્તમાગાં વિદિતપ્રવૃત્તિઃ ॥ ૪॥

ત્વમેક એવાત્ર નિરસ્તમોહઃ પરાકૃતદ્વૈતિવચઃસમૂહઃ ।
આભાસિ દૂરીકૃતદેહમાનઃ શુદ્ધાદ્વયે યોજિતસર્વમાનઃ ॥ ૫॥

પરોપકૃત્યૈ પ્રગૃહીતમૂર્તિરમર્ત્યલોકેષ્વપિ ગીતકીર્તિઃ ।
કટાક્ષલેશાર્દિવસજ્જનાર્તિઃ સદુક્તિસમ્પાદિતવિશ્વપૂર્તિઃ ॥ ૬॥

ગુણાકરત્વાદ્ભુવનૈકમાન્યઃ સમસ્તવિત્વાદભિમાનશૂન્યઃ ।
વિજિત્વરત્વાદ્બલહસ્તિતાન્યઃ સ્વાત્મપ્રદત્વાચ્ચ મહાવદાન્યઃ ॥ ૭॥

અશેષકલ્યાણગુણાલયેષુ પરાવરજ્ઞેષુ ભવાદૃશેષુ ।
કાર્યાર્થિનઃ ક્વાપ્યનવાપ્ય કામં ન યાન્તિ દુષ્પ્રાપમપિ પ્રકામમ્ ॥ ૮॥

તસ્માન્મહત્કાર્યમહં પ્રપદ્ય નિર્વર્તિતં સર્વવિદા ત્વયાઽદ્ય ।
કપાલિનં પ્રીણયિતું યતિષ્યે કૃતાર્થમાત્માનમતઃ કરિષ્યે ॥ ૯॥

અનેન દેહેન સહૈવ ગન્તું કૈલાસમીશેન સમં ચ રન્તુમ્ ।
અતોષયં તીવ્રતપોભિરુગ્રં સુદુષ્કરૈરબ્દશતં સમગ્રમ્ ॥ ૧૦॥

તુષ્ટોઽબ્રવીન્માં ગિરિશઃ પુમર્થમભીપ્સિતં પ્રાપ્સ્યસિ મત્પ્રિયાર્થમ્ ।
જુહોષિ ચેત્સર્વવિદઃ શિરો વા હુતાશને ભૂમિપતેઃ શિરો વા ॥ ૧૧॥

એતાવદુક્ત્વાઽન્તરધાન્મહેશસ્તદાદિ તત્સઙ્ગ્રહણે ધૃતાશઃ ।
ચરામ્યથાપિ ક્ષિતિપો ન લબ્ધો ન સર્વવિત્તત્ર મયોપલબ્ધઃ ॥ ૧૨॥

દિષ્ટ્યાઽદ્ય લોકસ્ય હિતે ચરન્તં સર્વજ્ઞમદ્રાક્ષમહં ભવન્તમ્ ।
ઇતઃ પરં સેત્સ્યતિ મેઽનુવન્ધઃ સન્દર્શનાન્તો જનસ્ય બન્ધઃ ॥ ૧૩॥

મૂર્ધાભિષિક્તસ્ય શિરઃકપાલં મુનીશિતુર્વા મમ સિદ્ધિહેતુઃ ।
આદ્યં પુનર્મે મનસાઽપ્યલભ્યં તતઃપરં તત્રભવાન્ પ્રમાણમ્ ॥ ૧૪॥

શિરઃપ્રદાનેઽદ્ભુતકીર્તિલાભસ્તવાપિ લોકે મમ સિદ્ધિલાભઃ ।
આલોચ્ય દેહસ્ય ચ નશ્વરત્વં યદ્રોચતે સત્તમ તત્કુરુ ત્વમ્ ॥ ૧૫॥

તદ્યાચિતું ન ક્ષમતે મનો મે કો વેષ્ટદાયિ સ્વશરીરમુજ્ઝતુ ।
ભવાન્વિરક્તો ન શરીરમાની પરોપકારાય ધૃતાત્મદેહઃ ॥ ૧૬॥

જનાઃ પરક્લેશકથાનભિજ્ઞા નક્તં દિવા સ્વાર્થકૃતાત્મચિત્તાઃ ।
રિપું નિહન્તું કુલિશાય વજ્રી દાધીચમાદાત્કિલ વાઞ્છિતાસ્થિ ॥ ૧૭॥

દધીચિમુખ્યાઃ ક્ષણિકં શરીરં ત્યક્ત્વા પરાર્થે સ્મ યશઃ શરીરમ્ ।
પ્રાપ્ય સ્થિરં સર્વગતં જગન્તિ ગુણૈરનર્ઘ્યૈઃ કિલ રઞ્જયન્તિ ॥ ૧૮॥

વપુર્ધરન્તે પરતુષ્ટિહેતોઃ કેચિત્પ્રશાન્તા દયયા પરીતાઃ ।
અસ્માદૃશાઃ કેચન સન્તિ લોકે સ્વાર્થૈકનિષ્ઠા દયયા વિહીનાઃ ॥ ૧૯॥

પરોપકારં ન વિનાઽસ્તિ કિઞ્ચિત્પ્રયોજનં તે વિધુતૈષણસ્ય ।
અસ્માદૃશાઃ કામવશાસ્તુ યુક્તાયુક્તે વિજાનન્તિ ન હન્ત યોગિન્ ॥ ૨૦॥

જીમૂતવાહો નિજજીવદાયી દધીચિરપ્યસ્થિ મુદા દદાનઃ ।
આચન્દ્રતારાર્કમપાયશુન્યં પ્રાપ્તૌ યશઃ કર્ણપથં ગતૌ હિ ॥ ૨૧॥

યદપ્યદેયં નનુ દેહવદ્ભિર્મયાઽર્થિતં ગર્હિતમેવ સદ્ભિઃ ।
તથાઽપિ સર્વત્ર વિરાગવદ્ભિઃ કિમસ્ત્યદેયં પરમાર્થવિદ્ભિઃ ॥ ૨૨॥

અખણ્ડમૂર્ધન્યકપાલમાહુઃ સંસિદ્ધિદં સાધકપુઙ્ગવેભ્યઃ ।
વિના ભવન્તં બહવો ન સન્તિ તદ્વત્પુમાંસો ભગવન્ પૃથિવ્યામ્ ॥ ૨૩॥

પ્રયચ્છ શીર્ષં ભગવન્નમઃ સ્વાદિતીરયિત્વા પતિતં પુરસ્તાત્ ।
તમબ્રવીદ્વીક્ષ્ય સુધીરધસ્તાત્કૃપાલુરાવૃત્તમનાઃ સમસ્તાત્ ॥ ૨૪॥

નૈવાભ્યસુયામિ વચસ્ત્વદીયં પ્રીત્યા પ્રયચ્છામિ શિરોઽસ્મદીયમ્ ।
કો વાઽર્થિસાત્માઙ્ગતમો નૃકાયં જાનન્ન કુર્યાદિહિ(હ?) બહ્વપાયમ્ ॥ ૨૫॥

પતત્યવશ્યં હિ વિકૃષ્યાણં કાલેન યત્નાદપિ રક્ષ્યમાણમ્ ।
વર્મામુના સિધ્યતિ ચેત્પરાર્થઃ સ એવ મર્ત્યસ્ય પરઃ પુમર્થઃ ॥ ૨૬॥

વર્તે વિવિક્તેઽધિસમાધિ સિદ્ધિવિન્મિથઃ સમાયાહિ કરોમિ તે મતમ્ ।
નાહં પ્રકાશં વિતરીતુમુત્સહે શિરઃકપાલં વિજનં સમાશ્રય ॥ ૨૭॥

શિષ્યા વિદન્તિ યદિ ચિન્તિતકાર્યમેતત્
  યોગિન્ મદેકશરણા વિહતિં વિદધ્યુઃ ।
કો વા સહેત વપુરેતદપોહિતું સ્વં
  કો વા ક્ષમેત નિજનાથશરીરમોક્ષમ્ ॥ ૨૮॥

તૌ સંવિદં વિતનુતામિતિ સમ્પ્રદૃષ્ટૌ
  યોગી જગામ મુદિતો નિલયં મનસ્વી ।
શ્રીશઙ્કરોઽપિ નિજધામનિ જોષમાસ
  પ્રોચે ન કિઞ્ચિદપિ ભાવપસૌ મનોગમ્ ॥ ૨૯॥

શૂલી ત્રિપુણ્ડ્રી પુરતોઽવલોકી કઙ્કાલમાલાકૃતગાત્રભૂષઃ ।
સંરક્તનેત્રો મદઘૂર્ણિતાક્ષો યોગી યયૌ દેશિકવાસભૂમિમ્ ॥ ૩૦॥

શિષ્યેષુ શિષ્ટેષુ વિદુગ્ગેષુ સ્નાનાદિકાર્યાય વિવિક્તભાજિ ।
શ્રીદેશિકેન્દ્રે તુ સનન્દનાખ્યભીત્યા સ્વદેહં વ્યવધાય ગૂઢે ॥ ૩૧॥

તં ભૈરવાકારમુદીક્ષ્ય દેશિકસ્ત્યક્તું શરીરં વ્યધિત સ્વયં મનઃ ।
આત્માનમાત્મન્યુદયુઙક્ત યો જપન્ સમાહિતાત્મા કરણાનિ સંહરન્ ॥ ૩૨॥

તં ભૈરવોઽલોકત લોકપૂજ્યં સ્વસૌખ્યતુચ્છીકૃતદેવરાજ્યમ્ ।
યોગીશમાસાદિતનિર્વિકલ્પં સનત્સુજાતપ્રભૃતેરનલ્પમ્ ॥ ૩૩॥

જત્રુપ્રદેશે ચિબુકં નિધાય વ્યાત્તાસ્યમુત્તાનકરૌ નિધાય
જાનૂપરિ પ્રેક્ષિતનાસિકાન્તં વિલોચને સામિ નિમીલ્ય કાન્તમ્ ॥ ૩૪॥

આસીનમુચ્ચીકૃતપૂર્વગાત્રં સિદ્ધાસનં શેષિતબોધમાત્રમ્ ।
ચિન્માત્રવિન્યસ્તહૃષીકવર્ગં સમાધિવિસ્મારિતવિશ્વસર્ગમ્ ॥ ૩૫॥

વિલોક્ય તં હન્તુમપાસ્તશઙ્કઃ સ્વબુદ્ધિપૂર્વાર્જિતતીવ્રપઙ્કઃ ।

પ્રાપોઘતાસિઃ સવિધં સ યાવદ્વિજ્ઞાતવાન્ પદ્મપદોઽપિ તાવત્ ॥ ૩૬॥

ત્રિશૂલમુદ્ય(મ્ય?)નિહન્તુકામં ગુરું યતાત્મા સમુદૈક્ષતાન્તઃ ।
સ્થિતશ્ચુકોપ જ્વલિતાગ્નિકલ્પઃ સ પદ્મપાદઃ સ્વગુરોહિતૈષી ॥ ૩૭॥

સ્મરન્નયૈષ સ્મરદાર્તિહારિ પ્રહ્લાદવશ્યં પરમં મહસ્તત્ ।
સ મન્ત્રસિદ્ધો નૃહરેર્નૃસિંહો ભૂત્વા દદર્શોગ્રદુરીહચેષ્ટામ્ ॥ ૩૮॥

સ તત્ક્ષણક્ષુબ્ધનિજસ્વભાવઃ પ્રવૃદ્ધરુડ્ વિસ્મૃતમર્ત્યભાવઃ ।
આવિષ્કૃતાત્યુગ્રનૃસિંહભાવઃ સમુત્પપાતાતુલિતપ્રભાવઃ ॥ ૩૯॥

સટાચ્છટાસ્ફોટિતમેઘસઙ્ઘસ્તીવ્રારવત્રાસિતભૂતસઙ્ઘઃ
સંવેગસમ્મૂર્ચ્છિતલોકસઙ્ઘઃ કિમેતદિત્યાકુલદેવસઙ્ઘઃ ॥ ૪૦॥

ક્ષુભ્યત્સમુદ્રં સમુદૂઢરૌદ્રં રટન્નિશાટં સ્ફુટદદ્રિકૂટમ્ ।
જ્વળદ્દિશાન્તં પ્રચલદ્ધરાન્તં પ્રભ્રશ્યદક્ષં દલદન્તરિક્ષમ્ ॥ ૪૧॥

જવાદભિદ્રુત્ય શિતસ્વરૂગ્રૈર્દૈત્યેશ્વરસ્યેવ પુરા નખાગ્રૈઃ ।
ક્ષિપત્રિશુલસ્ય સ તસ્ય વક્ષો દદાર વિક્ષિપ્તસુરારિપક્ષઃ ॥ ૪૨॥

તત્તાદૃગત્યુગ્રનખાયુધાગ્ર્યો દંષ્ટાન્તરપ્રોતદુરીહદેહઃ ।
નિન્યે તદાનીં નૃહરિર્વિદીર્ણદ્યુપટ્ટનાટ્ટાલિકમટ્ટહાસમ્ ॥ ૪૩॥

આકર્ણયંસ્તં નિનદં બહિર્ગતા ઉપાગમન્નાકુલચિત્તવૃત્તયઃ ।
વ્યલોકયન્ ભૈરવમગ્રતો મૃતં તતો વિમુક્તં ચ ગુરું સુખોષિતમ્ ॥ ૪૪॥

પ્રહ્લદવશ્યો (પ્રહ્લાદવશ્યો?) ભગવાન્ કથં વા પ્રસાદિતોઽયં નૃહરિસ્ત્વયેતિ ।
સવિસ્મયૈઃ સ્નિગ્ધજનૈઃ સ પૃષ્ટઃ સનન્દનઃ સસ્મિતમિત્યવાદીત્ ॥ ૪૫॥

પુરા કિલાહં બલભૂધરાગ્રે પુણ્યં સમાશ્રિત્ય કિમપ્યરણ્યમ્ ।
ભક્ત્યૈકવશ્યં ભગવન્તમેનં ધ્યાયન્નનેકાન્ દિવસાનનૈષમ્ ॥ ૪૬॥

કિમર્થમેકો ગિરિગહ્વરેઽસ્મિન્ વાચંયમ ત્વં વસસીતિ શશ્વત્ ।
કેનાપિ પૃષ્ટોઽત્ર કિરાતયૂના પ્રત્યુત્તરં પ્રાગહમિત્યવોચમ્ ॥ ૪૭॥

આકણ્ઠમત્યદ્ભુતમર્ત્યમૂર્તિઃ કણ્ઠીરવાત્મા પરતશ્ચ કશ્ચિત્ ।
મૃગો વનેઽસ્મિન્ મૃગયો વસન્મે ભવત્યહો નાક્ષિપથે કદાપિ ॥ ૪૮॥

ઇતીરયત્યેવ મયિ ક્ષણેન વનેચરોઽયં પ્રવિશન્ વનાન્તમ્ ।
નિબધ્ય ગાઢં નૃહરિં લતાભિઃ પુણ્યૈરગણ્યૈઃ પુરતો ન્યધાન્મે ॥ ૪૯॥

મહર્ષિભિસ્ત્વં મનસાપ્યગમ્યો વનેચરસ્યૈવ કથં વશેઽભૂઃ ।
ઇત્યદ્ભુતાવિષ્ટહૃદા મયાઽસૌ વિજ્ઞાપ્યમાનો વિભુરિત્યવાદીત્ ॥ ૫૦॥

એકાગ્રચિત્તેન યથાઽમુનાહં ધ્યાતસ્તથા ધાતૃમુખૈર્ન પૂર્વૈઃ ।
નોપાળભેથાસ્ત્વમિતીરયન્મે કૃત્વા પ્રસાદં કૃતવાંસ્તિરોધિમ્ ॥ ૫૧॥

આકર્ણ્ય તાં પદ્મપદસ્ય વાણીમાનન્દમગ્નૈરખિલૈરભાવિ ।
જગર્જ ચોચ્ચૈર્જગદણ્ડભાણ્ડં ભૂમ્ના સ્વધામ્ના દલયન્ નૃસિંહઃ ॥ ૫૨॥

તતસ્તદાર્ભાટચલત્સમાધિઃ સ્વાત્મપ્રબોધોન્મથિતત્ર્યુપાધિઃ ।
ઉન્મીલ્ય નેત્રે વિકરાલવક્ત્રં વ્યલોકયન્માનવપઞ્ચવક્ત્રમ્ ॥ ૫૩॥

ચન્દ્રાંશુસોદર્યસટાજટાલં તાર્તીયનેત્રાબ્જકનન્નિટાલમ્ ।
સહોઘદુષ્ણાંશુસહસ્રભાસં વિધ્યણ્ડવિસ્ફોટકુદટ્ટહાસમ્ ॥ ૫૪॥

નખાગ્રનિર્ભિન્નકપાલિવક્ષઃસ્થલોચ્ચલચ્છોણિતપઙ્કિલાઙ્ગમ્ ।
શ્રીવત્સવત્સં ગલવૈજયન્તીશ્રીરત્નસંસ્પર્ધિતદન્ત્રમાલમ્ ॥ ૫૫॥

સુરાસુરત્રાસકરાતિઘોરસ્વાકારસારવ્યથિતાણ્ડકોશમ્ ।
દંષ્ટ્ર(ષ્ટ્રા?)કરાલાનનનિર્યદગ્નિજ્વાલાલિસંલીઢનભોવકાશમ્ ॥ ૫૬॥

સ્વરોમકૂપોદ્ગતવિસ્ફુલિઙ્ગપ્રચારસન્દીપિતસર્વલોકમ્ ।
જમ્ભદ્વિડુજ્જૃમ્ભિતશમ્ભુદમ્ભસંસ્તમ્ભનારમ્ભકદન્તપેષમ્ ॥ ૫૭॥

મા ભૂદકાણ્ડે પ્રલયો મહાત્મન્ કોપં નિયચ્છેતિ ગૃણદ્ભિરારાત્ ।
સસાધ્વસૈઃ પ્રાઞ્જલિભિઃ સગાત્રકમ્પૈર્વિરિઞ્ચ્યાદિભિરર્થ્યમાનમ્ ॥ ૫૮॥

વિલોક્ય વિદ્યુચ્ચપલોગ્રજિહ્વં યતિક્ષિતીશઃ પુરતો નૃસિંહમ્ ।
અભીતિરૈડિષ્ટ તદોપકણ્ઠં સ્થિતોઽપિ હર્ષાશ્રુપિનદ્ધકણ્ઠઃ ॥ ૫૯॥

નરહરે હર કોપમનર્થદં તવ રિપુર્નિહતો ભુવિ વર્તતે ।
કુરુ કૃપાં મયિ દેવ સનાતનીં જગદિદં ભયમેતિ ભવદ્દૃશા ॥ ૬૦॥

તવ વપુઃ કિલ સત્વમુદાહૃતં તવ હિ કોપનમણ્વપિ નોચિતમ્ ।
તદિહ શાન્તિમવાપ્નુહિ શર્મણે હરગુણં હરિરાશ્રયસે કથમ્ ॥ ૬૧॥

સકલભીતિષુ દૈવતમ સ્મરન્ સકલભીતિમપોહ્ય સુખી પુમાન્ ।
ભવતિ કિં પ્રવદામિ તવેક્ષણે પરમદુર્લભમેવ તવેક્ષણમ્ ॥ ૬૨॥

સ્મૃતવતસ્તવ પાદસરોરુહં મૃતવતઃ પુરુષસ્ય વિમુક્તતા ।
તવ કરાભિહતોઽમૃત ભૈરવો ન હિ સ એષ પુનર્ભવમેષ્યતિ ॥ ૬૩॥

દિતિજસૂનુમમું વ્યસનાર્દિતં સકૃદરક્ષદુદારગુણો ભવાન્ ।
સકલગત્વમુદીરિતમસ્ફુટં પ્રકટમેવ વિધિત્સુરભૂત્પુરઃ ॥ ૬૪॥

સૃજસિ વિશ્વમિદં રજસાऽऽવૃતઃ સ્થિતિવિધૌ શ્રિતસત્વ ઉદાયુધઃ ।
અવસિ તદ્ધરણે તમસાऽऽવૃતો હરસિ દેવ તદા હરસંજ્ઞિતઃ ॥ ૬૫॥

તવ જનિર્ન ગુણાસ્તવ તત્ત્વતો જગદનુગ્રહણાય ભવાદિકમ્ ।
તવ પદં ખલુ વાઙ્મનસાતિગં શ્રુતિવચશ્ચકિતં તવ બોધકમ્ ॥ ૬૬॥

નરહરે તવ નામપરિશ્રવાત્ પ્રમથગુહ્યકદુષ્ટપિશાચકાઃ ।
અપસરન્તિ વિભોऽસુરનાયકા ન હિ પુરઃસ્થિતયે પ્રભવન્ત્યમી ॥ ૬૭॥

ત્વમેવ સર્ગસ્થિતિહેતુરસ્ય ત્વમેવ નેતા નૃહરેऽખિલસ્ય ।
ત્વમેવ ચિન્ત્યો હૃદયેऽનવદ્યે ત્વામેવ ચિન્માત્રમહં પ્રપદ્યે ॥ ૬૮॥

હતો વરાકો હિ રુષં નિયચ્છ વિશ્વસ્ય ભૂમન્નભયં પ્રયચ્છ ।
એતે હિ દેવાઃ શમમર્થયન્તે નિરીક્ષ્ય ભીતાઃ પ્રતિખેદયન્તે ॥ ૬૯॥

દ્રષ્ટું ન શક્યા હિ તવાનુકમ્પાહીનૈર્જનૈર્નિહુતકોટિશમ્પાં
મૂર્તિં તદાત્મન્નુપસંહરેમાં પાહિ ત્રીલોકીં સમતીતસીમામ્ ॥ ૭૦॥

કલ્પાન્તોજ્જૃમ્ભમાણપ્રમથતરિવૃઢપ્રૌઢલાલાટવહ્નિ-
જ્જ્વાલાલીઢત્રિલોકીજનિતચટચટાધ્વાનધિક્કારધુર્યઃ ।
મધ્યે બ્રહ્માણ્ડભાણ્ડોદરકુહરમનૈકાન્ત્યદુઃસ્થામવસ્થાં
સ્ત્યાનસ્ત્યાનો મમાયં દલયતુ દુરિતં શ્રીનૃસિંહાટ્ટહાસઃ ॥ ૭૧॥

મધ્યે વ્યાનદ્ધવાતન્ધયગુણવલનાધાનમન્થાનભૂભૃ-
ન્મન્થેનોત્ક્ષિપ્તદુગ્ધોદધિલહરિમિથઃ(થા?)સ્ફાલનાચારઘોરઃ ।
કલ્પાન્તોન્નિદ્રરુદ્રોચ્ચ્યતરડમરુકધ્વાનબદ્ધાભ્યસૂયો
ઘોષોऽયં કર્ણઘોરઃ ક્ષપયતુ નૃહરે રંહસાં સંહતિં નઃ ॥ ૭૨॥

ક્ષુન્દાનો મઙ્ક્ષુ કલ્પાવધિસમયસમુજ્જમ્ભદમ્ભોદગુમ્ભ-
સ્ફુર્જદ્દમ્ભોલિસઙ્ઘસ્ફુરદુરુરટિતાખર્વગર્વપ્રરોહાન્ ।
ક્રીડાક્રોડેન્દ્રઘોણાસરભસવિસરદ્ઘોરઘૂર્ઘોરવશ્રી-
ર્ગમ્ભીરસ્તેऽટ્ટહાસો હર હર નૃહરે રહંસાऽહાંસિ હન્યાત્ ॥ ૭૩॥

એવં વિશિષ્ટનુતિભિર્નૃહરૌ પ્રશાન્તે સ્વં ભાવમેત્ય મુનિરેષ બભૂવ શાન્તઃ ।
સ્વભાનુભૂતમિત્રવ શાન્તમનાઃ સ્મરંસ્તમાત્માનમાત્મગુરવે પ્રણતિં ચકાર ॥ ૭૪॥

ચારિત્ર્યમેતત્પ્રયતસ્ત્રિસન્ધ્યં ભક્ત્યા પઠેદ્યઃ શ‍ૃણુયાદવન્ધ્યમ્ ।
તીર્ત્વાઽપમૃત્યું પ્રતિપદ્ય ભક્તિં સ ભુક્તભોગઃ સમુપૈતિ મુક્તિમ્ ॥ ૭૫॥

ઇતિ શ્રીમાધવીયે તદુગ્રભૈરવનિર્જયઃ ।
સઙ્ક્ષેપશઙ્કરજયે સર્ગ એકાદશોઽભવત્ ॥ ૧૧॥

આદિતઃ લોકાઃ ૧૨૨૩।

# શઙ્કરદિગ્વિજયમ્

## ॥ ૧૨. દ્વાદશઃ સર્ગઃ હસ્તામલકાદીનાં શિષ્યત્વેન ગ્રહણમ્ ॥

અથ દ્વાદશઃ સર્ગઃ ॥ ૧૨॥

અથૈકદાઽસૌ યતિસાર્વભૌમસ્તીર્થાનિ સર્વાણિ ચરન્ સતીર્થ્યૈઃ ।
ઘોરાત્ કલેર્ગોપિતધર્મમાગાદ્ગોકર્ણમભ્યર્ણચલાર્ણવૌઘશ્ચિમ્ ॥ ૧॥

વિરિઞ્ચિનામ્ભોરુહનાભવન્દ્યં પ્રપઞ્ચનાટ્યાદ્ભુતસૂત્રધારમ્ ।
તુષ્ટાવ વામાર્ધવધૂટિમસ્તદુષ્ટાવલેપં પ્રણમન્ મહેશમ્ ॥ ૨॥

વપુઃ સ્મરામિ ક્વચન સ્મરારેર્બલાહકાદ્વૈતવદાવદશ્રિ ।
સૌદામિનીસાધિતસમ્પ્રદાયસમર્થનાદેશિકમન્યતશ્ચ ॥ ૩॥

વામાઙ્ગસીમાઙ્કુરદંશુતૃણ્યાચઞ્ચન્મૃગાઞ્ચત્તરદક્ષપાણિ ।
સવ્યાન્યશોભાકલમાગ્રભક્ષસાકાઙ્ક્ષકીરાન્યકરં મહોઽસ્મિ ॥ ૪॥

મહીધ્રકન્યાગલસઙ્ગતોઽપિ માઙ્ગલ્યતન્તુઃ કિલ હાલહાલમ્ ।
યત્કણ્ઠદેશેઽકૃત કુણ્ઠશક્તિમૈક્યાનુભાવાદહમસ્મિ ભૂમા ॥ ૫॥

ગુણત્રયાતીતવિભાવ્યમિત્થં ગોકર્ણનાથં વચસાઽર્ચયિત્વા ।
તિસ્રઃ સ રાત્રીસ્ત્રિજગત્પવિત્રે ક્ષેત્રે મુદૈષ ક્ષિપતિ સ્મ કાલમ્ ॥ ૬॥

વૈકુણ્ઠકૈલાસવિવર્તભૂતં હરન્નતાઘં  હરિશઙ્કરાખ્યમ્ ।
દિવ્યસ્થલં દેશિકસાર્વભૌમસ્તીર્થપ્રવાસી નચિરાદયાસીત્ ॥ ૭॥

ભ્રમાપનોદાય ભિદાવદાનામદ્વૈતમુદ્રામિહ દર્શયન્તૌ ।
આરાધ્ય દેવૌ હરિશઙ્કરૌ સ દ્વયર્થાભિરિત્યર્ચયતિ સ્મ વાગ્ભિઃ ॥ ૮॥

વન્દ્યં મહાસોમકલાવિલાસં ગામાદરેણાઽઽકલયન્નનાદિમ્ ।
મૈનં મહઃકિઞ્ચન દિવ્યમઙ્ગીકુર્વન્ વિભુર્મે કુશલાનિ કુર્યાત્ ॥ ૯॥

યો મન્દરાગં દધદાદિતેયાન સુધાભુજઃ સ્માઽઽતનુતે વિષાદી ।
સ્વામદ્રિલોલોચિતચારુમૂર્તે કૃપામપારાં સ ભવાન્ વિધત્તામ્ ॥ ૧૦॥

ઉલ્લાસયન્યો મહિમાનમુચ્ચૈઃ સ્ફુરદ્વરાહીશકલેવરોઽભૂત્ ।
તસ્મૈ વિદધ્મઃ કરયોરજસ્રં સાયન્તનામ્ભોરુહસામરસ્યમ્ ॥ ૧૧॥

સમાવહન્ કેસરિતાં વરાં યઃ સુરદ્વિષત્કુઞ્જરમાજઘાન ।
પ્રહ્લાદમુલ્લાસિતમાદધાનં પઞ્ચાનનં તં પ્રણુમઃ પુરાણમ્ ॥ ૧૨॥

ઉદૈત્તુ બલ્યાહરણાભિલાષો યો વામનં હાર્યજિનં વસાનઃ ।
તપાંસિ કાન્તારહિતો વ્યતાનીદાયોઽવતાદાશ્રમિણામયં નઃ ॥ ૧૩॥

યેનાધિકોધત્તરવારિણાઽઽશુ જિતોઽર્જુનઃ સંઙ્ગરરઙ્ગભૂમૌ ।
નક્ષત્રનાથસ્ફુરિતેન તેન નાથેન કેનાપિ વયં સનાથાઃ ॥ ૧૪॥

વિલાસિનાઽલીકભવેન ધામ્ના કામં દ્વિષન્તં સ દશાસ્યમસ્યન્ ।
(દશાસ્યમસ્યન્ દશેન્દ્રિયવારકં કામમ્)
દેવો ધરાપત્યકુચોષ્મસાક્ષી દેયાદમન્દાત્મસુખાનુભૂતિમ્ ॥ ૧૫॥

ઉત્તાલકેતુઃ સ્થિરધર્મમૂર્તિર્હાલાહલસ્વીકરણોગ્રકણ્ઠઃ ।
સ રોહિણીશાનિશચુમ્બ્યમાનનિજોત્તમાઙ્ગોઽવતુ કોઽપિ ભૂમા ॥ ૧૬॥

વિનાયકેનાઽઽકલિતાહિતાપં નિષેદુષોત્સઙ્ગભુવિ પ્રહૃષ્યન્ ।
યઃ પૂતનામોહકચિત્તવૃત્તિરવ્યાદસૌ કોઽપિ કલાપભૂષઃ ॥ ૧૭॥

પાઠીનકેતોર્જયિને પ્રતીતસર્વજ્ઞભાવાય દયૈકસીમ્ને ।
પ્રાયઃ ક્રતુદ્વેષકૃતાદરાય બોધૈકધામ્ને સ્પૃહયામિ ભૂમ્ને ॥ ૧૮॥

વ્યતીત્ય ચેતોવિષયં જનાનાં વિદ્યોતમાનાય તમોનિહન્ત્રે ।
ભૂમ્ને સદાવાસકૃતાશયાય ભૂયાંસિ મે સન્તુતમાં નમાંસિ ॥ ૧૯॥

વૃષાકપાયીવરયોઃ સપર્યાં વાચાઽતિમોચારસયેતિ તન્વન્ ।
મુનિપ્રવીરો મુદિતાત્મકામો મૂકામ્બિકાયાઃ સદનં પ્રતસ્થે ॥ ૨૦॥

અઙ્કે નિધાય વ્યસુમાત્મજાતં મહાકુલૌ હન્ત મુહુઃ પ્રરુદ્ય ।
તદેકપુત્રૌ દ્વિજદમ્પતી સ દૃષ્ટ્વા દયાધીનતયા શુશોચ ॥ ૨૧॥

અપારમઞ્ચત્યથ શોકમસ્મિન્નભૂયતોચ્ચૈરશરીવા વા ।
જાયેત સંરક્ષિતુમક્ષમસ્ય જનસ્ય દુઃખાય પરં દયેતિ ॥ ૨૨॥

આકર્ણ્ય વાણીમશરીરિણીં તામસાવિતિ વ્યાહરતિ સ્મ વિજ્ઞઃ ।
જગત્ત્રયીરક્ષણદક્ષિણસ્ય સત્યં તવૈકસ્ય તુ શોભતે સા ॥ ૨૩॥

ઇતીરયત્યેવ યતૌ દ્વિજાતેઃ સુતઃ સુખં સુપ્ત ઇવોદતિષ્ઠત્ ।
સમીપગૈઃ સર્વજનીનમસ્ય ચારિત્ર્યમાલોક્ય વિસિષ્મિયે ચ ॥ ૨૪॥

રમ્યોપશલ્યં કૃતમાલસાલરસાલહિન્તાલતમાલશાલૈઃ ।
સિદ્ધિસ્થલં સાધકસમ્પદાં તન્મૂકામ્બિકાયાઃ સદનં જગાહે ॥ ૨૫॥

ઉચ્ચાવચાનન્દજબાષ્પમુચ્ચૈરુદ્ગીર્ણરોમાઞ્ચમુદારભક્તિઃ ।
અમ્બામિહાપારકૃપાવલમ્બાં સમ્ભાવયન્નસ્તુત નિસ્તુલં સઃ ॥ ૨૬॥

પારેપરાર્ધં પદપદ્મભાઃસુ ષષ્ટ્યુત્તરં તે ત્રિશતં તુ ભાસઃ ।
આવિશ્ય વહ્ન્યર્કસુધામરીચીનાલોકવન્ત્યાદધતે જગન્તિ ॥ ૨૭॥

અન્તશ્ચતુઃષષ્ટ્યુપચારભેદૈરન્તેવસત્કાણ્ડપટપ્રદાનૈઃ ।
આવહનાદ્યૈસ્તત્ર દેવિ નિત્યમારાધનામાદધતે મહાન્તઃ ॥ ૨૮॥

અમ્બોપચારેષ્વધિસિન્ધુષષ્ટિ શુદ્ધાજ્ઞયોઃ શુદ્દિદમેકમેકમ્ ।
સહસ્રપત્રે દ્વિતયે ચ સાધુ તન્વન્તિ ધન્યાસ્તવ તોષહેતોઃ ॥ ૨૯॥

આરાધનં તે બહિરેવ કેચિદન્તર્બહિશ્ચૈકતમેઽન્તરેવ ।
અન્યે પરે ત્વમ્બ કદાપિ કુર્યુર્નૈવ ત્વદૈક્યાનુભવૈકનિષ્ઠાઃ ॥ ૩૦॥

અષ્ટોત્તરત્રિંશતિ યાઃ કલાસ્તાઃ સ્વર્ધ્યાઃ કલાઃ પઞ્ચ નિવૃત્તિમુખ્યાઃ ।
તાસામુપર્યમ્બ તવાઙ્ઘ્રિપદ્મં વિદ્યોતપાનં વિબુધા ભજન્તે ॥ ૩૧॥

કાલાગ્નિરૂપેણ જગન્તિ દગ્ધ્વા સુધાત્મનાઽઽપ્લાવ્ય સમુત્સૃજન્તીમ્ ।
યે ત્વામવન્તીમમૃતાત્મનૈવ ધ્યાયન્તિ તે સૃષ્ટિકૃતો ભવન્તિ ॥ ૩૨॥

યે પ્રત્યભિજ્ઞામતપારવિજ્ઞા ધન્યાસ્તુ તે પ્રાગ્વિદિતાં ગુરૂક્ત્યા ।
સૈવાહમસ્મીતિ સમાધિયોગાત્ ત્વાં ક્યત્યભિજ્ઞાવિષયં વિદધ્યુઃ ॥ ૩૩॥

આધારચક્રે ચ તદુત્તરસ્મિન્નારાધયન્ત્યૈહિકભોગલુબ્ધાઃ ।
ઉપાસતે યે મણિપૂરકે ત્વાં વાસસ્તુ તેષાં નગરાદ્બહિસ્તે ॥ ૩૪॥

અનાહતે દેવિ ભજન્તિ યે ત્વામન્તઃસ્થિતિસ્ત્વન્નગરે તુ તેષામ્ ।
શુદ્ધાજ્ઞયોર્યે તુ ભજન્તિ તેષાં ક્રમેણ સામીપ્યસમાનભોગૌ ॥ ૩૫॥

સહસ્રપત્રે ધ્રુવમણ્ડલાખ્યે સરોરુહે ત્વામનુસન્દધાનઃ ।
ચતુર્વિધૈક્યાનુભવાસ્તમોહઃ સાયુજ્યમમ્બાઞ્ચતિ સાધકેન્દ્રઃ ॥ ૩૬॥

શ્રી ચક્રષટ્ચક્રકયોઃ પુરોઽથ શ્રીચક્રમન્વોરપિ ચિન્તિતૈક્યમ્ ।
ચક્રસ્ય મન્ત્રસ્ય તતસ્તવૈક્યં ક્રમાદ્ધ્યાયતિ સાધકેન્દ્રઃ ॥ ૩૭॥

ઇતિ તાં વચનૈઃ પ્રપૂજ્ય ભૈક્ષૌદનમાત્રેણ સ તુષ્ટિમાન્ કૃતાર્થઃ ।
બહુસાધકસંસ્તુતઃ કિયન્તં સમયં તત્ર નિનાય શાન્તચેતાઃ ॥ ૩૮॥

શ્રયતિ સ્મ તતોઽગ્રહારકં શ્રીબલિસંજ્ઞં સ કદાચન સ્વશિષ્યૈઃ ।
અનુગેહહુતાગ્નિહોત્રદુગ્ધધપ્રસરત્પાવનગન્ધલોભનીયમ્ ॥ ૩૯॥

યતોઽપમૃત્યુર્બહિરેવ યાતિ ભ્રાન્ત્વા પ્રદેશં શનકૈરલબ્ધ્વા ।
દૃષ્ટ્વા દ્વિજાતીન્નિજકર્મનિષ્ઠાન દુરાન્નિષિદ્ધં ત્યજતોઽપ્રમત્તાન્ ॥ ૪૦॥

યસ્મિન્ સહસ્રદ્વિતયં જનાનામગ્ન્યાહિતાનાં શ્રુતિપાઠકાનામ્ ।
વસત્યવશ્યં શ્રુતિચોદિતાસુ ક્રિયાસુ દક્ષં પ્રથિતાનુભાવમ્ ॥ ૪૧॥

મધ્યે વસન્ યસ્ય કરોતિ ભૂષાં પિનાકપાણિર્ગિરિજાસહાયઃ ।
હારસ્ય યષ્ટેસ્તરલો યથા વૈ રાત્રેરિવેન્દુર્ગગનાધિરૂઢઃ ॥ ૪૨॥

હસ્તામલકાદીનાં શિષ્યત્વેન ગ્રહણં

તત્ર દ્વિજઃ કશ્ચન શાસ્ત્રવેદી પ્રભાકરાખ્યઃ પ્રથિતાનુભાવઃ ।
પ્રવૃત્તિશાસ્ત્રૈકરતઃ સુબુદ્ધિરાસ્તે ક્રતૂન્મીલિતકીર્તિબૃન્દઃ ॥ ૪૩॥

ગાવો હિરણ્યં ધરણી સમગ્રા સદ્બાન્ધવા જ્ઞાતિજનાશ્ચ તસ્ય ।
સન્ત્યેવ કિં તૈર્ન હિ તોષ એભિઃ પુત્રો યદસ્યાજનિ મુગ્ધચેષ્ટઃ ॥ ૪૪॥

ન વક્તિ કિઞ્ચિન્ન શ઼ૃણોતિ કિઞ્ચિત્ ધ્યાયન્નિવાસ્તે કિલ મન્દચેષ્ટઃ ।
રૂપેષુ મારો મહસા મહસ્વાન્ મુખેન ચન્દ્રઃ ક્ષમયા મહીસમઃ ॥ ૪૫॥

ગ્રહગ્રહાત્ કિં જડવદ્વિચેષ્ટતે કિં વા સ્વભાવાદુત પૂર્વકર્મણઃ ।
સઞ્ચિન્તયં સ્તિષ્ઠતિ તત્પિતાઽનિશં સમાગતાન પ્રષ્ટુમના બહુશ્રુતાન્ ॥ ૪૬॥

શિષ્યૈઃ પ્રશિષ્યૈર્બહુપુસ્તભારૈઃ સમાગતં કઞ્ચન પૂજ્યપાદમ્ ।
શુશ્રાવ તં ગ્રામમનિન્દિતાત્મા નિનાય સુનું નિકટં સ તસ્ય ॥ ૪૭॥

ન શૂન્યહસ્તો નૃપમિષ્ટદૈવં ગુરું ચ યાયાદિતિ શાસ્ત્રવિત્ સ્વયમ્ ।
સોપાયનઃ પ્રાપ ગુરું વ્યશિશ્રણત્ ફલં નનામાસ્ય ચ પાદપઙ્કજે ॥ ૪૮॥

અનીનમત્તં ચ તદીયપાદયોર્જડાકૃતિં ભસ્મનિગૂઢવહ્નિવત્ ।
સ નોદતિષ્ઠત્ પતિતઃ પદામ્બુજે પ્રાયઃ સ્વજાડ્યં પ્રકટં વિધિત્સતિ ॥ ૪૯॥

ઉપાત્તહસ્તઃ શનકૈરવાઙ્મુખં તં દેશિકેન્દ્રઃ કૃપયોદતિષ્ઠિપત્ ।
ઉત્થાપિતે સ્વે તનયે પિતાબ્રવીત્ વદ પ્રભો જાડ્યમમુષ્ય કિઙ્કૃતમ્ ॥ ૫૦॥

વર્ષાણ્યતીયુર્ભગવન્નનુષ્ય પઞ્ચાષ્ટ જાતસ્ય વિનાઽવબોધમ્ ।
નાધ્યૈષ્ટ વેદાનલિખચ્ચ નાર્ણાનચીકરં ચોપનયં કથઞ્ચિત્ ॥ ૫૧॥

ક્રીડાપરઃ ક્રોશતિ બાલવર્ગસ્તથાઽપિ ન ક્રીડિતુમેષ યાતિ ।
બાલાઃ શઠા મુગ્ધમિમં નિરીક્ષ્ય સન્તાડયન્તેઽપિ ન રોષમેતિ ॥ ૫૨॥

ભુઙ્ક્તે(ઙ્ક્તે?) કદાચિન્ન તુ જાતુ ભુઙ્ગે સ્વેચ્છાવિહારી ન કરોતિ ચોક્તમ્ ।
તથાપિ રુષ્ટેન ન તાડ્યતેઽયં સ્વકર્મણા વર્ધત એવ નિત્યમ્ ॥ ૫૩॥

ઇતીરયિત્વોપરતે ચ વિપ્રે પપ્રચ્છ તં શઙ્કરદેશિકેન્દ્રઃ ।
કસ્ત્વં કિમેવં જડવત્ પ્રવૃત્તઃ સ ચાબ્રવીદ્બાલવપુર્મહાત્મા ॥ ૫૪॥

નાહં જડઃ કિન્તુ જડઃ પ્રવર્તતે મત્સન્નિધાનેન ન સન્દિહે ગુરો ।
ષડૂર્મિષડ્ભાવવિકારવર્જિતં સુખૈકતાનં પરમસ્મિ તત્પદમ્ ॥ ૫૫॥

(૧ જન્મ, ૨ મરણમ્, ૩ ક્ષુત્, ૪ પિપાસા, ૫ શોકઃ,૬ મોહઃ ઇતિ ષડૂર્મયઃ ।
૧ જાયતે, ૨ અસ્તિ, ૩ વર્ધતે, ૪ પરિણમતે,૫ અપક્ષીયતે, ૬ નશ્યતિ ઇતિ ષટ્ભાવવિકારાઃ ॥)
મમેવ ભૂયાદનુભૂતિરેષા મુમુક્ષુવર્ગસ્ય નિરૂપ્ય વિદ્વન્ ।
પદ્યૈઃ પરૈર્દ્વાદ(રૈર્દ્વિ?)દિશભિર્બભાષે ચિદાત્મતત્વં વિધુતપ્રપઞ્ચમ્ ॥ ૫૬॥

પ્રકાશયન્તે પરમાત્મતત્ત્વં કરસ્થધાત્રીફલવદ્યદેકમ્ ।
શ્લોકાસ્તુ હસ્તામલકાઃ પ્રસિદ્ધાસ્તત્કર્તુરાખ્યાપિ તથૈવ વૃત્તા ॥ ૫૭॥

વિનોપદેશં સ્વત એવ જાતઃ પરાત્મબોધો દ્વિજવર્યસૂનોઃ
વ્યસ્મેષ્ટ સમ્પ્રેક્ષ્ય સ દેશિકેન્દ્રો ન્યધાત્સ્વહસ્તં કૃપયોત્તમાઙ્ગે ॥ ૫૮॥

સુતે નિવૃત્તે વચનં બભાષે સ દેશિકેન્દ્રઃ પિતરં તદીયમ્ ।
વસ્તું ન યોગ્યો ભવતા સહાયં ન તેઽમુનાઽર્થો જડિમાસ્પદેન ॥ ૫૯॥

પુરાભવાભ્યાસવશેન સર્વં(?) સ વેત્તિ સમ્યઙ્ ન ચ વક્તિ કિઞ્ચિત્ ।
નો ચેત્કથં સ્વાનુભવૈકગર્ભપદ્યાનિ ભાષેત નિરક્ષરાસ્યઃ ॥ ૬૦॥

ન સક્તિરસ્યાસ્તિ ગૃહાદિગોચરા નાત્મીયદેહે ભ્રમતોઽસ્ય વિદ્યતે ।
તાદાત્મ્યતાઽન્યત્ર મમેતિ વેદનં યદા ન સા સ્વે કિમુ બાહ્યવસ્તુષુ ॥ ૬૧॥

ઇતીરયિત્વા ભગવાન્ દ્વિજાત્મજં યયૌ ગૃહીત્વા દિશમીપ્સિતાં પુનઃ ।
વિપ્રોઽપ્યનુવ્રજ્ય યયૌ સ્વમન્દિરં કિયત્પ્રદેશં સ્થિરધીબહુશ્રુતઃ ॥ ૬૨॥

તતઃ શતાનન્દમહેન્દ્રપૂર્વૈઃ સુપર્વબૃન્દૈરુપગીયમાનઃ ।
પદ્માઙ્ઘ્રિમુખ્યૈઃ સમમાપ્તકામક્ષોણીપતિઃ શૃઙ્ગગિરિં પ્રતસ્થે ॥ ૬૩॥

યત્રાધુનાઽપ્યુત્તમમૃષ્યશૃઙ્ગસ્તપશ્ચરત્યાત્મભૃદન્તરઙ્ગઃ ।
સંસ્પર્શમાત્રેણ વિતીર્ણભદ્રા વિદ્યોતતે યત્ર ચ તુઙ્ગભદ્રા ॥ ૬૪॥

અભ્યાગતાર્ચાલ્પિતકલ્પશાખાઃ કૂલઙ્કષાધીતસમસ્તશાખાઃ
ઇજ્યાશતૈર્યત્ર સમુલ્લસન્તઃ શાન્તાન્તરાયા નિવસન્તિ સન્તઃ ॥ ૬૫॥

અધ્યાપયામાસ સ ભાષ્યમુખ્યાન્ ગ્રન્થાન્નિજાંસ્તત્ર મનીષિમુખ્યાન ।
આકર્ણનપ્રાપ્યમહાપુમર્થાનાદિષ્ટ વિદ્યાગ્રહણે સમર્થાન્ ॥ ૬૬॥

મન્દાક્ષનમ્રં કલયન્નશેષં પરાણુદત્ પ્રાણિતમાંસ્યશેષમ્ ।
નિરસ્તજીવેશ્વરયોર્વિશેષં વ્યાચષ્ટ વાચસ્પતિનિર્વિશેષમ્ ॥ ૬૭॥

પ્રકલ્પ્ય તન્ત્રેન્દ્રવિમાનકલ્પં પ્રાસાદમાવિષ્કૃતસર્વશિલ્પમ્ ।
પ્રવર્તયામાસ સ દેવતાયાઃ પૂજામજાદ્યૈરપિ પૂજિતાયાઃ ॥ ૬૮॥

યા શારદેત્યભિધાં વહન્તી કૃતાં પ્રતિજ્ઞાં પ્રતિપાલયન્તી ।
અદ્યાપિ શૃઙ્ગેરિપુરે વસન્તી પ્રદ્યોતતેઽભીષ્ટવરાન્ દિશન્તી ॥ ૬૯॥

ચિત્તાનુવર્તી નિજધર્મચારી ભૂતાનુકમ્પી તનુવાગ્વિભૂતિઃ ।
કશ્ચિદ્વિનેયોઽજનિ દેશિકસ્ય યં તોટકાચાર્યમુદાહરન્તિ ॥ ૭૦॥

સ્નાત્વા પુરા ક્ષિપતિ કમ્બલવસ્ત્રમુખ્યૈરુચ્ચાસનં મૃદુ સમં સ દદાતિ નિત્યમ્ ।
સંલક્ષ્ય દન્તપરિશોધનકાષ્ઠમગ્ર્યં બાહ્યાદિકં ગતવતે સલિલાદિકં ચ ॥ ૭૧॥

શ્રીદેશિકાય ગુરવે તનુમાર્જવસ્ત્રં વિશ્રાણયત્યનુદિનં વિનયોપપન્નઃ ।
શ્રીપાદપદ્મયુગમર્દનકોવિદશ્ચ છાયેવ દેશિકમસૌ ભૃશમન્વયાદ્યઃ ॥ ૭૨॥

ગુરોઃ સમીપે ન તુ જાતુ જૃમ્ભતે પ્રસારયન્નો ચરણૌ નિષીદતિ ।
નોપેક્ષતે વા બહુ વા ન ભાષતે ન પૃષ્ઠદર્શી પુરતોઽસ્ય તિષ્ઠતિ ॥ ૭૩॥

તિષ્ઠન્ ગુરૌ તિષ્ઠતિ સમ્પ્રયાતે ગચ્છન્ બ્રુવાણે વિનયેન શૃણ્વન્ ।
અનુચ્યમાનોઽપિ હિતં વિધત્તે યચ્ચાહિતં તચ્ચ તનોતિ નાસ્ય ॥ ૭૪॥

તસ્મિન્ કદાચન વિનેયવરે સ્વશાટીપ્રક્ષાલનાય ગતવત્યપવર્તનીગાઃ ।
વ્યાખ્યાનકર્મણિ તદાગમમીક્ષમાણો ભક્તેષુ વત્સલતયા વિલલમ્બ એષઃ ॥ ૭૫॥

શાન્તિપાઠમથ કર્તુમસઙ્ખ્યેષૂદ્યતેષુ સ વિનેયવરેષુ ।
સ્થીયતાં ગિરિરપિ ક્ષણમાત્રાદેષ્યતીતિ સમુદીરયતિ સ્મ ॥ ૭૬॥

તાં નિશમ્ય નિગમાન્તગુરૂક્તિં મન્દધીરનધિકાર્યપિ શાસ્ત્રે ।
કિ પ્રતીક્ષ્યત ઇતિ સ્મ હ ભિત્તિઃ પદ્મપાદમુનિના સમદર્શિ ॥ ૭૭॥

તય ગર્વમપહર્તુમખર્વં સ્વાશ્રયેષુ કરુણાતિશયાચ્ચ ।
વ્યાદિદેશ સ ચતુર્દશ વિદ્યાઃ સદ્ય એવ મનસા ગિરિનામ્ને ॥ ૭૮॥

સોઽધિગમ્ય તદનુગ્રહમગ્ર્યં તત્ક્ષણેન વિદિતાખિલવિદ્યઃ ।
ઐટ્ટ(ષ્ટ?)દેશિકવરં પરતત્ત્વવ્યઞ્જકૈર્લલિતતોટકવૃત્તૈઃ ॥ ૭૯॥

શ્રીમદ્દેશિકપાદપઙ્કજયુગીમૂલા તદેકાશ્રયા
 તત્કારુણ્યસુધાવસેકસહિતા તદ્ભક્તિસદ્વલ્લરી ।
હૃદ્યં તોટકવૃત્તવૃન્તરુચિરં પદ્યાત્મકં સત્ફલં
 લેભે ભોક્તુમનોતિસત્તમશુકૈરાસ્વાયમાનં મુહુઃ ॥ ૮૦॥

યેનૌન્નત્યમવાપિતા કૃતપદા કામં ક્ષમાયામિયં
 નિઃશ્રેણિઃ પદમુન્નતં જિગમિષોર્વ્યોમ સ્પૃશન્તી પરમ્ ।
વંશ્યા કાપ્યધરીકૃતત્રિભુવનશ્રેણી ગુરૂણાં કથં
 સેવા તસ્ય યતીશિતુર્ન વિરલં કુર્વીત ગુર્વી તમઃ ॥ ૮૧॥

અથ તોટકવૃત્તપદ્યજાતૈરયમજ્ઞાતસુપર્વસૂક્તિકોઽપિ ।
દયયૈવ ગુરોસ્ત્રયીશિરોઽર્થં સ્ફુટયન્નૈક્ષિ વિચક્ષણઃ સતીર્થ્યૈઃ ॥ ૮૨॥

અથ તસ્ય બુધસ્ય વાક્યગુમ્ભં નિશમય્યામૃતમાધુરીધુરીણમ્ ।
જલજાઙ્ઘ્રિમુખાઃ સતીર્થ્યવર્યાઃ સ્મયમન્વસ્ય સવિસ્મયા બભૂવુઃ ॥ ૮૩॥

ભક્ત્યુત્કર્ષાત્ પ્રાદુરાસન્યતોઽસ્માત્પદ્યાન્યેવં તોટકાખ્યાનિ સન્તિ ।
તસ્માદાહુસ્તોટકાચાર્યમેનં લોકે શિષ્ટાઃ શિષ્ટવંશ્ય મુનીન્દ્રમ્ ॥ ૮૪॥

અદ્યાપિ તત્પ્રકરણં પ્રથિતં પૃથિવ્યાં
 તત્સંજ્ઞયા લઘુ મહાર્થમનલ્પનીતિ ।
શિષ્ટૈર્ગૃહીતમતિશિષ્ટપદાનુવિદ્ધં
 વેદાન્તવેદ્યપરતત્ત્વનિવેદનં યત્ ॥ ૮૫॥

તોટકાહ્વયમવાપ્ય મહર્ષેઃ ખ્યાતિમાપ સ દિશાસુ તદાદિ ।
પદ્મપાદસદૃશપ્રતિભાવાન્ મુખ્યશિષ્યપદવીમપિ લેભે ॥ ૮૬॥

પુમર્થાશ્ચત્વારઃ કિમુત નિગમા ઋક્પ્રભૃતયઃ
 પ્રભેદા વા મુક્તેર્વિમલતરસાલોક્યમુખરાઃ ।
મુખાન્યાહોં ધાતુશ્ચિરમિતિ વિમૃશ્યાથ વિબુધા
 વિદુઃ શિષ્યાન્ હસ્તામલકમુખરાઞ્છઙ્કરગુરોઃ ॥ ૮૭॥

સ્ફારદ્વારપ્રઘાણદ્વિરદમદસમુલ્લોલકલ્લોલભૃઙ્ગી-
 સઙ્ગીતોલ્લાસભઙ્ગીમુખરિતહરિતઃ સમ્પદોઽકિમ્પચાનૈઃ ।
નિષ્ઠીવ્યન્તેઽતિદુરાદધિગતભગવત્પાદસિદ્ધાન્તકાષ્ઠા-
 નિષ્ઠાસમ્પદ્વિજૃમ્ભન્નિરવધિસુખદસ્વાત્મલાભૈકલોભૈઃ ॥ ૮૮॥

સમિન્ધાનો મન્થાચલમથિત સિન્ધૂદરભવ-
 ત્સુધાફેનાભેનામૃતરુચિનિભેનાઽઽત્મયશસા ।
નિરુન્ધાનો દૃષ્ટ્યા પરમહહ પન્થાનમસતાં
 પરાધૃષ્યૈઃ શિષ્યૈરરમત વિશિષ્યૈષ મુનિરાટ્ ॥ ૮૯॥

ઇતિ શ્રીમાધવીયે તદ્ભસ્તધાત્ર્યાદિસંશ્રયઃ ।
સઙ્ક્ષેપશઙ્કરજયે સર્ગોઽયં દ્વાદશોઽભવત્ ॥ ૧૨॥

આદિતઃ શ્લોકાઃ ૧૩૧૨ ।

# શઙ્કરદિગ્વિજયમ્

## ॥ ૧૩. ત્રયોદશઃ સર્ગઃ બ્રહ્મવિદ્યાવિચારઃ ॥

અથ ત્રયોદશઃ સર્ગઃ ॥ ૧૩॥

તતઃ કદાચિત્ પ્રણિપત્ય ભક્ત્યા સુરેશ્વરાર્યો ગુરુમાત્મદેશમ્ ।
શારીરકેઽત્યન્તગભીરભાવે વૃત્તિં સ્ફુટં કર્તુમના જગાદ ॥ ૧॥

મમ યત્કરણીયમસ્તિ તે ત્વમિમં મામનુશાધ્યસંશયમ્ ।
તદિદં પુરુષસ્ય જીવિતં યદયં જીવતિ ભક્તિમાન્ ગુરૌ ॥ ૨॥

ઇતીરિતે શિષ્યવરેણ શિષ્યં પ્રોચે ગરીયાનતિહૃષ્ટચેતાઃ ।
મત્કસ્ય ભાષ્યસ્ય વિધેયમિષ્ટં નિવન્ધનં વાર્તિકનામધેયમ્ ॥ ૩॥

દ્રષ્ટું સતર્કં ભવદીયભાષ્યં ગમ્ભીરવાક્યં ન મમાસ્તિ શક્તિઃ ।
તથાઽપિ ભાવત્કકટાક્ષપાતે યતે યથાશક્તિ નિબન્ધનાય ॥ ૪॥

અસ્ત્વેવમિત્યાર્યપદાભ્યનુજ્ઞામાદાય મૂર્ધ્ના સ વિનિર્જગામ ।
અથામ્બુજાઙ્ઘ્રેર્દયિતાઃ સતીર્થ્યાસ્તં ચિત્સુખાદ્યા રહસીત્થમૂચુઃ ॥ ૫॥

યોઽયં પ્રયત્નઃ ક્રિયતે હિતાય હિતાય નાયં વિફલત્વનર્થમ્ ।
પ્રત્યેકમેવં ગુરવે નિવેદ્ય બોદ્ધા સ્વયં કર્મણિ તત્પરશ્ચ ॥ ૬॥

યઃ સાર્વલૌકિકમપીશ્વરમીશ્વરાણાં પ્રત્યાદિદેશ બહુયુક્તિભિરુત્તરજ્ઞઃ ।
કર્મૈવ નાકનરકાદિફલં દદાતિ નૈવં પરોઽસ્તિ ફલદો જગદીશિતેતિ ॥ ૭॥

પ્રત્યેકમસ્ય પ્રલયં વદન્તિ પુરાણવાક્યાનિ સ તસ્ય કર્તા ।
વ્યાસો મુનિર્જૈમિનિરસ્ય શિષ્યસ્તત્પક્ષપાતી પ્રલયાવલમ્વી ॥ ૮॥

ગુરોશ્ચ શિષ્યસ્ય ચ પક્ષભેદે કથં તયોઃ સ્યાદ્ગુરુશિષ્યભાવઃ ।
તથાઽપિ યદ્યસ્તિ સ પૂર્વપક્ષઃ સિદ્ધાન્તભાવસ્તુ ગુરૂક્ત એવ ॥ ૯॥

આ જન્મનઃ સ ખલુ કર્મણિ યો જિતાત્મા
કુર્વન્નવસ્થિત ઇહાનિશમેવ કર્મ ।

બ્રૂતે પરાંશ્ચ કુરુતાવહિતાઃ પ્રયત્નાત્
 સ્વર્ગાદિકં સુખમવાપ્સ્યથ કિં વૃથાધ્વે ॥ ૧૦॥

એવંવિધેન ક્રિયતે નિબન્ધનં યદિ ત્વદાજ્ઞામવલમ્બ્ય ભાષ્યકે ।
ભાષ્યં પરં કર્મપરં સ યોક્ષ્યતે મા ચ્યાવિ મૂલાદપિ વૃદ્ધિમિચ્છતા ॥ ૧૧॥

સંન્યાસમપ્યેષ ન બુદ્ધિપૂર્વકં વ્યધત્ત વાદે વિજિતો વશો વ્યધાત્ ।
તસ્માન્ન વિશ્વાસપદં વિભાતિ નો મા ચીકરોઽનેન નિબન્ધનં ગુરો ॥ ૧૨॥

યઃ શક્નુયાત્ કર્મ વિધાતુમીપ્સિતં સોઽયં ન કર્માણિ વિહાતુમર્હતિ ।
યદ્યસ્તિ સંન્યાસવિધૌ દુરાગ્રહો જાત્યન્ધમૂકાદિરમુષ્ય ગોચરઃ ॥ ૧૩॥

એવં સદા ભટ્ટમતાનુસારિણો બ્રુવન્ત્યસૌ તન્મતપક્ષપાતવાન્ ।
એવં સ્થિતે યોગ્યમદો વિધીયતાં ન નોઽસ્તિ નિર્બન્ધનમત્ર કિઞ્ચન ॥ ૧૪॥

પુરા કિલાસ્માસુ સુરાપગાયાઃ પારે પરસ્મિન્ વિચરત્સુ સત્સુ ।
આકારયામાસ ભવાનશેષાન્ ભક્તિં પરિજ્ઞાતુમિવાસ્મદીયામ્ ॥ ૧૫॥

તદા તદાકર્ણ્ય સમાકુલેષુ નાવર્થમસ્માપ્સુ પરિભ્રમત્સુ ।
સનન્દનસ્ત્વેષ વિયત્તટિન્યા ઝરીમભિપ્રસ્થિત એવ તૂર્ણમ્ ॥ ૧૬॥

અનન્યસાધારણમસ્ય ભાવમાચાર્યવર્યે ભગવત્યવેક્ષ્ય ।
તુષ્ટા ત્રિવર્મા કનકામ્બુજાનિ પ્રાદુષ્કરોતિ સ્મ પદે પદે ચ ॥ ૧૭॥

પદાનિ તેષુ પ્રણિધાય યુષ્મત્સકાશમાગાદ્યદયં મહાત્મા ।
તતોઽતિતુષ્ટો ભગવાંશ્ચકાર નામ્ના તમેનં કિલ પદ્મપાદમ્ ॥ ૧૮॥

સ એવ યુષ્પચ્ચરણારવિન્લસેવાવિનિર્ધૃતસમસ્તભેદઃ ।
આજાનસિદ્ધોઽર્હતિ સૂત્રભાષ્યેવૃત્તિં વિધાતું ભગવન્નગાધે ॥ ૧૯॥

યદ્વાઽયમાનન્દગિરિર્યદુગ્રતપઃપ્રસન્ના પરમેષ્ટિપત્ની
ભવત્પ્રવન્ધેષુ યથાભિસન્ધિ વ્યાખ્યાનસામર્થ્યવરં દિદેશ ॥ ૨૦॥

કર્મૈકતાનમતિરેષ કથં ગુરો તે વિશ્વાસપાત્રમભવન્નનુ વિશ્વરૂપઃ ।
ભાષ્યસ્ય પદ્મપદ એવ કરાતુ ટીકામિત્યૂચિરે રહસિ યોગિવરં વિધેયાઃ ॥ ૨૧॥

અત્રાન્તરેઽભ્યર્ણગતઃ સ તૂર્ણં સનન્દનો વાક્યમુદાજહાર ।
આચાર્ય હસ્તામલકોઽપિ કલ્પો ભવત્કૃતૌ વાર્તિકમેષ કર્તુમ્ ॥ ૨૨॥

યતઃ કરસ્થામલકાવિશેષં જાનાતિ સિદ્ધાન્તમસાવશેષમ્ ।
અતો હ્યમુષ્મૈ ભવતૈવ પૂર્વમદાયિ હસ્તામલકાભિધાનમ્ ॥ ૨૩॥

વાર્ણી સમાકર્ણ્ય સનન્દનસ્ય સામિસ્મિતં ભાષ્યકૃદાબભાષે ।
નૈપુણ્યમન્યાદૃશમસ્ય કિન્તુ સમાહિતત્વાન્ન બહિઃપ્રવૃત્તિઃ ॥ ૨૪॥

અયં તુ બાલ્યે ન પપાઠ પિત્રા નિયોજિતઃ સાદરમક્ષરાણિ ।
ન ચોપનીતોઽપિ ગુરોઃ સકાશાદધ્યૈષ્ટ વેદાન્ પરમાર્થનિષ્ઠઃ ॥ ૨૫॥

બાલૈર્ન ચિક્રીડ ન ચાન્નમૈચ્છન્ન ચારુવાચં હ્યવદત્ કદાઽપિ ।
નિશ્ચિત્ય ભૂતોપહતં તમેનમાનિન્યિરેઽસ્મન્નિકટં કદાચિત્ ॥ ૨૬॥

અસ્માનવેક્ષ્યૈવ મુહુઃ પ્રણમ્ય કૃતાઞ્જલૌ તિષ્ઠતિ બાલકેઽસ્મિન્ ।
ઇમામપૂર્વાં પ્રકૃતિં વિલોક્ય વિસિષ્મિયે તત્ર જનઃ સમેતઃ ॥ ૨૭॥

કસ્ત્વં શિશો કસ્ય સુતઃ કુતો વેત્યસ્માભિરાચષ્ટ કિલૈષ પૃષ્ટઃ ।
આત્માનમાનન્દઘનસ્વરૂપં વિસ્માપયન્ વૃત્તમયૈર્વચોભિઃ ॥ ૨૮॥

તદા કદાઽપ્યશ્રુતિગોચરં તદાકર્ણ્ય વાગ્વૈભવમાત્મજસ્ય ।
પિતા પ્રપદ્યાસ્ય પરં પ્રહર્ષં સપ્રશ્રયાં વાચમુવાચ વિજ્ઞઃ ॥ ૨૯॥

જનૈર્જડત્વેન વિનિશ્ચિતોઽપિ બ્રવીતિ યદ્યેષ પરાત્મતત્વમ્ ।
પ્રજ્ઞોન્નતાનામપિ દુર્વિભાવ્યં કિં વર્ણ્યતેઽર્હન્ ભવતઃ પ્રભાવઃ ॥ ૩૦॥

આ જન્મનઃ સંસૃતિપાશમુક્તઃ શિષ્યોઽસ્ત્વયં વિશ્વગુરોસ્તવૈવ ।
પ્રફુલ્લરાજીવવને વિહારી કથં રમેત ક્ષુરકે મરાલઃ ॥ ૩૧॥

વિજ્ઞાપ્ય તસ્મિન્નિતિ નિર્ગતેઽસૌ તદાપ્રભૃત્યત્ર વસત્યુદારઃ ।
આ શૈશવાદાત્મ વિલીનચેતાઃ કથં પ્રવર્તેત મહાપ્રબન્ધે ॥ ૩૨
શ્રુત્વેતિ પચ્છુરમું વિનેયાઃ સ્વામિન્ વિનૈવ શ્રવણાદ્યુપાયૈઃ ।
અલબ્ધ વિજ્ઞાનમયં કથં વા ભવાનિદં સાધુ વિદાઙ્કુરોતુ ॥ ૩૩॥

તાનબ્રવીત્ સંયમિચક્રવર્તી કશ્ચિત્ પુરા યામુનતીરવર્તી ।
બભૂવ સિદ્ધઃ કિલ સાધુવૃત્તઃ સાંસારિકેભ્યઃ સુતરાં નિવૃત્તઃ ॥ ૩૪॥

તસ્યાન્તિકે કાચન વિપ્રકન્યા દ્વિહાયનં જાતુ નિવેશ્ય બાલમ્ ।
ક્ષણં પ્રતીક્ષસ્વ શિશું દ્વિજેતિ સ્નાતું સખીભિઃ સહ નિર્જગામ ॥ ૩૫॥

અત્રાન્તરે દૈવવશાત્સ બાલશ્ચઙ્ક્રમ્યમાણો નિપપાત નદ્યામ્ ।
મૃતં તમાદાય શિશું તદીયાશ્ચક્રન્દુરુચ્ચૈઃ પુરતો મહર્ષેઃ ॥ ૩૬॥

આક્રોશમાકર્ણ્ય મુનિઃ સ તેષામત્યન્તખિન્નો નિજયોગભૂમ્ના ।

પ્રાવિક્ષદઙ્ગં પૃથુકસ્ય તસ્ય સ એષ હસ્તામલકસ્તપસ્વી ॥ ૩૭॥

તસ્માદયં વેદ વિનોપદેશં શ્રુતીરનન્તાઃ સકલાઃ સ્મૃતીશ્ચ ।
સર્વાણિ શાસ્ત્રાણિ પરં ચ તત્ત્વમજ્ઞાતમેતેન ન કિઞ્ચિદસ્તિ ॥ ૩૮॥

તત્તાદૃગાત્મા ન બહિઃપ્રવૃત્તૌ નિયોગમર્હત્યયમત્ર વૃત્તૌ ।
સ મણ્ડનસ્ત્વર્હતિ બુદ્ધતત્વઃ સરસ્વતીસાક્ષિકસર્વવિત્ત્વઃ ॥ ૩૯॥

તત્તાદૃશાત્યુજ્જ્વલકીર્તિરાશિઃ સમસ્તશાસ્ત્રાર્ણવપારદર્શી ।
આસાદિતો ધર્મહિતઃ પ્રયત્નાત્ સ ચેન્ન રોચેત ન દૃશ્યતેઽન્યઃ ॥ ૪૧॥

અહં બહૂનામનભીષ્ટકાર્યં ન કારયિષ્યે હિ મહાનિબન્ધે ।
કિઞ્ચાત્ર સંશીતિરભૂન્મમાતો યદેકકાર્યે બહવઃ પ્રતીપાઃ ॥ ૪૨॥

ભવન્નિદેશાદ્ભગવન્ સનન્દનઃ કરિષ્યતે ભાષ્યનિબન્ધમીપ્સિતમ્ ।
સ બ્રહ્મચર્યાદુરરીકૃતાશ્રમો મતિપ્રકર્ષો વિદિતો હિ સર્વતઃ ॥ ૪૨॥

સનન્દનો નન્દયિતા જનાનાં નિબન્ધમેકં વિદધાતુ ભાષ્યે ।
ન વાર્તિકં તત્તુ પરપ્રતિજ્ઞં વ્યધાત્ પ્રતિજ્ઞાં સ હિ નુન્નદીક્ષઃ ॥ ૪૩॥

આદિશ્યેત્થં શિષ્યસઙ્ઘં યતીન્દ્રઃ પ્રોવાચેત્થં નુન્નભિક્ષું રહસ્તમ્ ।
ભાષ્યે ભિક્ષો મા કૃથા વાર્તિકં ત્વં નેમે શિષ્યાઃ સેહિરે દુર્વિદગ્ધાઃ ॥ ૪૪॥

તાત્પર્યં તે ગેહિધર્મેષુ દૃષ્ટ્વા તત્સંસ્કારં સામ્પ્રતં શઙ્કમાનાઃ ।
ભાષ્યે કૃત્વા વાર્તિકં યાજયેત્સ ભાષ્યં પ્રાહુઃ સ્વીયસિદ્ધાન્તશેષમ્ ॥ ૪૫॥

નાસ્ત્યેવાસાવાશ્રમસ્તુર્ય ઇત્થં સિદ્ધાન્તોઽયં તાવકો વેદસિદ્ધઃ ।
દ્વારિ દ્વાઃસ્થૈર્વારિતા ભિક્ષમાણા વેશ્માન્તસ્તે ન પ્રવેશં લભન્તે ॥ ૪૬॥

ઇત્યાદ્યાં તાં કિંવદન્તીં વિદિત્વા તેષાં નાઽઽસીત્પ્રત્યયસ્ત્વય્યનલ્પે ।
સ્વાતન્ત્ર્યાત્ત્વં ગ્રન્થમેકં મહાત્મન્ કૃત્વા મહ્યં દર્શયાધ્યાત્મનિષ્ઠમ્ ॥ ૪૭॥

વિદ્વન્ યદ્વત્પ્રત્યયઃ સ્યાદમીષાં શિષ્યાણાં નો ગ્રન્થસન્દર્શનેન ।
ઇત્યુક્ત્વેમં વાર્તિકં સૂત્રભાષ્યે નાભૂદ્વાહેત્યાપ ખેદં ચ કિઞ્ચિત્ ॥ ૪૮॥

શિષ્યોક્તિભિઃ શિથિલિતાત્મમનોરથોઽસા-
    વેનં સ્વતન્ત્રકૃતિનિર્મિતયે ન્યયુઙ્ક્ત ।
નૈષ્કર્મ્યસિદ્ધિમચિરાદ્વિદધત્સ ચેત્થં
    ન્યાય્યામવિન્દત સુરેશ્વરદેશિકાખ્યામ્ ॥ ૪૯॥

નૈષ્કર્મ્યસિદ્ધિમથ તાં નિરવદ્યયુક્તિં નિષ્કર્મતત્ત્વવિષયાવગતિપ્રધાનામ્ ।

આદ્યન્તહૃદ્યપદબન્ધવતીમુદારામાદ્યન્તમૈક્ષતતરાં પરિતુષ્ટચેતાઃ ॥ ૫૦॥

ગ્રન્થં દૃષ્ટ્વા મોદમાનો મુનીન્દ્રસ્તં ચાન્યેભ્યો દર્શયામાસ હૃદ્યમ્ ।
તેષાં ચાઽઽસીત્પ્રત્યયસ્તદ્વદસ્મિન્ યદ્વચ્ચાન્યસ્તત્ત્વવિદ્યઃ સ નેતિ ॥ ૫૧॥

યત્રાદ્યાપિ શ્રૂયતે મસ્કરીન્દ્રૈર્નિષ્કર્માઽઽત્મા યત્ર નૈષ્કર્મ્યસિદ્ધિઃ ।
તન્નામ્નાઽયં વવૃધે ગ્રન્થવર્યસ્તન્માહાત્મ્યાત્ સર્વલોકાદૃતોઽભૂત્ ॥ ૫૨॥

આચાર્યવાક્યેણ વિધિત્સિતેઽસ્મિન્ વિઘ્નં યદન્યે વ્યધુરુત્સસર્જ ।
શાપં કૃતેઽસ્મિન્ કૃતમપ્યુદારૈઃ તદ્વાર્તિકં ન પ્રસરેત્ પૃથિવ્યામ્ ॥ ૫૩॥

નૈષ્કર્મ્યસિદ્ધ્યાખ્યનિબન્ધમેકં કૃત્વાઽઽત્મપૂજ્યાય નિવેદ્ય ચાઽઽસ્વા ।
વિશ્વાસમુક્ત્વાઽથ પુનર્બભાષે સ વિશ્વરૂપો ગુરુમાત્મદેવમ્ ॥ ૫૪॥

ન ખ્યાતિહેતોર્ન ચ લાભહેતોર્નાપ્યર્ચનાયૈ વિહિતઃ પ્રબન્ધઃ ।
નોલ્લઙ્ઘનીયં વચનં ગુરૂણાં નોલ્લઙ્ઘને સ્યાદ્ગુરુશિષ્યભાવઃ ॥ ૫૫॥

પૂર્વં ગૃહીત્વેઽપિ ન તત્સ્વભાવો ન બાલ્યમન્વેતિ હિ યૌવનસ્થમ્ ।
ન યૌવનં વૃદ્ધમુપૈતિ તદ્વત્ વ્રજન્ હિ પૂર્વસ્થિતિમોજ્ઝ્ય ગચ્છેત્ ॥ ૫૬॥

અહં ગૃહી નાત્ર વિચારણીયં કિં તેન પૂર્વં મન એવ હેતુઃ ।
બન્ધે ચ મોક્ષે ચ મનોવિશુદ્ધો ગૃહી ભવેદ્વાઽપ્યુત મસ્કરી વા ॥ ૫૭॥

નાસ્ત્યેવ ચેદાશ્રમ ઉત્તમાઽઽદિઃ કથં ચ તત્પ્રાપ્તિનિવૃત્તિગામિનૌ ।
પ્રતિશ્રવૌ નૌ કથમલ્પકાલૌ ન હિ પ્રતિજ્ઞા ભગવન્નિરુદ્ધા ॥ ૫૮॥

સમ્ભિક્ષમાણા ન લભન્ત એવ ચેદ્ગૃહપ્રવેશં ગુરુણા પ્રવેશનમ્ ।
કથં હિ ભિક્ષા વિહિતા નનુત્તમા કો નામ લોકસ્ય મુખાભિધાયકઃ ॥ ૫૯॥

તત્વોપદેશાદ્વિદિતાત્મતત્ત્વો વ્યધામહં સંન્યસનં કૃતાત્મા ।
વિરાગભાવાન્ન પરાજિતસ્તુ વાદો હિ તત્ત્વસ્ય વિનિર્ણયાય ॥ ૬૦॥

પુરા ગૃહસ્થેન મયા પ્રબન્ધા નૈયાયિકાદૌ વિહિતા મહાર્થાઃ ।
ઇતઃ પરં મે હૃદયં ચિકીર્ષુ ત્વદઙ્ઘ્રિસેવાં ન વિલઙ્ઘ્ય કિઞ્ચિત્ ॥ ૬૧॥

શ્રદ્ધામદ્વૈતબદ્ધાદરબુધપરિષચ્છેમુષીસન્નિષણ્ણા-
    મર્વાગ્દુર્વાદિગર્વાનલવિપુલતરજ્વાલમાલાવલીઢામ્ ।
સિક્ત્વા સૂક્તામૃતૌઘૈરહહ પરિહસઞ્જીવયસ્યદ્ય સદ્યઃ
    કો વા સેવાપટુઃ સ્યાદ્ગ્રણતરણવિધૌ સદ્ગુરોર્ન્નૈવ જાને ॥ ૬૨॥

ઇત્યુક્ત્વોપરતે સુરેશ્વરગુરૌ તેનૈવ શારીરકે

નો સમ્ભાવ્યહહાત્ર વાર્તિકમિતિ પ્રૌઢં શુર્ગાગ્નિં શનૈઃ ।
ધીરાગ્ર્યઃ શમયન્વિવેકપયસા દેવેશ્વરેણ ત્રયી-
ભાષ્યે કારયિતું સ વાર્તિકયુગં બદ્ધાદરોઽભુન્મુનિઃ ॥ ૬૩ ॥

ભાવાનુકારિમૃદુવાક્યનિવેશિતાર્થં
સ્વીયૈઃ પદૈઃ સહ નિરાકૃતપૂર્વપક્ષમ્ ।
સિદ્ધાન્તયુક્તિવિનિવેશિતતત્સ્વરૂપં
દૃષ્ટ્વાઽભિનન્ધ્ય પરિતોષવશાદવોચત્ ॥ ૬૪ ॥

સત્યં યદાત્થ વિનયિન્ મમ યાજુષી યા
શાખા તદન્તગતભાષ્યનિબન્ધ ઇષ્ટઃ ।
તદ્વાર્તિકં મમ કૃતે ભવતા પ્રણેયં
સચ્ચેષ્ટિતં પરહિતૈકફલં પ્રસિદ્ધમ્ ॥ ૬૫ ॥

તદ્વત્વદીયા ખલુ કાણ્વશાખા મમાપિ તત્રાસ્તિ તદન્તભાષ્યમ્ ।
તદ્વાર્તિકં ચાપિ વિધેયમિષ્ટં પરોપકારાય સતાં પ્રવૃત્તિઃ ॥ ૬૬ ॥

તત્રોભયત્ર કુરુ વાર્તિકમાર્તિહારિ
કીર્તિં ચ યાહિ જિતકાર્તિકચન્દ્રિકાભામ્ ।
મા શઙ્કિ પૂર્વમિવ દુઃશઠવાવયરોધો
મદ્વાક્યમેવ શરણં વ્રજ મા વિચારીઃ ॥ ૬૭ ॥

ઇત્થં સ ઉક્તો ભગવત્પદેન શ્રી વિશ્વરૂપો વિદુષાં વરિષ્ઠઃ ।
ચકાર ભાષ્યદ્વયવાર્તિકે દ્વે હ્યાજ્ઞા ગુરૂણાં હ્યવિચારણીયા ॥ ૬૮ ॥

આજ્ઞા ગુરોરનુચરૈર્ન હિ લઙ્ઘનીયેત્યુક્ત્વા તયોર્નિગમશેખરયોરુદારમ્ ।
નિર્માય વાર્તિકયુગં નિજદેશિકાય નિઃસીમનિસ્તુલનધીરુપદાં ચકાર ॥ ૬૯ ॥

સનન્દનો નામ ગુરોરનુજ્ઞયા ભાષ્યસ્ય ટીકાં વ્યધિતેરિતઃ પરામ્ ।
યત્પૂર્વભાગઃ કિલ પઞ્ચપાદિકા તચ્છેષગા વૃત્તિરિતિ પ્રથીયસી ॥ ૭૦ ॥

વ્યાસર્ષિસૂત્ર નિચયસ્ય વિવેચનાય
ટીકાભિધં વિજયડિણ્ડિમમાત્મકીર્તેઃ ।
નિર્માય પદ્મચરણો નિરવદ્યયુક્તિ-
દૃબ્ધં પ્રબન્ધમકરોદ્ગુરુદક્ષિણાં સઃ ॥ ૭૧ ॥

આલોચયન્નથ તદાનુગતિં ગ્રહાણા-
મૂચે સુરેશ્વરસમાહ્વમુપહ્વરે સઃ ।

પઞ્ચૈવ વત્સ ચરણાઃ પ્રથિતા ઇહ સ્યુ-
स्तत्रापि सूत्रयुगलद्वयमेव भूम्ना ॥ ७२॥

પ્રારબ્ધકર્મપરિપાકવશાત્ પુનસ્ત્વં
વાચસ્પતિત્વમધિગમ્ય વસુન્ધરાયામ્ ।
ભવ્યાં વિધાસ્યસિતમાં મમ ભાગ્યટીકા-
માભૂતસંલયમધિક્ષિતિ સા ચ જીયાત્ ॥ ૭૩॥

ઇત્યેવમુક્ત્વઽથ યતીશ્વરોઽસાવાનન્દગિર્યાદિમુનીન્ સ હૂત્વા ।
કુરુધ્વમદ્વૈતપરાન્નિબન્ધાન્નિત્યન્વશાન્નિર્મમસાર્વભૌમઃ ॥ ૭૪॥

તે સર્વેઽપ્યનુમતિમાપ્ય દેશિકેન્દોરાનન્દાચલમુખરા મહાનુભાવાઃ
આતેનુર્જગતિ યથાસ્વમાત્મતત્ત્વામ્ભોજાર્કાન્ વિશદતરાન્ બહૂન્નિબન્ધાન ॥ ૭૫॥

ઇતિ શ્રીમાધવીયે તદ્વાર્તિકાન્તપ્રવર્તનઃ ।
સઙ્ક્ષેપશઙ્કરજયે પૂર્ણઃ સર્ગસ્ત્રયોદશઃ ॥ ૧૩॥

આદિતઃ શ્લોકાઃ ૧૩૮૭।

# શઙ્કરદિગ્વિજયમ્

## ॥ ૧૪. ચતુર્દશઃ સર્ગઃ પદ્મપાદતીર્થયાત્રાવર્ણનમ્ ॥

અથ ચતુર્દશઃ સર્ગઃ ॥ ૧૪॥

અથાબ્જપાત્ કર્તુમનાઃ સ તીર્થયાત્રામયાચિષ્ટ ગુરોરનુજ્ઞામ્ ।
દેયા ગુરો મે ભગવન્નનુજ્ઞા દેશાન્દિદૃક્ષે વહુતીર્થયુક્તાન્ ॥ ૧॥

સ ક્ષેત્રવાસો નિકટે ગુરોર્યો વાસસ્તદીયાઙ્ઘ્રિજલં ચ તીર્થમ્ ।
ગુરૂપદેશેન યદાત્મદૃષ્ટિઃ સૈવ પ્રશસ્તાઽખિલદેવદૃષ્ટિઃ ॥ ૨॥

શુશ્રૂષમાણેન ગુરોઃ સમીપે સ્થેયં ન નેયં ચ તતોઽન્યદેશે ।
વિશિષ્ય માર્ગશ્રમકર્શિતસ્ય નિદ્રાભિભૂત્યા કિમુ ચિન્તનીયમ્ ॥ ૩॥

દ્વિધા હિ સંન્યાસ ઉદીરિતોઽયં વિબુદ્ધતત્ત્વસ્ય ચ તદ્બુભુત્સોઃ ।
તત્ત્વમ્પદાર્થૈક્ય ઉદીરિતોઽયં યત્નાત્ત્વમર્થઃ પરિશોધનીયઃ ॥ ૪॥

સમ્ભાવ્યતે ક્વ ચ જલં ક્વ ચ નાસ્તિ પાથઃ
શય્યાસ્થલં કચિદિહાસ્તિ ન ચ ક્વ ચાસ્તિ ।
શય્યાસ્થલીજલનિરીક્ષણસક્તચેતાઃ
પાન્થો ન શર્મ લભતે કલુષીકૃતાત્મા ॥ ૫॥

જ્વરાતિસારાદિ ચ રોગજાલં બાધેત ચેત્તર્હિ ન કોઽપ્યુપાયઃ ।
સ્થાતું ચ ગન્તું ચ ન પારયેત તદા સહાયોઽપિ વિમુઞ્ચતીમમ્ ॥ ૬॥

સ્નાનં પ્રભાતે ન ચ દેવતાર્ચનં ક્વ ચોક્તશૌચં ક્વ ચ વા સમાધયઃ ।
ક્વ ચાશનં કુત્ર ચ મિત્રસઙ્ગતિઃ પાન્થો ન શાકં લભતે ક્ષુધાતુરઃ ॥ ૭॥

નાસ્ત્યુત્તરં ગુરુગિરસ્તદપીહ વક્ષ્યે સત્યં યદાહ ભગવાન ગુરુપાર્શ્વવાસઃ ।
શ્રેયાનિતિ પ્રથમસંયમિનામનેકાન્ દેશાનવીક્ષ્ય હૃદયં ન નિરાકુલં મે ॥ ૮॥

સર્વત્ર ન ક્વાપિ જલં સમસ્તિ પશ્ચાત્ પુરસ્તાદથવા વિદિક્ષુ ।
માર્ગો હિ વિઘ્નેત ન સુવ્યવસ્થઃ સુખેન પુણ્યં ક્વ નુ લભ્યતેઽધુના ॥ ૯॥

જન્માન્તરાર્જિતમઘં ફલદાનહેતો-
  ર્વ્યાધ્યાત્મના જનિમુપૈતિ ન નો વિવાદઃ ।
સાધારણાદિહ ચ વા પરદેશકે વા
  કર્મ હ્યભુક્તમનુવર્તત એવ જન્તુમ્ ॥ ૧૦ ॥

ઇહ સ્થિતં વા પરતઃ સ્થિતં વા કાલો ન મુઞ્ચેત્ સમયાગતશ્ચેત્ ।
તદ્દેશગત્યાઽમૃત દેવદત્ત ઇત્યાદિકં મોહકૃતં જનાનામ્ ॥ ૧૧ ॥

મન્વાદયો મુનિવરાઃ ખલુ ધર્મશાસ્ત્રે
  ધર્માદિ સઙ્કુચિતમાહુર તિપ્રવૃદ્ધમ્ ।
દેશાદ્યવેક્ષ્ય ન તુ તત્સરણિં ગતાનાં
  શૌચાદ્યતિક્રમકૃતં પ્રભવેદઘં નઃ ॥ ૧૨ ॥

દૈવેઽનુકૂલે વિપિનં ગતો વા સમાપ્નુયાદ્વાઞ્છિતમન્નમેષઃ ।
હ્રિયેત નશ્યેદપિ વા પુરસ્થં તસ્મિન્ પ્રતીપે તત એવ સર્વમ્ ॥ ૧૩ ॥

ગૃહં પરિત્યજ્ય વિદેશગો ના સુખં સમાગચ્છતિ તીર્થદૃશ્વા ।
ગૃહં ગતો યાતિ મૃતિં પુરસ્તાત્તદાગમાદત્ર ચ કિં નિમિત્તમ્ ॥ ૧૪ ॥

દેશે કાલેઽવસ્થિતં તદ્વિમુક્તં બ્રહ્માનન્દં પશ્યતાં તત્ર તત્ર ।
ચિત્તૈકાગ્ર્યે વિદ્યમાને સમાધિઃ સર્વત્રાસૌ દુર્લભો નેતિ મન્યે ॥ ૧૫ ॥

સત્તીર્થસેવા મનસઃ પ્રસાદિની દેશસ્ય વીક્ષા મનસઃ કુતૂહલમ્ ।
ક્ષિણોત્યનર્થાન્ સુજનેન સઙ્ગમસ્તસ્માન્ન કસ્મૈ ભ્રમણં વિરોચતે ॥ ૧૬ ॥

અટાટ્યમાનોઽપિ વિદેશસઙ્ગતિં લભેત વિદ્વાન્ વિદુષાઽભિસઙ્ગતિમ્ ।
બુધો બુધાનાં ખલુ મિત્રમીરિતં ખલેન મૈત્રી ન ચિરાય તિષ્ઠતિ ॥ ૧૭ ॥

સમીપવાસોઽયમુદીરતો ગુરોર્વિદેશગો યદ્ હૃદયેન ધારયેત્ ।
સમીપગોઽપ્યેષ ન સંસ્થિતોઽન્તિકે ન ભક્તિહીનો યદિ ધારયેદ્ હૃદિ ॥ ૧૮ ॥

સુજનઃ સુજનેન સઙ્ગતઃ પરિપુષ્ણાતિ મતિં શનૈઃ શનૈઃ ।
પરિપુષ્ટમતિર્વિષેકવાઙ્શનકૈર્હેયગુણં વિમુઞ્ચતિ ॥ ૧૯ ॥

યદ્યાગ્રહોઽસ્તિ તવ તીર્થનિષેવણાયાં
  વિઘ્નો મયાઽત્ર ન ખલુ ક્રિયતે પુમર્થે ।
ચિત્તસ્થિરત્વગતયે વિહિતો નિષેધો
  મા ભૂદ્વિશેષગમનં ત્વતિદુઃખહેતુઃ ॥ ૨૦ ॥

નૈકો માર્ગો બહુજનપદક્ષેત્રતીર્થાનિ યાતાં
        ચૌરાધ્વાનં પરિહર સુખં ત્વન્યમાર્ગેણ યાહિ ।
વિપ્રાગ્ર્યાણાં વસતિવિતતિર્યત્ર વસ્તવ્યમીષ-
        ન્નો ચેત્સાર્ધં પરિચિતજનૈઃ શીઘ્રમુદ્દિષ્ટદેશમ્ ॥ ૨૧॥

સદ્ભિઃ સઙ્ગો વિધેયઃ સ હિ સુખનિચયં સૂયતે સજ્જનાના-
        મધ્યાત્મૈક્યે કથાસ્તા ઘટિતબહુરસાઃ શ્રાવ્યમાણાઃ પ્રશાન્તૈઃ ।
કાયક્લેશં વિભિન્દ્યુઃ સતતભયભિદઃ શ્રાન્તવિશ્રામવૃક્ષાઃ
        સ્વાન્તશ્રોત્રાભિરામાઃ પરિમૃષિતતૃષઃ ક્ષોભિતક્ષુત્કલઙ્કાઃ ॥ ૨૨॥

સત્સઙ્ગોઽયં બહુગુણયુતોઽપ્યેકદોષેણ દુષ્ટો
        યત્ સ્વાન્તેઽયં તપતિ ચ પરં સૂયતે દુઃખજાલમ્ ।
ખલ્વાસઙ્ગો વસતિસમયે શર્મદઃ પૂર્વકાલે
        માયો લોકે સતતવિમલં નાસ્તિ નિર્દોષમેકમ્ ॥ ૨૩॥

માર્ગે યાસ્યન્ન બહુદિવસાન પાથસઃ સઙ્ગ્રહી સ્યાત્-
        તસ્માદ્દોષો જિગમિષુપદપ્રાપ્તિવિઘ્નસ્તતઃ સ્યાત્ ।
પ્રાપ્યોદ્દિષ્ટં વસ નિરસનં તત્ર કાર્યસ્ય સિદ્ધ્યે-
        ર્મૂલાદ્ભ્રંશોઽભિલષિતપદપ્રાપ્ત્યભાવોઽન્યથા હિ ॥ ૨૪॥

માર્ગે ચોરા નિકૃતિવપુષઃ સંવસેયુઃ સહૈવ
        છન્નાત્માનો બહુવિધગુણૈઃ સમ્પરીક્ષ્યાઃ પ્રયત્નાત્ ।
દેવાન્ વસ્ત્રં લિખિતમથવા દુર્વિધા નેતુકામા
        વિશ્વાસોઽતોઽપરિચિતનૃષુ પ્રોજ્ઝનીયો ન કાર્યઃ ॥ ૨૫॥

મધ્યેમાર્ગં યોજનાભ્યન્તરે વા તિષ્ઠેયુશ્ચેદ્ભિક્ષવસ્તેઽભિગમ્યાઃ ।
પૂજ્યાઃ પૂજ્યાસ્તદ્વ્યતિક્રાન્તિરુગ્રા શ્રેયસ્કાર્યં નિષ્ફલી કર્તુમીશાઃ ॥ ૨૬॥

યદાપદપદં સદા યતિવર સ્થિતં વસ્તુ ત-
        ન્મતં ભજ મિતમ્પચાન્ મનસિ મા કૃથાઃ પ્રાકૃતાન્ ।
કષાયકલુષાશયક્ષતિવિનિર્વૃતઃ સન્મતઃ
        સુખી ચર સુખે ચિરાત્ સ્ફુરતિ સન્તતાનન્દતા ॥ ૨૭॥

ઇત્થં ગુરોર્મુખગુહોદિતવાક્સુધાં તા
        માપીય હૃષ્ટહૃદયઃ સ મુનિઃ પ્રતસ્થે ।
પ્રસ્થાપ્ય તં ગુરુવરોઽથ સુરેશ્વરાદ્યૈઃ
        કાલં કિયન્તમનયત્ સહ શ‍ૃઙ્ગકુધ્રે ॥ ૨૮॥

અધિગમ્ય તદાઽઽત્મયોગશક્તેરનુભાવેન નિવેદ્ય ચાઽઽ શ્રવેભ્યઃ ।
અવલમ્બિતતારકાપથોઽસાવચિરાદન્તિકમાસસાદ માતુઃ ॥ ૨૯॥

તત્રાઽઽતુરાં માતરમૈક્ષતાસૌ નનામ તસ્યાશ્ચરણૌ કૃતાત્મા ।
સા ચૈનમુદ્વીક્ષ્ય શરીરતાપં જહૌ નિદાઘાર્ત ઇવામ્બુદેન ॥ ૩૦॥

અસાવસઙ્ગોઽપિ તદાઽઽર્દ્રચેતાસ્તામાહ મોહાન્ધતમોપહર્તા ।
અમ્બાયમસ્ત્યત્ર શુચં જહીહિ પ્રબ્રૂહિ કિં તે કરવાણિ કૃત્યમ્ ॥ ૩૧॥

દૃષ્ટ્વા ચિરાત્ પુત્રમનામયં સા હૃષ્ટાન્તરાત્મા નિજગાદ મન્દમ્ ।
અસ્યાં દશાયાં કુશલી મયા ત્વં દિષ્ટ્યાઽસિ દૃષ્ટઃ કિમતોઽસ્તિ કૃત્યમ્ ॥ ૩૨॥

ઇતઃ પરં પુત્રક ગાત્રમેતદ્વોઢું ન શક્નોમિ જરાતિશીર્ણમ્ ।
સંસ્કૃત્ય શાસ્ત્રોદિતવર્ત્મના ત્વં સદ્વૃત્ત માં પ્રાપય પુણ્યલોકાન્ ॥ ૩૩॥

સુતાનુગાં સૂક્તિમિમાં જનન્યાઃ શ્રુત્વાઽથ તસ્યૈ સુખરૂપમેકમ્ ।
માયામયાશેષવિશેષશુન્યં માનાતિગં સ્વપ્રભમપ્રમેયમ્ ॥ ૩૪॥

॥

ઉપાદિશદ્બ્રહ્મ પરં સનાતનં ન યત્ર હસ્તાઙ્ઘ્રિવિભાગકલ્પના ।
અન્તર્બહિઃ સન્નિહિતં યથાઽમ્બરં નિરામયં જન્મજરાદિવર્જિતમ્ ॥ ૩૫॥

સૌમ્યાગુણે મે રમતે ન ચિત્તં રમ્યં વદ ત્વં સગુણં તુ દેવમ્ ।
ન બુદ્ધિમારોહતિ તત્ત્વમાત્રં યદેકમસ્થૂલમનણ્વગોત્રમ્ ॥ ૩૬॥

નિશમ્ય માતુર્વચનં દયાલુસ્તુષ્ટાવ ભક્ત્યા મુનિરષ્ટમૂર્તિમ્ ।
વૃત્તૈર્ભુજઙ્ગોપપદૈઃ પ્રસન્નઃ પ્રસ્થાપયામાસ સ ચ સ્વદૂતાન્ ॥ ૩૭॥

વિલોક્ય તાઞ્શૂલપિનાકહસ્તાન્નૈવાનુગચ્છેયમિતિ બ્રુવત્યામ્ ।
તસ્યાં વિસૃજ્યાનુનયેન શૈવાનસ્તૌદથો માધવમાદરેણ ॥ ૩૮॥

ભુજગાધિપભોગતલ્પભાજં કમલાઙ્કસ્થલકલ્પિતાઙ્ઘ્રપદ્મમ્ ।
અભિવીજિતમાદરેણં નીલાવસુધાભ્યાં ચલમાનચામરાભ્યામ્ ॥ ૩૯॥

વિહિતાઞ્જલિના નિષેવ્યમાણં વિનતાનન્દકૃતાઽગ્રતો રથેન ।
ધૃતમૂર્તિભિરસ્ત્રદેવતાભિઃ પરિતઃ પઞ્ચભિરઞ્ચિતોપકણ્ઠમ્ ॥ ૪૦॥

મહનીયતમાલકોમલાઙ્ગં મુકુટીરત્નચયં મહાર્હયન્તમ્ ।
શિશિરેતરભાનુશીલિતાગ્રં હરિનીલોપલભૂધરં હસન્તમ્ ॥ ૪૧॥

તત્તાદૃશં નિજસુતોદિતમમ્બુજાક્ષં ચિત્તે દધાર મૃતિકાલ ઉપાગતેઽપિ ।
ચિત્તેન કઞ્જનયનં હૃદિ ભાવયન્તી તત્યાજ દેહમબલા કિલ યોગિવત્સા ॥ ૪૨॥

તતઃ શરચ્ચન્દ્રમરીચિરોચિર્વિચિત્રપારિપ્લવકેતનાઢ્યમ્ ।
વિમાનમાદાય મનોજ્ઞરૂપં પ્રાદુર્બભૂવુઃ કિલ વિષ્ણુદૂતાઃ ॥ ૪૩॥

વૈમાનિકાંસ્તાન્નયનાભિરામાનવેક્ષ્ય હૃષ્ટા મશશંસ પુત્રમ્ ।
વિમાનમારોપ્ય વિરાજમાનમનાયિ તૈઃ સા બહુમાનપૂર્વમ્ ॥ ૪૪॥

ઇયમર્ચિરહર્વલક્ષપક્ષાન્ ષડુદઙ્માસસમાનિલાર્કચન્દ્રાન્ ।
ચપલાવરુણેન્દ્રધાતૃલોકાન્ ક્રમશોઽતીત્ય પરં પદં પ્રપેદે ॥ ૪૫॥

સ્વયમેવ ચિકીર્ષુરેષ માતુશ્ચરમં કર્મ સમાજુહાવ બન્ધૂન્ ।
કિમિહાસ્તિ યતે તત્રાધિકારઃ કિતવેત્યેનમમી નિનિન્દુરુચ્ચૈઃ ॥ ૪૬॥

અનલં બહુધાઽર્થિતાઽપિ તસ્મૈ બત નાઽઽદદ્ત્ત ચ બન્ધુતા તદીયા ।
અથ કોપપરીવૃતાન્તરોઽસાવખિલાંસ્તાનશપચ્ચ નિર્મમેન્દ્રઃ ॥ ૪૭॥

સઞ્ચિત્ય કાષ્ઠાનિ સુશુષ્કવન્તિ ગૃહોપકણ્ઠે ધૃતતોયપાત્રઃ ।
સ દક્ષિણે દોષ્ણિ મમન્થ વહ્નિં દદાહ તાં તેન ચ સંયતાત્મા ॥ ૪૮॥

ન યાચિતા વહ્નિમદુર્યદસ્મૈ શશાપ તાન્ સ્વીયજનાન્ સરોષઃ ।
ઇતઃ પરં વેદબહિષ્કૃતાસ્તે દ્વિજા યતીનાં ન ભવેચ્ચ ભિક્ષા ॥ ૪૯॥

ગૃહોપકણ્ઠેષુ ચ વઃ શ્મશાનમદ્યપ્રભૃત્યસ્ત્વિતિ તાઞ્શશાપ ।
અદ્યાપિ તદ્દેશભવા ન વેદમધીયતે નો યમિનાં ચ ભિક્ષા ॥ ૫૦॥

તદાપ્રભૃત્યેવ ગૃહોપકણ્ઠેષ્વાસીચ્છ્મશાનં કિલ હન્ત તેષામ્ ।
મહત્સુ ધીપૂર્વકૃતાપરાધો ભવેત્ પુનઃ કસ્ય સુખાય લોકે ॥ ૫૧॥

શાન્તઃ પુમાનિતિ ન પીડનમસ્ય કાર્યં
    શાન્તોઽપિ પીડનવશાત્ ક્રુધમુદ્વહેત્ સઃ ।
શીતઃ સુખોઽપિ મથિતઃ કિલ ચન્દનદ્રુ-
    સ્તીવ્રાહુતાશજનકો ભવતિ ક્ષણેન ॥ ૫૨॥

યદ્યપ્યશાસ્ત્રીયતયા વિભાતિ તેજસ્વિનાં કર્મ તથાઽપ્યનિન્દ્યમ્ ।
વિનિન્દ્યકૃત્યં કિલ ભાર્ગવસ્ય દદુઃ સ્વપુત્રાન્ કતિચિદ્દ્રૂકાય ॥ ૫૩॥

ઇતિ સ્વજનનીમસૌ મુનિજનૈરપિ પ્રાર્થિતાં

પુનઃ પતનવર્જિતામતનુસૌખ્યસન્દોહિનીમ્ ।
યતિક્ષિતિપતિર્ગતિં વિતમસં સ નીત્વા તત-
સ્તતોઽન્યમતશાતને પ્રયતતે સ્મ પૃથ્વીતલે ॥ ૫૪॥

અથ તત્સહાયજલજાઙ્ઘ્રયુપાગમેચ્છુરભીપ્સિતેઽત્ર વિલલમ્બ એષકઃ ।
જલાજાઙ્ઘ્રિરપ્યથ પુરા નિજજ્ઞયા કૃતવાનુદીચ્યબહુતીર્થસેવનમ્ ॥ ૫૫॥

આસસાદ શનકૈર્દિશં મુનિર્યસ્ય જન્મ વસુધાઘટી સ્મૃતા ।
સા શ્રુતિઃ સકલરોગનાશિની યોઽપિબજ્જલધિમેકબિન્દુવત્ ॥ ૫૬॥

અદ્રાક્ષીત્સુભગાહિભૂષિતતનું શ્રીકાલહસ્તીશ્વરં
લિઙ્ગે સન્નિહિતં દધાનમનિશં ચાન્દ્રીં કલાં મસ્તકે ।
પાર્વત્યા કરુણારસાર્દ્રમનસાઽઽશ્લિષ્ટં(પ્લેઅસે ચેચ્ક્) પ્રમોદાસ્પદં
દેવૈરિન્દ્રપુરોગમૈર્જય જયેત્યાભાષ્યમાણં મુનિઃ ॥ ૫૭॥

સ્નાત્વા સુવર્ણમુખરીસલિલાશયેઽન્તર્ગત્વા પુનઃ પ્રણમતિ સ્મ શિવં ભવાન્યા ।
આનર્ચ ભાવકુસુમૈર્મનસા નુનાવ સ્તુત્વા ચ તં પુનરયાચત તીર્થયાત્રામ્ ॥ ૫૮॥

લબ્ધ્વાઽનુજ્ઞાં તજ્જ્ઞરાટ્ કાલહસ્તિક્ષેત્રાત્ કાઞ્ચીક્ષેત્રમાગાત્ પવિત્રમ્ ।
સંસારાબ્ધિં સન્તિતીર્ષોઃ પ્રસિદ્ધં વૃદ્ધાઃ પ્રાહુર્યદ્ધિ લોકે હ્યમુષ્મિન્ ॥ ૫૯॥

તત્રૈકામ્રાધીશ્વરં વિશ્વનાથં નત્વા ગમ્યં સ્વીયભાગ્યાતિશીત્યા ।
દેવીં ધામાન્તર્ગતામન્તકારેર્હાર્દં(પ્લેઅસે ચેચ્ક્) રુદ્રસ્યેવ જિજ્ઞાસમાનામ્ ॥ ૬૦॥

કલ્લાલેશં દ્રાક્તતો નાતિદૂરે લક્ષ્મીકાન્તં સંવસન્તં પુરાણમ્ ।
કારુણ્યાર્દ્રસ્વાન્તમન્તાદિશૂન્યં દૃષ્ટ્વા દેવં સન્તુતોષૈકભક્ત્યા ॥ ૬૧॥

પુણ્ડરીકપુરમાયયૌ મુનિર્યત્ર નૃત્યતિ સદાશિવોઽનિશમ્ ।
વીક્ષતે પ્રકુતિરાદિમા હૃદા પાર્વતીપરિણતિઃ શુચિસ્મિતા ॥ ૬૨॥

તાણ્ડવં મુનિજનોઽત્ર વીક્ષતે દિવ્યચક્ષુરમલાશયોઽનિશમ્ ।
જન્મમૃત્યુભયભેદિ દર્શનાન્નેત્રમાનસવિનોદકારકમ્ ॥ ૬૩॥

કિઞ્ચાત્ર તીર્થમિતિ ભિક્ષુગણેન કશ્ચિત્
પૃષ્ટોઽબ્રવીચ્છિવપદામ્બુજસક્તચિત્તઃ ।
સમ્પ્રાર્થિતઃ કરુણયાઽસ્મરદત્ર ગઙ્ગાં
દેવોઽથ સંન્યધિત દિવ્યસરિત્ સુતીર્થમ્ ॥ ૬૪॥

શિવાજ્ઞયાઽભૂદિતિ તીર્થમેતચ્છિવસ્ય ગઙ્ગાં પ્રવદન્તિ લોકે ।

સ્નાનાદમુષ્યાં વિધુતોરુપાપાઃ શનૈઃ શનૈસ્તાણ્ડવમીક્ષમાણાઃ ॥ ૬૫॥

શિવસ્ય નાટ્યશ્રમકર્શિતસ્ય શ્રમાપનોદાય વિચિન્તયન્તી ।
શિવેતિ ગઙ્ગાપરિણામગાઽભૂત્તતોઽથવૈતત્પ્રથિતં તદાખ્યમ્ ॥ ૬૬॥

નૃત્યત્તીરહતસ્ખલજ્જલગતેઃ પર્યાપતદ્બિન્દુકં
    પાર્શ્વે સ્વાવસતેર્વિનોદવશતો યજ્જહ્નુકન્યાપયઃ ।
નૃત્યં તન્વતિ ધૂર્જટૌ વિગલિતં પ્રેઙ્ખજ્જટામણ્ડલાત્-
    તેનૈતચ્છિવજાહ્નવીતિ કથયન્ત્યન્યે વિપશ્ચિજ્જનાઃ ॥ ૬૭॥

સ્નાયં સ્નાયં તીર્થવર્યેઽત્ર નિત્યં વીક્ષં વીક્ષં દેવપાદાબ્જયુગ્મમ્ ।
શોધં શોધં માનસં માનવોઽસૌ વીક્ષેતેદં તાણ્ડવં શુદ્ધચેતાઃ ॥ ૬૮॥

શુદ્ધં મહદ્વર્ણયિતું ક્ષમેત પુણ્યં પુરારિઃ સ્વયમેવ તસ્ય ।
નિમજ્જ્ય શમ્ભુદ્યુસરિત્યમુષ્યાં દાક્ષાયણીનાથમુદીક્ષતે યઃ ॥ ૬૯॥

ઇતીરિતઃ શઙ્કરયોજિતાત્મા કેનાપિ ભિક્ષુર્મુદિતો જગાહે ।
તીર્થં તદાપ્લુત્ય નનામ શમ્ભોરઙ્ઘ્રિં જિતાત્મા ભુવનસ્ય ગોપ્તુઃ ॥ ૭૦॥

રામસેતુગમનાય સન્દધે માનસં મુનિરનુત્તમઃ પુનઃ ।
વર્ત્મનિ પ્રયતમાનસો વ્રજન્ સન્દદર્શ સરિતં કવેરજામ્ ॥ ૭૧॥

યત્પવિત્રપુલિનસ્થલં પયઃસિન્ધુવાસરસિકાય વિષ્ણવે ।
અભ્યરોચત હિરણ્યવાસસે પદ્મનાભમુખનામશાલિને ॥ ૭૨॥

સહ્યપર્વતસુતાતિનિર્મલામ્ભોભિષિક્તભગવત્પદામ્બુજે ।
આકલય્ય બહુશિષ્ય સંવૃતઃ પ્રાસ્થિતાભિરુચિતસ્થલાય સઃ ॥ ૭૩॥

ગચ્છન્ ગચ્છન્ માર્ગમધ્યેઽભિયાતં ગેહં ભિક્ષુર્માતુલસ્યાઽઽજગામ ।
દૃષ્ટ્વા શિષ્યૈસ્તં ચિરેણાભિયાતં મોદં પ્રાપન્માતુલઃ શાસ્ત્રવેદી ॥ ૭૪॥

શુશ્રાવ તં બન્ધુજનઃ સશિષ્ય સ્વમાતુલાગારમુપેયિવાંસમ્ ।
આગત્ય દૃષ્ટ્વા ચિરમાગતં તં જહર્ષ હર્ષાતિશયેન સાશ્રુઃ ॥ ૭૫॥

રુરોદ કશ્ચિન્મુમુદેઽત્ર કશ્ચિજ્જહાસ પૂર્વાવરિતં બભાષે ।
કશ્ચિત્પ્રમોદાતિશયેન કિઞ્ચિદ્વચઃ સ્ખલદ્ગીઃ પ્રણનામ કશ્ચિત્ ॥ ૭૬॥

ઊચેઽથ તં જ્ઞાતિજનઃ પ્રમોદી દૃષ્ટા ચિરાયાક્ષિપથં ગતોઽભૂઃ ।
દિદૃક્ષતે ત્વાં જનતાઽતિહાહાર્દાત્તથાઽપિ શક્નોષિ ન વીક્ષણાય ॥ ૭૭॥

પુત્રાઃ સમિત્રા ન ન બન્ધુવર્ગો ન રાજબાધા ન ચ ચોરભીતિઃ ।

કૃતાર્થતામૂલપદં યતિત્વં પ્રસૂનવન્તં ફલિતં મહાન્તમ્ ॥ ૭૮॥

શાખોપશાખાઞ્ચિતમેવ વૃક્ષં બાધન્ત આગત્ય ન તદ્વિહીનમ્ ।
યથા તથા વા ધનિનં દરિદ્રા બાધન્ત આગત્ય દિને દિને સ્મ ॥ ૭૯॥

કુટુમ્બરક્ષાગતમાનસાનામાયાતિ નિદ્રાઽપિ સુખં ન જાતુ ।
ક્વ દેવતાર્ચા ક્વ ચ તીર્થયાત્રા ક્વ વા નિષેવા મહતાં ભવેન્નઃ ॥ ૮૦॥

અશ્રૌષ્મ સંન્યાસકૃતં ભવન્તં વિપ્રાત્ કુતશ્ચિદ્ગૃહમાગતાન્નઃ ।
કાલોઽત્યગાત્તે બહુરદ્ય દૈવાત્તીર્થસ્ય હેતોર્ગૃહમાગતસ્ત્વમ્ ॥ ૮૧॥

યથા શકુન્તાઃ પરવર્ધિતાન્ દ્રુમાન્ સમાશ્રયન્તે સુખદાંસ્ત્યજન્ત્યપિ ।
પરપ્રક્ળૃપ્તાન્ મઠદેવતાગૃહાન્યતિઃ સમાશ્રિત્ય તયોર્થોજ્ઝતિ ધ્રુવમ્ ॥ ૮૨॥

યથા હિ પુષ્પાણ્યભિગમ્ય ષટ્પદાઃ સઙ્ગૃહ્ય સારં રસમેવ ભુઞ્જતે ।
તથા યતિઃ સારમવાપ્નુવન્ સુખં ગૃહાગૃહાદોદનમેવ ભિક્ષતે ॥ ૮૩॥

યતેર્વિરજ્યાત્મગતિઃ કલત્રં દેહં ગૃહં સંયતમેવ સૌખ્યમ્ ।
વિરક્તિભાજસ્તનયાઃ સ્વશિષ્યાઃ કિમર્થનીયં યતિનો મહાત્મન્ ॥ ૮૪॥

મનોરથાનાં ન સમાપ્તિરિષ્યતે પુનઃ પુનઃ સન્તનુતે મનોરથાન્ ।
દારાનભીપ્સુર્યતતે દિવાનિશં તાન્ પ્રાપ્ય તેભ્યસ્તનયાનભીપ્સતિ ॥ ૮૫॥

અનાપ્નુવન્ દુઃખમસૌ સુતીવ્રં પ્રાપ્નોતિ ચેષ્ટેન વિયુજ્યતે પુનઃ ।
સર્વાત્મના કામવશસ્ય દુઃખં તસ્માદ્વિરક્તિઃ પુરુષેણ કાર્યા ॥ ૮૬॥

વિરક્તિમૂલં મનસો વિશુદ્ધિં તન્મૂલમાહુર્મહતાં નિષેવામ્ ।
ભવાદૃશાસ્તેન ચ દૂરદેશે પરોપકારાય રસામટન્તિ ॥ ૮૭॥

અજ્ઞાતગોત્રા વિદિતાત્મતત્ત્વા લોકસ્ય દૃષ્ટ્યા જડવદ્વિભાન્તઃ ।
ચરન્તિ ભૂતાન્યનુકમ્પમાનાઃ સન્તો યદૃચ્છોપનતોપભોગ્યાઃ ॥ ૮૮॥

ચરન્તિ તીર્થાન્યપિ સઙ્ગ્રહીતું લોકં મહાન્તો નનુ શુદ્ધભાવાઃ ।
શુદ્ધાત્મવિદ્યાક્ષપિતોરુપાપાસ્તજ્જુષ્ટમમ્ભો નિગદન્તિ તીર્થમ્ ॥ ૮૯॥

વસ્તવ્યમત્ર કતિચિદ્દિવસાનિ વિદ્વંસ્ત્વદ્દર્શનં વિતનુતે મુદિતાદિ ભવ્યમ્ ।
એષ્યદ્વિયોગચકિતા જનતેયમાસ્તે દુઃખં ગતેઽત્ર ભવિતેતિ ભવત્યસઙ્ગે ॥ ૯૦॥

કોશં ક્લેશમલસ્ય લાસ્યગૃહમપ્યુદ્રંહસામાલયં
 પૈશુન્યસ્ય નિશાન્તમુત્કટમૃષાભાષાવિશેષાશ્રયમ્ ।
હિંસામાંસલમાશ્રિતા ધનધનાશંસાનૃશંસા વયં

વર્જ્યં દુર્જનસઙ્ગમં કરુણયા શોધ્યા યતીન્દો ત્વયા ॥ ૯૧॥

સંયુનક્તિ વિયુનક્તિ દેહિનં દૈવમેવ પરમં મનાગપિ ।
ઇષ્ટસઙ્ગતિનિવૃત્તિકાલયોર્નિર્વિકારહૃદયો ભવેન્નરઃ ॥ ૯૨॥

મધ્યાહ્નકાલે ક્ષુધિતસ્તૃષાર્તઃ ક્વ મેઽન્નદાતેતિ વદન્નુપૈતિ ।
યસ્તસ્ય નિર્વાપયિતા ક્ષુદાર્તેઃ કસ્તસ્ય પુણ્યં વદિતું ક્ષમેત ॥ ૯૩॥

સાયં પ્રાતર્વહ્નિકાર્યં વિતન્વન્ મજ્જંસ્તોયે દણ્ડકૃષ્ણાજિની ચ ।
નિત્યં વર્ણી વેદવાક્યાન્યધીયન્ ક્ષુદ્ધ્વા શીઘ્રં ગેહિનો ગેહમેતિ ॥ ૯૪॥

ઉચ્ચૈઃ શાસ્ત્રં ભાષમાણોઽપિ ભિક્ષુસ્તારં મન્ત્રં સઞ્જપન્વા યતાત્મા ।
મધ્યેઘસ્રં જાઠરાગ્નૌ પ્રદીપ્તે દણ્ડી નિત્યં ગેહિનો ગેહમેતિ ॥ ૯૫॥

યદન્નદાનેન નિજં શરીરં પુષ્ણંસ્તપોઽયં કુરુતે સુતીવ્રમ્ ।
કર્તુસ્તદર્ધં દદતોઽન્નમર્ધમિતિ સ્મૃતિઃ સંવવૃતેઽનવદ્યા ॥ ૯૬॥

પુણ્યં ગૃહસ્થેન વિચક્ષણેન ગૃહેષુ સઞ્ચેતુમલં પ્રયાસાત્ ।
વિનાઽપિ તત્કર્તૃનિષેવણેન તીર્થાદિસેવા બહુદુઃખસાધ્યા ॥ ૯૭॥

ગૃહી ધની ધન્યતરો મતો મે તસ્યોપજીવન્તિ ધનં હિ સર્વે ।
ચૌર્યેણ કશ્ચિત્પ્રણયેન કશ્ચિદ્દાનેન કશ્ચિદ્બલતોઽપિ કશ્ચિત્ ॥ ૯૮॥

સન્તોષયેદ્વેદવિદં દ્વિજં યઃ સન્તોષયત્યેષ સ સર્વદેવાન્ ।
તદ્વેદવિપ્રે નિવસન્તિ દેવા ઇતિ સ્મ સાક્ષાચ્છ્રુતિરેવ વક્તિ ॥ ૯૯॥

સ્વધર્મનિષ્ઠા વિદિતાખિલાર્થા જિતેન્દ્રિયાઃ સેવિતસર્વતીર્થાઃ ।
પરોપકારવ્રતિનો મહાન્ત આયાન્તિ સર્વે ગૃહિણો ગૃહાય ॥ ૧૦૦॥

ગૃહી ગૃહસ્થોઽપિ તદશ્નુતે ફલં યત્તીર્થસેવાભિરવાપ્યતે જનૈઃ ।
તત્તસ્ય તીર્થં ગૃહમેવ કીર્તિતં ધની વદાન્યઃ પ્રવસેન્ન કશ્ચન ॥ ૧૦૧॥

અન્તઃસ્થિતા મૂષકમુખ્યજીવા બહિઃસ્થિતા ગોમૃગપક્ષિમુખ્યાઃ ।
જીવન્તિ જીવાઃ સકલોપજીવ્યસ્તસ્માદ્ગૃહી સર્વવરો મતો મે ॥ ૧૦૨॥

શરીરમૂલં પુરુષાર્થસાધનં તચ્ચાન્નમૂલં શ્રુતિતોઽવગમ્યતે ।
તચ્ચાન્નમસ્માકપમમીષુ સંસ્થિતં સર્વં ફલં ગેહપતિદ્રુમાશ્રયમ્ ॥ ૧૦૩॥

બ્રવીમિ ભૂયઃ શ઼ૃણુતાઽઽદરેણ વો ગૃહાગતં પૂજયતાઽઽતુરાતિથિમ્ ।
સમ્પૂજિતો વોઽતિથિરુદ્ધરેત્કુલં નિરાકૃતાત્ કિં ભવતીતિ નોચ્યતે ॥ ૧૦૪॥

વિનાऽભિસન્ધિં કુરુત શ્રુતીરિતં કર્મ દ્વિજા નો જગતામધીશ્વરઃ ।
તુષ્યેદિતિ પ્રાર્થનયાऽપિ તેન સ્વાન્તસ્ય શુદ્ધિર્ભવિતાऽચિરેણ વઃ ॥ ૧૦૫॥

સસંરમ્ભાશ્લિષ્યત્સુકૃણિતિવધૂટીકુચતટી-
    પટીવત્પાટીરાગરવનવપઙ્કાઙ્કિતહૃદઃ ।
તથાऽપ્યેતે પૂતા યતિપતિપદામ્ભોજભજન-
    ક્ષણક્ષીણક્લેશાઃ સદયહૃદયાભાઃ સુકૃતિનઃ ॥ ૧૦૬॥

સન્દિશ્યેત્થં બન્ધુતાં ભિક્ષુરાજો ભિક્ષાં ચક્રે માતુલસ્યૈત્ર ગેહે ।
પપ્રચ્છૈનં માતુલો ભુક્તવન્તં કિંસ્વિચ્છન્નં પુસ્તકં શિષ્યહસ્તે ॥ ૧૦૭॥

ટીકા વિદ્વન્ ભાષ્યગેતિ બ્રુવાણં તાં દેહીતિ પ્રોચિષે દત્તવાંશ્ચ ।
અદ્રાક્ષીત્તાં માતુલસ્તસ્ય બુદ્ધિં દૃષ્ટ્વાऽऽનન્દીત્ ખેદમાપચ્ચ કિઞ્ચિત્ ॥ ૧૦૮॥

પ્રબન્ધનિર્માણવિચિત્રનૈપુણીં દૃષ્ટ્વા પ્રમોદં સ વિવેદ કિઞ્ચિત્ ।
મતાન્તરાણાં કિલ યુક્તિજાલૈર્નિરુત્તરં બન્ધનમાલુલોકે ॥ ૧૦૯॥

ગુરોર્મતં સ્વાભિમતં વિશેષાન્નિરાકૃતં તત્ર સમત્સરોऽભૂત્ ।
સાધુર્નિબન્ધોऽયમિતિ  બ્રુવાણસ્તં સાભ્યસૂયોऽપિ કૃતાભિનન્દઃ ॥ ૧૧૦॥

સેતું ગચ્છામ્યાલયે પુસ્તભારં તે ન્યસ્યેમં વર્તતે મેऽત્ર જીવઃ ।
વિદ્વન્ યદ્વદ્ગોગૃહાદૌ પરેષાં પ્રીતિઃ પૂર્ણા નસ્તથા પુસ્તભારે ॥ ૧૧૧॥

ઇત્યુક્ત્વા તૈર્માતુલં મસ્કરીશઃ શિષ્યૈર્હૃષ્યન્ સેતુમેષ પ્રતસ્થે ।
પ્રસ્થાતુઃ શ્રીપદ્મપાદસ્ય જાતં કષ્ટં ચૈષ્યત્સૂચનાર્થૈ નિમિત્તમ્ ॥ ૧૧૨॥

વામં નેત્રં ગન્તુરસ્પન્દતૈવ બાહુઃ પુસ્ફોરાપિ વામસ્તથોરુઃ ।
ચુક્ષાવોચ્ચૈર્હન્ત કશ્ચિત્પુરસ્તાત્તત્સર્વં દ્રાગ્જ્ઞોऽગણિત્વા જગામ ॥ ૧૧૩॥

ગતેऽત્ર મેને કિલ માતુલોऽસ્ય ગ્રન્થે સ્થિતેऽસ્મિન ગુરુપક્ષહાનિઃ ।
દગ્ધેऽત્ર જાયેત મહાન્ પ્રચારો નોક્ત્યા નિરાકર્તુમપિ પ્રભુત્વમ્ ॥ ૧૧૪॥

પક્ષસ્ય નાશાદ્ગૃહનાશ એવ નો વરં ગૃહેણૈવ દહામિ પુસ્તકમ્ ।
એવં નિરુપ્ય ન્યદધાદ્ધુતાશનં ચુક્રોશ ચાગ્નિર્દહતીતિ મે ગૃહમ્ ॥ ૧૧૫॥

ઐતિહ્યમાશ્રિત્ય વદન્તિ ચૈવં તદેવ મૂલં મમ ભાષણેऽપિ ।
યાવત્કૃતં તાવદિહાસ્ય કર્તુઃ પાપં તતઃ સ્યાદ્દ્વિગુણં પ્રવક્તુઃ ॥ ૧૧૬॥

ગચ્છન્નસૌ ફુલ્લમુનેર્જગામ તમાશ્રમં યત્ર ચ રામચન્દ્રઃ ।
અશ્વત્થમૂલે ન્યધિત સ્વચાપં સ્વયં કુશાનામુપરિ ન્યષીદત્ ॥ ૧૧૭॥

તીર્ત્વા સમુદ્રં જનકાત્મજાયાઃ સન્દર્શનોપાયમનીક્ષમાણઃ ।
વસુન્ધરાયાં પ્રવણાઃ પ્લવઙ્ગા ન વારિરાશૌ પ્લવનં ક્ષમન્તે ॥ ૧૧૮॥

સઞ્ચિન્તયન્નિતિ કુશાસનસન્નિવિષ્ટો જ્યોતિસ્તદૈક્ષત વિદુરગમેવ કિઞ્ચિત્ ।
સંવ્યાપ્નુવજ્જગદિદં સુખશીતલં યત્સમ્પ્રાર્થનીયમનિશં મુનિદેવતાભિઃ ॥ ૧૧૯॥

આગચ્છદાત્માભિમુખં નિરીક્ષ્ય સર્વે તદુત્તસ્થુરુદારવીર્યાઃ ।
તતઃ પુમાકારમદૃશ્યતૈતન્મહાપ્રભામણ્ડલમધ્યવર્તિ ॥ ૧૨૦॥

મધ્યે પ્રભામણ્ડલમૈક્ષતાઞ્ચિતં શિવાકૃતિં સર્વતપોમયં પુનઃ ।
લોપાદિમુદ્રાસહિતં મહામુનિં પ્રાબોધિ કુમ્ભોદ્ભવમાદરાજનૈઃ ॥ ૧૨૧॥

અગસ્ત્યદૃશ્વા રઘુનન્દનસ્તતઃ સ ખેદમન્તઃકરણોત્થમત્યજત્ ।
પ્રાયો મહદ્દર્શનમેવ દેહિનાં ક્ષિણોતિ ખેદં રવિવન્મહાતમઃ ॥ ૧૨૨॥

સભાર્યમર્ધ્યાદિભિરર્ચયિત્વા રામસ્તદઙ્ઘ્રિં શિરસા નનામ ।
તૂષ્ણીં મુહૂર્તં વ્યસનાર્ણવસ્થો ધૃતિં સમાસ્થાય પુનર્બભાષે ॥ ૧૨૩॥

દૃષ્ટ્વા ભવન્તં પિતૃવત્પ્રમોદે યન્મામગા દુઃખમહાર્ણવસ્થમ્ ।
મન્યે મમાઽઽત્માનમવાપ્તકામં વંશો મહાન્મે તપનાત્પ્રવૃત્તઃ ॥ ૧૨૪॥

ન તત્ર માદૃગ્જનિતા ન જાતઃ પદચ્ચ્યુતોઽહં પ્રથમં સભાર્યઃ ।
સલક્ષ્મણોઽરણ્યમુપાગતશ્ચ મારીચમાયાનિહતાન્તરઙ્ગઃ ॥ ૧૨૫॥

તત્રાપિ ભાર્યામહૃત ચ્છલેન સ રાવણો રાક્ષસપુઙ્ગવો મે ।
સા ચાધુનાઽશોકવને સમાસ્તે કૃશા વિયોગાત્સ્વત એવ તન્વી ॥ ૧૨૬॥

તીર્ત્વા સમુદ્રં વિનિહત્ય દુષ્ટં બલેન સીતાં મહતા હરામિ ।
યથા તથોપાયમુદાહર ત્વં ન મે ત્વદન્યોઽસ્તિ હિતોપદેષ્ટા ॥ ૧૨૭॥

ઇતીરિતો વાચમુવાચ વિદ્વાન્મા રામ શોકસ્ય વશં ગતો ભૂઃ ।
વંશદ્વયે સન્તિ નૃપા મહાન્તઃ સમ્પાપ્ય દુઃખં પરિમુક્તદુઃખાઃ ॥ ૧૨૮॥

ત્વમગ્રણીર્દાશરથે ધનુર્ભૃતાં તવાનુજસ્યાપિ સમો ન લક્ષ્યતે ।
પ્લવઙ્ગમાનામધિપસ્ય કોટિશો મા મુઞ્ચ મા મુઞ્ચ વચો વિનાર્થમ્ ॥ ૧૨૯॥

સહાયસમ્પત્તિરિયં તવાસ્તિ હિતોપદેષ્ટાઽપ્યહમસ્મિ કશ્ચિત્ ।
વારાં નિધિઃ કિં કુરુતે તવાયં સ્મરાધુના ગોષ્પદમાત્રમેનમ્ ॥ ૧૩૦॥

પુરેવ ચાર્વબ્ધિમહં પિબામિ શુષ્કેઽત્ર તેન પ્રતિયાહિ લઙ્કામ્ ।
એવં મયા કીર્તિરુપાર્જિતા સ્યાદ્બદ્ધે તુ વાર્ધૌ તવ સાર્જિતા સ્યાત્ ॥ ૧૩૧॥

સેતું વાર્ધૌ બન્ધયિત્વા જહિ ત્વં દુષ્ટં ચૌર્યાદ્યેન સીતા હૃતાઽઽસીત્ ।
પ્રાપ્નોષિ ત્વં કીર્તિમાચન્દ્રતારં તેનાત્રાબ્ધિં બન્ધય ત્વં કપીન્દ્રૈઃ ॥ ૧૩૨॥

ઇત્થં યત્ર પ્રેરિતેઽગસ્ત્યવાચા સેતું રામો બન્ધયામાસ વાર્ધૌ ।
તુઙ્ગૈઃ શૃઙ્ગૈર્વાનરૈસ્તેન ગત્વા તં હત્વાઽઽજૌ જાનકીમાનિનાય ॥ ૧૩૩॥

તત્તાદૃક્ષે તત્ર તીર્થે સ ભિક્ષુઃ સ્નાત્વા ભક્ત્યા રામનાથં પ્રણમ્ય ।
તત્ર શ્રદ્ધોત્પત્તયે માનુષાણાં શિષ્યેભ્યસ્તદ્વૈભવં સમ્યગૂચે ॥ ૧૩૪॥

તન્માહાત્મ્યં વર્ણયન્તં મુનિં તં પપ્રચ્છૈનં કશ્ચિદેવં વિપશ્ચિત્ ।
રામેશાખ્યા કિંસમાસોપપન્ના પૃષ્ટસ્ત્રેધાઽવોચદેવં સમાસમ્ ॥ ૧૩૫॥

રઘૂદ્વહસ્તત્પુરુષં પરં જગૌ શિવો બહુવ્રીહિસમાસમૈરયત્ ।
રામેશ્વરે નામનિ કર્મધારયં પરં સમાહુઃ સ્મ સુરેશ્વરાદયઃ ॥ ૧૩૬॥

એવં નિશ્ચિત્યોદિતં તત્સમાસં શ્રુત્વા તત્રત્યો બુધો યોઽભ્યનન્દત્ ।
અમ્ભોજાઙ્ઘ્રિસ્તૈરથ સ્તૂયમાનઃ કશ્ચિત્કાલં તત્ર યોગીઽનૈષીત્ ॥ ૧૩૭॥

તસ્માદાર્યઃ પ્રસ્થિતોઽભૂત્ સશિષ્યસ્તીર્થસ્નાનોપાત્તચિત્તામલત્વઃ ।
પશ્યન્ દેશાન્માતુલીયં જગાહે ગેહં દગ્ધં તસ્ય પુસ્તેન સાર્ધમ્ ॥ ૧૩૮॥

શ્રુત્વા કિઞ્ચિત્ ખેદમાપેદિવાન્ સ મત્વા મત્વા ધૈર્યમાપેદિવાન્ સઃ ।
શ્રાવં શ્રાવં માતુલીયસ્ય તીવ્રં દાહં ગેહસ્યાનુકમ્પાં વ્યધત્ત ॥ ૧૩૯॥

વિશ્વસ્ય માં નિહિતવાનસિ પુસ્તભારં તં ચાદહદ્ભુતવહઃ પતિતઃ પ્રમાદાત્ ।
તાવાન્ન મે સદનદાહકૃતોઽનુતાપો યાવાંસ્તુ પુસ્તકવિનાશકૃતો મમ સ્યાત્ ॥ ૧૪૦॥

ઇત્થં બ્રુન્તં તમથો ન્યગાદીત્ પુસ્તં ગતં બુદ્ધિરવસ્થિતા મે ।
ઉક્ત્વા સમારબ્ધ પુનશ્ચ ટીકાં કર્તું સ ધીરો યતિવૃન્દવન્દ્યઃ ॥ ૧૪૧॥

દૃષ્ટ્વા બુદ્ધિં માતુલસ્તસ્ય ભૂયો ભીતઃ પ્રાસ્યદ્ભોજને તન્મનોઘ્નમ્ ।
કિઞ્ચિદ્દ્રવ્યં પૂર્વવન્નાક્ષમિષ્ટ ટીકાં કર્તું કેચિદેવં બ્રુવન્તિ ॥ ૧૪૨॥

અત્રાન્તરેઽન્યૈર્નિજવચ્ચરદ્ભિઃ સ્વૈસ્તીર્થયાત્રાં દયિતૈઃ સતીર્થૈઃ ।
અર્થાદુપેત્યાઽઽશ્રમતઃ કનિષ્ઠૈર્જ્ઞાતઃ સખેદૈઃ સ મુનિઃ સમૈક્ષિ ॥ ૧૪૩॥

દૃષ્ટ્વા પદ્માઙ્ઘ્રિં ક્રમાત્તે પ્રણેમુસ્તત્પાદામ્ભોજીયરેણૂન્ દધાનાઃ ।
અન્યોન્યં દ્રાગાદદુસ્તે દદુશ્ચાનેકાનેહોયોગજૈક્યાન્નમાંસિ ॥ ૧૪૪॥

વાણીનિર્જિતપન્નગેશ્વરગુરુપ્રાચેતસા ચેતસા

વિભ્રાણા ચરણં મુનેર્વિરચિતવ્યાપલ્લવં પલ્લવમ્ ।
ધુન્વન્તં પ્રભયા નિવારિતતમાશઙ્કાપદં કામદં
રેજેઽન્તેવસતાં સમષ્ટિરસુહૃત્તત્યાહિતાત્યાહિતા ॥ ૧૪૫॥

શુશ્રાવ સાઽન્તેવસતાં સમષ્ટિઃ સ્વદેશકીયાં સુખદાં સુવાર્તામ્ ।
અર્થાત્ સમીપાગતતઃ કુતશ્ચિદ્ દ્વિજેન્દ્રતઃ સેવિતસર્વતીર્થાત્ ॥ ૧૪૬॥

અથ ગુરુવરમનવેક્ષ્ય નિતાન્તં વ્યથિતહૃદો મુનિવર્યવિનેયાઃ ।
કથમપિ વિદિતતદીયસુવાર્તાઃ સમધિગતાઃ કિલ કેરલદેશાન્ ॥ ૧૪૭॥

અત્રાન્તરે યતિપતિઃ પ્રસુવોઽન્ત્યકૃત્યાં કૃત્વા સ્વધર્મપરિપાલનસક્તચિત્તઃ ।
આકાશલઙ્ઘિવરકેરમહીરુહેષુ શ્રીકેરલેષુ મુનિરાસ્ત ચરન્ વિરક્તઃ ॥ ૧૪૮॥

વિચરન્નથ કેરલેષુ વિષ્વઙ્ગનિજશિષ્યાગમનં નિરીક્ષ્ય મૌની ।
વિનયેન મહાસુરાલયેશં વિનયન્નસ્તુત નિસ્તુલાનુભાવઃ ॥ ૧૪૯॥

સદસત્ત્વવિમુક્તયા પ્રકૃત્યા ચિદચિદ્રૂપમિદં જગદ્વિચિત્રમ્ ।
કુરુષે જગદીશ લીલયા ત્વં પરિપૂર્ણસ્ય ન હિ પ્રયોજનેચ્છા ॥ ૧૫૦॥

રજસા સૃજસીશ સત્ત્વવૃત્તિસ્ત્રિજગદ્રક્ષસિ તામસઃ ક્ષિણોષિ ।
બહુધા પરિકીર્ત્યસે ચ સ ત્વં વિધિવૈકુણ્ઠશિવાભિધાભિરેકઃ ॥ ૧૫૧॥

વિવિધેષુ જલાશયેષુ સોઽયં સવિતેવ પ્રતિબિમ્બિતસ્વભાવઃ ।
બહુરૂપમિદં પ્રવિશ્ય વિશ્વં સ્વયમેકોઽપિ ભવાન્ વિભાત્યનેકઃ ॥ ૧૫૨॥

ઇતિ દેવમભિષ્ટુવન્ વિશિષ્ટસ્તુતિતોઽસૌ સુરસદ્મસન્નિવિષ્ટઃ ।
ચિરકાલવિયોગદીનચિત્તૈઃ શિરસા શિષ્યગણૈરથો વવન્દે ॥ ૧૫૩॥

ગુરુણા કુશલાનુયોગપૂર્વં સદયં શિષ્યગણેષુ સાન્ત્વિતેષુ ।
અતિદીનમનાઃ શનૈરવાદીદજહદ્વદ્વદિકં સ પદ્મપાદઃ ॥ ૧૫૪॥

ભગવન્નભિગમ્ય રઙ્ગનાથં પથિ પદ્માક્ષમહં નિવર્તમાનઃ ।
બહુધાવિહિતાનુનીતિનીતો બત પૂર્વાશ્રમમાતુલેન ગેહમ્ ॥ ૧૫૫॥

અહમસ્ય પુરો ભિદાવદેન્દોરપિ પૂર્વાશ્રમવાસનાનુબન્ધાત્ ।
અપઠં ભવદીયભાષ્યટીકામજયં ચાત્ર કૃતાનુયોગમેનમ્ ॥ ૧૫૬॥

દગ્ધમુદ્રમુખમુદ્રણમન્ત્રૈર્ધ્વસ્તતર્કગુરુકાપિલતન્ત્રૈઃ
વર્મિતો નિગમસારસુધાક્તૈર્માતુલં તમજયં તવ સૂક્તૈઃ ॥ ૧૫૭॥

ખડ્ગાખડ્ગિવિહારકલ્પિતરુજં કાણાદસેનામુખે

શસ્ત્રાશસ્ત્રિકૃતં શ્રમં ચ વિષમં પશ્યત્પદાનાં પદે ।
યષ્ટીયષ્ટિભવં ચ કાપિલબલે ખેદં મુને તાવકૈઃ
સૂક્તૈર્યૌક્તિકવંશમૌક્તિકમયૈર્નાઽઽપદ્યતે વર્મિતઃ ॥ ૧૫૮॥

અથ ગૂઢહૃદો યથાપુરં મામભિનન્ધાઽઽહિતસત્ક્રિયસ્ય તસ્ય ।
અધિસદ્મ નિધાય ભાષ્યટીકામહમસ્યાઽઽયમશઙ્કિતો નિશાયામ્ ॥ ૧૫૯॥

યુગપર્યયનૃત્યદુગ્રફાલજ્વલનજ્વાલકરાલકીલજાલઃ ।
દહનોઽધિનિશીથમસ્ય ધામ્ના બત ટીકામપિ ભસ્મસાદકાર્ષીત્ ॥ ૧૬૦॥

અદહત્સ્વગૃહં સ્વયં હતાશો વિમતગ્રન્થમસૌ વિદગ્ધુકામઃ ।
મતિમાન્દ્યકરં ગરં ચ ભૈક્ષે વ્યધિતાસ્યેતિ વિજૃમ્ભતે સ્મ વાર્તા ॥ ૧૬૧॥

અધુના ધિષણા યથાપુરં નો વિધુનાના વિશયં પ્રસાદમેતિ ।
વિષમા પુનરીદૃશી દશા નઃ કિમુ યુક્તા ભવદઙ્ઘ્રિકિઙ્કરાણામ્ ॥ ૧૬૨॥

ગુરુવર તવ યા ભાષ્યવરેણ્યે વ્યરચિ મયા લલિતા કિલ વૃત્તિઃ ।
નિરતિશયોજ્જ્વલયુક્તિયુતા સા પથિ કિલ હા વિનનાશ કૃશાનૌ ॥ ૧૬૩॥

પ્રયતેઽહં પુનરેવ યદા તાં પ્રવિધાતું બહુધાકૃતયત્નઃ ।
ન યથાપૂર્વમુપક્રમતે તાઃ પટુયુક્તીર્ભગવન્મમ બુદ્ધિઃ ॥ ૧૬૪॥

કૃપાપારાવારં તવ ચરણકોણાગ્રશરણં
ગતા દીના દુનાઃ કતિ કતિ ન સર્વેશ્વરપદમ્ ।
ગુરો મન્તુર્નન્તુઃ ક ઇવ મમ પાપાંશ ઇતિ ચે-
ન્મૃષા મા ભાષિષ્ઠાઃ પદકમલચિન્તાવધિરસૌ ॥ ૧૬૫॥

ઇતિ વાદિનમેનમાર્યપાદઃ કરુણાપૂરકરમ્ભિતાન્તરઙ્ગઃ ।
અમૃતાબ્ધિસખૈરપાસ્તમોહૈર્વચનૈઃ સાન્ત્વયતિ સ્મ વલ્ગુબન્ધૈઃ ॥ ૧૬૬॥

વિષમો બત કર્મણાં વિપાકો વિષમોહોપમદુર્નિવાર એષઃ ।
વિદિતઃ પ્રથમં મયાઽયમર્થઃ કથિતશ્ચાઙ્ગ સુરેશદેશિકાય ॥ ૧૬૭॥

પૂર્વં શ૿ઙ્ગક્ષ્માધરે મત્સમીપે પ્રેમ્ણા યાઽસૌ વાચિતા પઞ્ચપાદી ।
સા મે ચિત્તાન્નાપયાત્યદ્ય શોકો યાતાચ્છીઘ્રં તાં લિખેત્યાખ્યદાર્યઃ ॥ ૧૬૮॥

આશ્વાસ્યેત્થં જલજચરણં ભાષ્યકૃત્પઞ્ચપાદી-
માચખ્યૌ તાં કૃતિમુપહિતાં પૂર્વયૈવાઽઽનુપૂર્વ્યા ।
નૈતચ્ચિત્રં પરમપુરુષેઽવ્યાહતજ્ઞાનશક્તૌ

તસ્મિન્ મૃલે ત્રિભુવનગુરૌ સર્વવિદ્યામવૃત્તેઃ ॥ ૧૬૯॥

પ્રસભં સ વિલિખ્ય પઞ્ચપાદીં પરમાનન્દભરેણ પદ્મવાદઃ ।
ઉદતિષ્ઠદતિષ્ઠદભ્યરોદીત્ પુનરુદ્ગાયતિ તુ સ્મ નૃત્યતિ સ્મ ॥ ૧૭૦॥

કવિતાકુશલોઽથ કેરલક્ષ્માકમનઃ કશ્ચન રાજશેખરાખ્યઃ ।
મુનિવર્યમમું મુદં વિતેને નિજકૌટીરનિઘૃષ્ટપન્નખાગ્ર્યઃ ॥ ૧૭૧॥

પ્રથતે કિમુ નાટકત્રયી સેત્યમુના સંયમિના તતો નિયુક્તઃ ।
અયમુત્તરમાદદે પ્રમાદાદનલે સાઽઽહુતિતામુપાગતેતિ ॥ ૧૭૨॥

મુખતઃ પઠિતાં મુનીન્દુના તાં વિલિખન્નેષ વિસિષ્મિયેઽથ ભૂપઃ ।
વદ કિં કરવાણિ કિઙ્કરોઽહં વરદેતિ પ્રણમન્ વ્યજિજ્ઞપચ્ચ ॥ ૧૭૩॥

નૃપ કાલટિનામકાગ્રહારા દ્વિજકર્માનધિકારિણોઽદ્ય શપ્તાઃ ।
ભવતાઽપિ તથૈવ તે વિધેયા બત પાપા ઇતિ દેશિકોઽશિષત્તમ્ ॥ ૧૭૪॥

પદ્માઙ્ઘ્રૌ પ્રતિપદ્ય નષ્ટવિટતિં તુષ્ટે પુનઃ કેરલ-
ક્ષ્માપાલો યતિસાર્વભૌમસવિધં પ્રાપ્ય પ્રણમ્યાઞ્જસા ।
લબ્ધ્વા તસ્ય મુખાત્ સ્વનાટકવરાણ્યાનન્દપાથોનિધૌ
મજ્જંસ્તત્પદપદ્મયુગ્મમનિશં ધ્યાયન્ પ્રતસ્થે પુરીમ્ ॥ ૧૭૫॥

ઇતિ શ્રીમાધવીયે તત્તીર્થયાત્રાટનાર્થકઃ ।
સઙ્ક્ષેપશઙ્કરજયે સર્ગોઽજનિ ચતુર્દશઃ ॥ ૧૪॥

આદિતઃ લોકાઃ ૧૫૬૨ ।

# શઙ્કરદિગ્વિજયમ્

## ॥ ૧૫. પઞ્ચદશઃ સર્ગઃ આચાર્યકૃતદિગ્વિજયવર્ણનમ્ ॥

અથ પઞ્ચદશઃ સર્ગઃ ॥ ૧૫ ॥

અથ શિષ્યવરૈર્યુતઃ સહસ્રૈરનુયાતઃ સ સુધન્વના ચ રાજ્ઞા ।
કકુભો વિજિગીષુરેષ સર્વાઃ પ્રથમં સેતુમુદારધીઃ પ્રતસ્થે ॥ ૧ ॥

અભવત્ કિલ તસ્ય તત્ર શાક્તૈર્ગિરિજાર્ચાકપટાન્મધુપ્રસક્તૈઃ ।
નિકટસ્થવિતીર્ણભૂરિમોદસ્ફુટરિઙ્ખત્પટુયુક્તિમાન્ વિવાદઃ ॥ ૨ ॥

સ હિ યુક્તિભરૈર્વિધાય શાક્તાન્ પ્રતિવાગ્વ્યાહરણેઽપિ તાનશક્તાન્ ।
દ્વિજજાતિબહિષ્કૃતાનનાર્યાનકરોલ્લોકહિતાય કર્મસેતુમ્ ॥ ૩ ॥

અભિપૂજ્ય સ તત્ર રામનાથં સહ પાણ્ડ્યૈઃ સ્વવશે વિધાય ચોલાન્ ।
દ્રવિડાંશ્ચ તતો જગામ કાઞ્ચીં નગરીં હસ્તિગિરેર્નિતમ્બકાઞ્ચીમ્ ॥ ૪ ॥

સુરધામ સ તત્ર કારયિત્વા પરવિદ્યાચરણાનુસારિ ચિત્રમ્ ।
અપવાર્ય ચ તાન્ત્રિકાનતાનીદ્ભગવત્યાઃ શ્રુતિસમ્મતાં સપર્યામ્ ॥ ૫ ॥

નિજપાદસરોજસેવનાર્થૈ વિનયેન સ્વયમાગતાનથાઽઽન્ધ્રાન્ ।
અનુગૃહ્ય સ વેઙ્કટાચલેશં પ્રણિપત્યાઽઽપ વિદર્ભરાજધાનીમ્ ॥ ૬ ॥

અભિગમ્ય સ ભક્તિપૂર્વમસ્યાં કૃતપૂજઃ ક્રથકૈશિકેશ્વરેણ ।
નિજશિષ્યનિરસ્તદુષ્ટબુદ્ધીન્ વ્યદધાદ્ભૈરવતન્ત્રસાવલમ્બાન્ ॥ ૭ ॥

અભિવાદ્ય વિદર્ભરાડવાદીદથ કર્ણાટવસુન્ધરામિયાસુમ્ ।
ભગવન્ બહુભિઃ કપાલિજાલૈઃ સ હિ દેશો ભવતામગમ્યરૂપઃ ॥ ૮ ॥

ન હિ તે ભગવદ્યશઃ સહન્તે નિહિતેર્ષ્યાઃ શ્રુતિષુ બ્રવીમ્યતોઽહમ્ ।
અહિતે જગતાં સમુત્સહન્તે મહિતેષુ પ્રતિપક્ષતાં વહન્તે ॥ ૯ ॥

ઇતિ વાદિનિ ભૂમિપે સુધન્વા યતિરાજં નિજગાવધિજ્યધન્વા ।
મયિ તિષ્ઠતિ કિં ભયં પરેભ્યસ્તવ ભક્તે યતિનાથ પામરેભ્યઃ ॥ ૧૦ ॥

અથ તીર્થકરાગ્રણીઃ પ્રતસ્થે કિલ કાપાલિકજાલકં વિજેતુમ્ ।
નિશમય્ય તમાગતં સમાગાત્ક્રકચો નામ કપાલિદેશિકાગ્ર્યઃ ॥ ૧૧॥

પિતૃકાનનભસ્મનાઽનુલિપ્તઃ કરસમ્પ્રાપ્તકરોટિરાત્તશુલઃ ।
સહિતો બહુભિઃ સ્વતુલ્યવેષૈઃ સ ઇતિ સ્માઽઽહ મહામનાઃ સગર્વઃ ॥ ૧૨॥

ભસિતં ધૃતમિત્યદસ્તુ યુક્તં શુચિ સન્ત્યજ્ય શિરઃકપાલમેતત્ ।
વહથાશુચિ ખર્પરં કિમર્થં ન કથઙ્કારમુપાસ્યતે કપાલી ॥ ૧૩॥

નરશીર્ષકુશેશયૈરલબ્ધ્વા રુધિરાક્તૈર્મધુના ચ ભૈરવાર્ચામ્ ।
ઉમયા સમયા સરોરુહાક્ષ્યા કથમાશ્લિષ્ટવપુર્મુદં પ્રયાયાત્ ॥ ૧૪॥

ઇતિ જલ્પતિ ભૈરવાગમાનાં હૃદયં કાપુરુષેતિ તં વિનિન્દ્ય ।
નિરવાસયદાત્મવિત્સમાજાત્ પુરુષૈઃ સ્વૈરધિકારિભિઃ સુધન્વા ॥ ૧૫॥

ભ્રુકુટીકુટિલાનનશ્ચલોષ્ઠઃ સિતમુદ્યમ્ય પરશ્વધં સ મૂર્ખઃ ।
ભવતાં ન શિરાંસિ ચેદ્વિભિન્દ્યાં ક્રકચો નાહમિતિ બ્રુવન્નયાસીત્ ॥ ૧૬॥

રુષિતાનિ કપાલિનાં કુલાનિ પ્રલયામ્ભોધરભીકરારવાણિ ।
અમુના પ્રહિતાન્યતિપ્રસઙ્ખ્યાન્યભિયાતાનિ સમુદ્યતાયુધાનિ ॥ ૧૭॥

અથ વિપ્રકુલં ભયાકુલં તદ્રુતમાલોક્ય મહારથઃ સુધન્વા ।
કુપિતઃ કવચી રથી નિષઙ્ગી ધનુરાદાય યયૌ શરાન્ વિમુઞ્ચન્ ॥ ૧૮॥

અવનીભૃતિ યોધયત્યરીંસ્તાંસ્ત્વરયૈકત્ર તતોઽન્યતો નિયુક્તાઃ ।
ક્રકચેન વધાય ભૂસુરાણાં દ્રુતમાસેદુરુદાયુધાઃ સહસ્રમ્ ॥ ૧૯॥

અવલોક્ય કપાલિસઙ્ઘમારાચ્છમનાનીકનિકાશમાપતન્તમ્ ।
વ્યથિતાઃ પ્રતિપેદિરે શરણ્યં શરણં શઙ્કરયોગિનં દ્વિજેન્દ્રાઃ ॥ ૨૦॥

અસિતોમરપટ્ટિશત્રિશૂલૈઃ પ્રજિઘાંસૂન્ ભૃશમુજ્ઝિતાટ્ટહાસાન્ ।
યતિરાટ્ સ ચકાર ભસ્મસાત્તાન્નિજહુઙ્કારભુવાઽગ્નિના ક્ષણેન ॥ ૨૧॥

નૃપતિશ્ચ શરૈઃ સુવર્ણપુઙ્ખૈર્વિનિકૃત્તૈઃ પ્રતિપક્ષવક્ત્રપદ્મૈઃ ।
રણરઙ્ગભુવં સહસ્રસઙ્ઘૈઃ સમલઙ્કૃત્ય મુદાઽગમન્મુનીન્દ્રમ્ ॥ ૨૨॥

તદનુ ક્રકચો હતાન્ સ્વકીયાનરુજાંશ્ચ દ્વિજપુઙ્ગવાનુદીક્ષ્ય ।
અતિમાત્રવિદૂયમાનચેતા યતિરાજસ્ય સમીપમાપ ભૂયઃ ॥ ૨૩॥

કુમતાશ્રય પશ્ય મે પ્રભાવં ફલમાપ્સ્યસ્યધુનૈવ કર્મણોઽસ્ય ।

ઇતિ હસ્તતલે દધત્કપાલં ક્ષણમધ્યાયદસૌ નિમીલ્ય નેત્રે ॥ ૨૪॥

સુરયા પરિપૂરિતં કપાલં ઝટિતિ ધ્યાયતિ ભૈરવાગમજ્ઞે ।
સ નિપીય તદર્ધમર્ધમસ્યા નિદધાર સ્મરતિ સ્મ ભૈરવં ચ ॥ ૨૫॥

અથ મર્ત્યશિરઃ કપાલમાલી જ્વલનજ્વાલજટાછટસ્ત્રિશૂલી ।
વિકટપ્રકટાટ્ટહાસશાલી પુરતઃ પ્રાદુરભૂન્મહાકપાલી ॥ ૨૬॥

તવ ભક્તજનદ્રુહં દૃશા સઞ્જહિ દેવેતિ કપાલિના નિયુક્તઃ ।
કથમાત્મનિ મેઽપરાધ્યસીતિ ક્રકચસ્યૈવ શિરો જહાર રુષ્ટઃ ॥ ૨૭॥

યમિનામૃષભેણ સંસ્તુતઃ સન્નયમન્તર્ધિમવાપ દેવવર્યઃ ।
અખિલેઽપિ ખિલે કુલે ખલાનામમુમાનર્ચુરલં દ્વિજાઃ પ્રહૃષ્ટાઃ ॥ ૨૮॥

યતિરાડથ તેષુ તેષુ દેશેષ્વિતિ પાષણ્ડપરાન્ દ્વિજાન્ વિમથ્નન્ ।
અપરાન્તમહાર્ણવોપકણ્ઠં પ્રતિપેદે પ્રતિવાદિદર્પહન્તા ॥ ૨૯॥

વિલલાસ ચલત્તરઙ્ગહસ્તૈર્નદરાજોઽભિનયન્નિગૂઢમર્થમ્ ।
અવધીરિતન્દુન્દુભિસ્વનેન પ્રતિવાદીવ મહાન્ મહારવેણ ॥ ૩૦॥

બહુલભ્રમવાનયં જડાત્મા સુમનોભિર્મથિતશ્ચ પૂર્વમેવ ।
ઇતિ સિન્ધુમુપેક્ષ્ય સ ક્ષમાવાનિવ ગોકર્ણમુદારધીઃ પ્રતસ્થે ॥ ૩૧॥

અવગાહ્ય સરિત્પતિં સ તત્ર પ્રિયમાસાદ્ય તુષારશૈલપુત્ર્યાઃ ।
સ્તવસત્તમમદ્ભુતાર્થચિત્રં રચયામાસ ભુજઙ્ગવૃત્તરમ્યમ્ ॥ ૩૨॥

તદનન્તરમાગમાન્તવિદ્યાં પ્રણતેભ્યઃ પ્રતિપાદયન્તમેનમ્ ।
હરદત્તસમાહ્વયોઽધિગમ્ય સ્વગુરું સઙ્ગિરતે સ્મ નીલકણ્ઠમ્ ॥ ૩૩॥

ભગવન્નિહ શઙ્કરાભિધાનો યતિરાગત્ય જિગીષુરાર્યપાદાન્ ।
સ્વવશીકૃતભટ્ટમણ્ડનાદિઃ સહ શિષ્યૈર્ગિરિશાલયે સમાસ્તે ॥ ૩૪॥

ઇતિ તદ્વચનં નિશમ્ય સમ્યગ્ગ્રથિતાનેકનિબન્ધરત્નહારઃ ।
શિવતત્પરસૂત્રભાષ્યકર્તા પ્રહસન્ વાચમુવાચ શૈવવર્યઃ ॥ ૩૫॥

સરિતાં પતિમેષ શોષયેદ્વા સવિતારં વિયતઃ પ્રપાતયેદ્વા ।
પટવત્સુરવર્ત્મ વેષ્ટયેદ્વા વિજયે નૈવ તથાઽપિ મે સમર્થઃ ॥ ૩૬॥

પરપક્ષતમિસ્રચઞ્ચદર્કૈર્મમ તર્કૈર્બહુધા વિશીર્યમાણમ્ ।
અધુનૈવ મતં નિજં સ પશ્યત્વિતિ જલ્પન્નિરગાદનલ્પકોપઃ ॥ ૩૭॥

સિતભૂતિતરઙ્ગિતાખિલાઙ્ગૈઃ સ્ફુટરુદ્રાક્ષકલાપકમ્રકણ્ઠૈઃ ।
પરિવીતમધીતશૈવશાસ્ત્રૈર્મુનિરાયાન્તમમું દદર્શ શિષ્યૈઃ ॥ ૩૮॥

અધિગત્ય મહર્ષિસન્નિકર્ષં કવિરાતિષ્ઠિપદાત્મપક્ષમેષઃ ।
શુકતાતકૃતાત્મશાસ્ત્રતઃ પ્રાક્કપિલાચાર્ય ઇવાઽઽત્મશાસ્ત્રમદ્ધા ॥ ૩૯॥

ભગવન્ ક્ષણમાત્રમીક્ષ્યતાં તત્પ્રથમં તુ સ્ફુરદુક્તિપાટવં મે ।
ઇતિ દેશિકપુઙ્ગવં નિવાર્ય વ્યવદત્તેન સુરેશ્વરઃ સુધીશઃ ॥ ૪૦॥

પરપક્ષબિસાવલીમરાલૈરવચનૈસ્તસ્ય મતં ચખણ્ડ દણ્ડી ।
અથ નીલગલઃ સ્વપક્ષરક્ષાં જહદદ્વૈતમપાકરિષ્ણુરૂચે ॥ ૪૧॥

સુમતે તબ કૌશલં વિજાને સ્વયમેવૈષ મુનિઃ પ્રતિબ્રવીતુ ।
ઇતિ તં વિનિવર્ત્ય નીલકણ્ઠો યતિકણ્ઠીરવસમ્મુખસ્તદાઽઽસીત્ ॥ ૪૨॥

પ્રશમિંસ્તદસીતિ યસ્ત્રયીકૈઃ કથિતોઽર્થઃ સ ન યુજ્યતે ત્વદિષ્ટઃ ।
અભિદા તિમિરપ્રકાશયોઃ કિં ઘટતે હન્ત વિરુદ્ધધર્મવત્વાત્ ॥ ૪૩॥

રવિતત્પ્રતિબિમ્બયોરિવાભિદ્ઘટતામિત્યપિ તત્ત્વતો ન વાચ્યમ્ ।
મુકુરે પ્રતિબિમ્બિતસ્ય મિથ્યાત્વગતેર્યોમશિવાદિદેશિકોક્ત્યા ॥ ૪૪॥

મુકુરસ્થમુખસ્ય બિમ્બવક્ત્રાદ્ભિદયા પાર્શ્વગલોકલોકનેન ।
પ્રતિબિમ્બિતમાનનં મૃષા સ્યાદિતિ ભાવત્કમતાનુગોક્તિકા ચ ॥ ૪૫॥

ન ચ માયિકજીવ નિષ્ઠમૌઢ્યેશ્વરસાર્વજ્ઞવિરુદ્ધધર્મબાધાત્ ।
ઉભયોરપિ ચિત્સ્વરૂપતાયા અવિશેષાદભિદૈવ વાસ્તવીતિ ॥ ૪૬॥

ન હિ માનશતૈઃ સ્થિતસ્ય બાધાઽપરથા દત્તજલાઞ્જલિર્ભિદા સ્યાત્ ।
વિપરીતહયત્વગોત્વબાધાદ્ધયપશ્વોર્નિજરૂપકૈક્યયુક્ત્યા ॥ ૪૭॥

યદિ માનગતસ્ય હાનમિષ્ટં ન ભવેત્તર્હિ ન ચેશ્વરોઽહમસ્મિ ।
ઇતિ માનગતસ્ય જીવસર્વેશ્વરભેદસ્ય ન હાનમપ્યભીષ્ટમ્ ॥ ૪૮॥

ઇતિ યુક્તિશતૈઃ સ નીલકણ્ઠઃ કવિરક્ષોભયદદ્વિતીયપક્ષમ્ ।
નિગમાન્તવચઃપ્રકાશ્યમાનં કલભઃ પદ્મવનં યથા પ્રફુલ્લમ્ ॥ ૪૯॥

અથ નીલગલોક્તદોષજાલો ભગવાનેવમવોચદસ્તુ કામમ્ ।
શ ૃણુ તત્ત્વમસીતિ સમ્પ્રદાય શ્રુતિવાક્યસ્ય પરાવરેઽભિસન્ધિમ્ ॥ ૫૦॥

નનુ વાચ્યગતા વિરુદ્ધતાધીરિહ સોઽસાવિતિવદ્વિરોધહાને ।
અવિરોધિ તુ વાચ્યમાદદૈક્યં પદયુગ્મં સ્ફુટમાહ કો વિરોધઃ ॥ ૫૧॥

યદિહોક્તમતિપ્રસઞ્જનં ભો ન ભવેન્નો હિ ગવાશ્વયોઃ પ્રમાણમ્ ।
અભિદાઘટકં તયોર્યતઃ સ્યાદુભયોર્લક્ષણયાઽભિદાનુભૂતિઃ ॥ ૫૨॥

નનુ મૌઢ્યસમસ્તવિત્ત્વધર્માન્વિતજીવેશ્વરરૂપતોઽતિરિક્તમ્ ।
ઉભયોઃ પરિનિષ્ઠિતં સ્વરૂપં બત નાસ્ત્યેવ યતોઽત્ર લક્ષણા સ્યાત્ ॥ ૫૩॥

ઇતિ ચેન્ન સમીક્ષ્યમાણજીવેશ્વરરૂપસ્ય ચ કલ્પિતત્વયુક્ત્યા ।
તદધિષ્ઠિતસત્યવસ્તુનોઽદ્ધા નિયમેનૈવ સદાઽભ્યુપેયતાયાઃ ॥ ૫૪॥

ભવતાઽપિ તથા હિ દૃશ્યદેહાદ્યહમન્તસ્ય જડત્વમભ્યુપેયમ્ ।
પરિશિષ્ટમુપેયમેકરૂપં નનુ કિઞ્ચિદ્ધિ તદેવ તસ્ય રૂપમ્ ॥ ૫૫॥

જગતોઽસત એવમેવ યુક્ત્યા ત્વનિરૂપ્યત્વત એત્ર કલ્પિતત્વાત્ ।
તદધિષ્ઠિત ભૂતરૂપમેષ્યં નનુ કિઞ્ચિદ્ધિ તદીશ્વરસ્ય સત્યમ્ ॥ ૫૬॥

તદિહ શ્રુતિગોભયસ્વરૂપે નિરૂપાધૌ ન હિ મૌઠ્યસર્વવિત્ત્વે ।
ન જપાકુસુમાત્તલોહિતિમ્નઃ સ્ફટિકે સ્યાન્નિરુપાધિકે પ્રસક્તિઃ ॥ ૫૭॥

અપિ ભેદધિયો યથાર્થતાયાં ન ભયં ભેદદૃશઃ શ્રુતિર્બ્રવીતુ ।
વિપરીતદૃશો હ્યનર્થયોગો ન ભિદાધીવિપરીતધીર્યતઃ સ્યાત્ ॥ ૫૮॥

અભિદા શ્રુતિગાઽપ્યતાત્ત્વિકી ચેત્પુરુષાર્થશ્રવણં ન તદ્ગતૌ સ્યાત્ ।
અશિવોઽહમિતિ ભ્રમસ્ય શાસ્ત્રાદ્વિધુમાનત્વગતેરિવાસ્તિ બાધઃ ॥ ૫૯॥

તદબાધિતકલ્પનાક્ષતિર્નો શ્રુતિસિદ્ધાત્મપરૈક્યબુદ્ધિબાધઃ ।
નિગમાત્ પ્રબલં વિલોક્યતે માકરણં યેન તદીરિતસ્ય બાધઃ ॥ ૬૦॥

ઋષિભિર્બહુધા પરાત્મતત્વં પુરુષાર્થસ્ય ચ તત્ત્વમપ્યથોક્તમ્ ।
તદપાસ્ય નિરૂપિતપ્રકારો ભવતાઽસૌ કથમેક એવ ધાર્યઃ ॥ ૬૧॥

પ્રબલશ્રુતિમાનતો વિરોધે બલહીનસ્મૃતિવાચ એવ મેયાઃ ।
ઇતિ નીતિબલાત્રયીવિરુદ્ધં ન ઋષીણાં વચનં પ્રમાત્વમીયાત્ ॥ ૬૨॥

("વિરોધેત્વનપેક્ષં સ્યાદસતિ હ્યનુમાનમ્" ઇતિ જૈમિનીયસૂત્રમ્ ।)
નનુ યુક્તિયુતં મહર્ષિવાક્યં શ્રુતિવદ્ગ્રાહ્યતમં પરં તથા હિ ।
પ્રતિદેહમસૌ વિભિન્ન આત્મા સુખદુઃખાદિવિચિત્રતાવલોકાત્ ॥ ૬૩॥

યદિ ચાઽઽત્મન એકતા તદાનીમતિદુઃખી યુવરાજસૌખ્યમીયાત્ ।
અમુકઃ સસુખોઽમુકસ્તુ દુઃખીત્યનુભૂતિર્ન ભવેત્તયોરભેદાત્ ॥ ૬૪॥

અયમેવ વિદન્વિતશ્ચ કર્તા ન હિ કર્તૃત્વમચેતનસ્ય દૃષ્ટમ્ ।
અત એવ ભુજેર્ભવિત્સ કર્તા પરભોક્તૃત્વમતિપ્રસઙ્ગદુષ્ટમ્ ॥ ૬૫ ॥

પુરુષાર્થ ઇહૈષ દુઃખનાશઃ સકલસ્યાપિ સુખસ્ય દુઃખયુક્ત્વાત્ ।
અતિહેયતયા પુમર્થતા નો વિષપૃક્તાન્નવદિત્યભેદ્યયુક્તેઃ ॥ ૬૬ ॥

ઇતિ ચેન્ન સુખાદિચિત્રતાયા મનસો ધર્મતયાઽઽત્મભેદકત્વમ્ ।
ન કથઞ્ચન યુજ્યતે પુનઃ સા ઘટયેત્પ્રત્યુત માનસીયભેદમ્ ॥ ૬૭ ॥

ચિતિયોગવિશેષ એવ દેહે કૃતિમત્તાઘટકોઽપ્યચેતને સ્યાત્ ।
તદભાવત એવ કર્તૃતા સ્યાન્ન વૃણાદેરિતિ કલ્પનં વરીયઃ ॥ ૬૮ ॥

વિષયોત્થસુખસ્ય દુઃખયુક્ત્વેઽપ્યલયં બ્રહ્મસુખં ન દુઃખયુક્તમ્ ।
પુરુષાર્થતયા તદેવ ગમ્યં ન પુનસ્તુચ્છકદુઃખનાશમાત્રમ્ ॥ ૬૯ ॥

ઇતિ યુક્તિશતોપબૃંહિતાર્થૈર્વચનૈઃ શ્રુત્યવરોધમોવિદલ્લૈઃ ।
યતિરાત્મમતં પ્રસાધ્ય શૈવં પરકૃદ્દર્શનદારુણૈરજૈપીત્ ॥ ૭૦ ॥

વિજિતો યતિભૂભૂતા સ શૈવઃ સહ ગર્વેણ વિસૃજ્ય ચ સ્વભાષ્યમ્ ।
શરણં પ્રતિપેદિવાન્ મહર્ષિ હરદત્તમમુખૈઃ સહાઽઽત્મ શિષ્યૈઃ ॥ ૭૧ ॥

યમિનામૃષભેણ નીલકણ્ઠં જિતમાકર્ણ્ય મનીષિધુર્યવર્યમ્ ।
સહસોદયનાદયઃ કવીન્દ્રાઃ પરમદ્વૈતમુપશ્ચકમ્પિરે સ્મ ॥ ૭૨ ॥

વિષયેષુ વિતત્ય નૈજભાષ્યાણ્યથ સૌરાષ્ટ્રમુખેષુ તત્ર તત્ર ।
બહુધા વિબુધૈઃ પ્રશસ્યમાનો ભગવાન્ દ્વારવતીં પુરીં વિવેશ ॥ ૭૩ ॥

ભુજયોરતિતપ્તશઙ્ખચક્રાકૃતિલોહાહતસમ્ભૃતવ્રણાઙ્કાઃ ।
શરદણ્ડસહોદરોર્ધ્વપુણ્ડ્રાસ્તુલસીપર્ણસનાથકર્ણદેશાઃ ॥ ૭૪ ॥

શતશઃ સમવેત્ય પાઞ્ચરાત્રાસ્ત્વમૃતં પઞ્ચભિદાવિદાં વદન્તઃ ।
મુનિશિષ્યવરૈરતિપ્રગલ્ભૈર્મૃગરાજૈરિવ કુઞ્જરાઃ પ્રભગ્નાઃ ॥ ૭૫ ॥

ઇતિ વૈષ્ણવશૈવશાક્તસૌરપ્રમુખાનાત્મવશંવદાન્વિધાય ।
અતિવેલવચોઝરીનિરસ્તપ્રતિવાદ્યુજ્જયનીં પુરીમયાસીત્ ॥ ૭૬ ॥

સપદિ પ્રતિનાદિતઃ પયોદસ્વનશઙ્કાકુલગેહકેકિજાલૈઃ ।
શશભૃન્મુકુટાર્હણામૃદઙ્ગધ્વનિરશ્રૂયત તત્ર મૂર્છિતાશઃ ॥ ૭૭ ॥

મકરધ્વજવિદ્વિડાપ્તિવિદ્વાગ્શ્રમહૃત્પુષ્પસુગન્ધવન્મરુદ્ભિઃ
અગરૂદ્ભવધૂપધૂપિતાશં સ મહાકાલનિવેશનં વિવેશ ॥ ૭૮ ॥

ભગવાનભિવન્દ્ય ચન્દ્રમૌલિં મુનિવૃન્દૈરભિવન્દ્યપાદપદ્મઃ
શ્રમહારિણિ મણ્ડપે મનોજ્ઞે સ વિશશ્રામ વિસૃત્વરપ્રભાવઃ ॥ ૭૯॥

કવયે કથયાસ્મદીયવાર્તામિહ સૌમ્યેતિ સ ભટ્ટભાસ્કરાય ।
વિસસર્જ વશવદાગ્રગણ્યં મુનિરભ્યર્ણગતં સનન્દનાર્યમ્ ॥ ૮૦॥

અભિરૂપકુલાવતંસભૂતં બહુધાવ્યાકૃતસર્વવેદરાશિમ્ ।
તમયત્નનિરસ્તદુઃસપત્નં પ્રતિપદ્યેત્થમુવાચ વાવદૂકઃ ॥ ૮૧॥

જયતિ સ્મ દિગન્તગીતકીર્તિર્ભગવાચ્શઙ્કરયોગિચક્રવર્તી
પ્રથયન્ પરમાદ્વિતીયતત્ત્વં શમયંસ્તત્પરિપન્થિવાદિદર્પમ્ ॥ ૮૨॥

સ જગાદ બુધાગ્રણીર્ભવન્તં કુમતોત્પ્રેક્ષિતસૂત્રવૃત્તિજાલમ્ ।
અભિભૂય વયં ત્રયીશિખાનાં સમવાદિષ્મ પરાવરેઽભિસન્ધિમ્ ॥ ૮૩॥

તદિદં પરિગૃહ્યતાં મનીષિન્ મનસાઽઽલોચ્ય નિરસ્ય દુર્મતં સ્વમ્ ।
અથવાઽસ્મદુદગ્રતર્કવજ્રપ્રતિઘાતાત્ પરિરક્ષ્યતાં સ્વપક્ષઃ ॥ ૮૪॥

ઇતિ તામવહેલપૂર્વવર્ણાં ગિરમાકર્ણ્ય તદા સ લબ્ધવર્ણઃ ।
યશસાં નિધિરીષદાત્તરોષસ્તમુવાચ પ્રહસન્ યતીન્દ્રશિષ્યમ્ ॥ ૮૫॥

ધ્રુવમેષ ન શુશ્રૂવાનુદન્તં મમ દુર્વાદિવચસ્તતીર્નુદન્તમ્ ।
પરકીર્તિબિસાઙ્કુરાનદન્તં વિદુષાં મૂર્ધસુ નાનટત્પદં તમ્ ॥ ૮૬॥

મમ વલ્ગતિ સૂક્તિગુમ્ફવૃન્દે કણભુગ્જલ્પિતમલ્પતામુપૈતિ ।
કપિલસ્ય પલાયતે પ્રલાપઃ સુધિયાં કૈવ કથાઽધુનાતનાનામ્ ॥ ૮૭॥

ઇતિ વાદિનમબ્રવીત્ સનન્દઃ કુશલોઽથૈનમવિજ્ઞ માઽવમંસ્થાઃ ।
ન હિ દારિતભૂધરોઽપિ ટઙ્કઃ પ્રભવેદ્વજ્રમણિપ્રભેદનાય ॥ ૮૮॥

સ તમેવમુદીર્ય તીર્થકીર્તેરુપકણ્ઠં પ્રતિપદ્ય સદ્વિદગ્ર્યઃ ।
સકલં તદવોચદાનુપૂર્વ્યા સ મહાત્માઽપિ યતીશમાસસાદ ॥ ૮૯॥

અથ ભાસ્કરમસ્કરિપ્રવીરૌ બહુધાક્ષેપસમર્થનપ્રવીણૌ ।
બહુભિર્વચનૈરુદારવૃત્તૈર્વ્યદધાતાં વિજયૈષિણૌ વિવાદમ્ ॥ ૯૦॥

અનયોરતિચિત્રશબ્દશય્યાં દધતોર્દુર્નયભેદશક્તયુક્તયોઃ ।
પટુવાદમૃધેઽન્તરં તટસ્થાઃ શ્રુતવન્તોઽપિ ન કિઞ્ચનાન્વવિન્દન્ ॥ ૯૧॥

અથ તસ્ય યતિઃ સમીક્ષ્ય દાક્ષ્યં નિજપક્ષાબ્જશરજ્જડાબ્જભૂતમ્ ।

બહુધાઽઽક્ષિ પદસ્ય પક્ષમાર્યો વિબુધાનાં પુરતોઽપ્રભાતકક્ષ્યમ્ ॥ ૯૨॥

અથ ભાસ્કરવિત્સ્વપક્ષગુપ્ત્યૈ વિધુતો વાગ્મિધરઃ પ્રગલ્ભયુક્ત્યા ।
શ્રુતિશીર્ષવચઃપ્રકાશ્યમેવં કવિરદ્વૈતમપાકરિષ્ણુરૂચે ॥ ૯૩॥

પ્રશમિંસ્ત્વદુદીરિતં ન યુક્તં પ્રકૃતિર્જીવપરાત્મભેદિકેતિ ।
ન ભિનત્તિ હિ જીવગેશગા વોભયભાવસ્ય તદુત્તરોદ્ભવત્વાત્ ॥ ૯૪॥

મુનિરેવમિહોત્તરં બભાષે મુકુરો વા પ્રતિબિમ્બબિમ્બભેદી ।
કથમીરય વક્ત્રમાત્રગશ્ચેચ્ચિતિમાત્રાશ્રિદિયં તથેતિ તુલ્યમ્ ॥ ૯૫॥

ચિતિમાત્રગપ્રકૃત્યુપાધેર્જહતો બિમ્બપરાત્મપક્ષપાતમ્ ।
પ્રતિબિમ્બિતજીવપક્ષપાતો મુકુરસ્યેવ વિરુધ્યતે ન જાતુ ॥ ૯૬॥

અવિકારિનિરસ્તસઙ્ગબોધૈકરસાત્માશ્રયતા ન યુજ્યતેઽસ્યાઃ ।
અત એવ વિશિષ્ટસંશ્રિતત્વં પ્રકૃતેઃ સ્યાદિતિ નાપિ શઙ્કનીયમ્ ॥ ૯૭॥

ન હિ માનકથા વિશિષ્ટગત્વે ભવદાપાદિત ઈક્ષતે તથા હિ ।
અહમજ્ઞ ઇતિ પ્રતીતિરેષા ન હિ માનત્વમિહાશ્નુતે તથા ચેત્ ॥ ૯૮॥

અનુભવ્યહમિત્યપિ પ્રતીતેરનુભૂતેશ્ચ વિશિષ્ટનિષ્ઠતા સ્યાત્ ।
અજડાનુભવસ્ય નો જડાન્તઃકરણસ્થત્વમિતીષ્ટતા ન તસ્યાઃ ॥ ૯૯॥

નનુ દાહકતા યથાગ્નિયોગાદધિકૂટં વ્યપદિશ્યતે તથૈવ ।
અનુભૂતિમદાત્મયોગતોઽન્તઃકરણે સા વ્યપદિશ્યતેઽનુભૂતિઃ ॥ ૧૦૦॥

ઇતિ ચેન્મૈવમિહાપિ તસ્ય માયાશ્રયચિન્માત્રયુતે તથોપચારઃ ।
ન પુનસ્તદુપાધિયોગતોઽન્તઃકરણસ્યેતિ સમાઽન્યથાગતિર્હિ ॥ ૧૦૧॥

ન ચ તત્ર હિ બાધકસ્ય સત્વાદિયમસ્તુ પ્રકૃતેર્ન સાઽસ્ત્યબાધાત્ ।
ઇતિ વાચ્યમિહાપિ તજ્જચિત્તે તદુપાશ્રિત્યયુતેશ્ચ બાધકત્વાત્ ॥ ૧૦૨॥

અધિસુપ્ત્યપિ ચિત્તવર્તિ તત્સ્યાયદિ ચાજ્ઞાનમિદં હૃદાશ્રિતં સ્યાત્ ।
તદિહાસ્તિ ન માનમુક્તરીત્યા પ્રકૃતેર્દૃશ્યવિશિષ્ટનિષ્ઠતાયામ્ ॥ ૧૦૩॥

નનુ ન પ્રતિબન્ધિકૈવ સુપ્તાવિતિ સા દૂરત એવ ચિદ્ગતેતિ ।
પ્રતિબન્ધકશુન્યતા તુ સુપ્તેઃ પરમાત્મૈક્યગતઃ સતેતિ વાક્યાત્ ॥ ૧૦૪॥

ન ચ તત્ર ચ તત્સ્થિતિપ્રતીતિઃ સતિ સમ્પદ્ય વિદુર્ન હીતિ વાક્યાત્ ।
શ્રુતિગીસ્તદધિક્ષિપત્યભાવપ્રતિપત્તેર્ન ચ નિહ્નવોઽત્ર નેતિ ॥ ૧૦૫॥

કિમુ નિત્યમનિત્યમેવ ચૈતત્પ્રથમો નેહ સમસ્તિ યુક્ત્યભાવાત્ ।
અનિવર્તકસત્ત્વતોઽસ્ય નાન્ત્યો ન હિ ભિન્ધ્યાદવિરોધિ ચિત્પ્રકાશઃ ॥ ૧૦૬॥

ન ચ તચ્છમયેજ્જડપ્રકાશોઽપ્યવિરોધાત્ સુતરાં જડત્વતોઽસ્ય ।
તદિહાપ્રતિબન્ધકત્વમસ્ય પ્રભવેત્ કિન્ત્વિહ તદ્ભ્રમાગ્રહાદિ ॥ ૧૦૭॥

ઇતિ ચેદિદમીરય ભ્રમઃ કો મનુજોઽહં ત્વિતિ શેમુષીતિ ચેન્ન ।
અતિવિસ્મૃતિશીલતા તવાહો ગદિતુઃ સર્વપદાર્થસઙ્કરસ્ય ॥ ૧૦૮॥

પ્રમિતિત્વમુપાશ્રયન્ પ્રતીતેરમુકઃ ખણ્ડ ઇતિ સ્વાશાસ્ત્રસિદ્ધાત્ ।
ભિદભિદ્દ્વયગોત્તરત્વહેતોર્ધિયમેતાં તુ કિમિત્યુપેક્ષસે ત્વમ્ ॥ ૧૦૯॥

અનુમાનમિદં તથા ચ સિદ્ધં વિપ્રતા ધીઃ પ્રમિતિર્ભિદાભિદત્વાત્ ।
ઇહ ચારુ નિદર્શનં ભવેત્ સા તવ ખણ્ડોઽયમિતિ પ્રતીતિરેષા ॥ ૧૧૦॥

નનુ સંહનનાત્મધીઃ પ્રમાણં ન ભવત્યેવ નિષિદ્ધ્યમાનગત્વાત્ ।
ઇદમિતિ પ્રતિપન્નરૂપ્યધીવત્પ્રબલા સત્પ્રતિપક્ષતેતિ ચેન્ન ॥ ૧૧૯॥

વ્યભિચારયુતત્વતોઽસ્ય ખણ્ડઃ પશુરિત્યત્ર તદન્યધીસ્થમુણ્ડે ।
ઇતરત્ર નિષિધ્યમાનખણ્ડોલ્લિખિતત્વેન નિરુક્તહેતુમત્ત્વાત્ ॥ ૧૧૨॥

નનુ હેતુરયં વિવક્ષ્યતેઽત્ર પ્રતિપન્નોપધિકે નિષેધગત્વમ્ ।
ઇતિ ચેન્ન વિવક્ષિતસ્ય હેતોર્વ્યભિચારાત્ પુનરપ્યમુત્ર ચૈવ ॥ ૧૧૩॥

નનુ ગોત્વ ઉપાધિકે ત્વમુષ્ય પ્રતિપન્નસ્ય હિ તત્ર નો નિષેધઃ ।
અપિ તુ પ્રથમાનમુણ્ડ ઇત્યત્ર તથા ચ વ્યભિચારિતા ન હેતોઃ ॥ ૧૧૪॥

ઇતિ ચેન્ન વિકલ્પનાસહત્વાત્ કિમુ ખણ્ડસ્ય તુ કેવલે નિષેધઃ ।
ઉત ગોત્વસમન્વિતે સ મુણ્ડે પ્રથમો નો ઘટતે પ્રસક્ત્યભાવાત્ ॥ ૧૧૫॥

ન હિ જાત્વપિ ખણ્ડકે પ્રસક્તઃ પરમુણ્ડસ્ત્વિતિ સમ્પ્રસક્ત્યભાવઃ ।
ચરમોઽપિ ન ગોત્વયુક્તમુણ્ડે ખલુ ખણ્ડસ્ય નિષેધકાલ એવ ॥ ૧૧૬॥

સ્વવિશેષણભૂતગોત્વ એવ સ્ફુટમેતસ્ય નિષેધનં શ્રુતં સ્યાત્ ।
તદિહોદિતહેતુસત્ત્વતોઽસ્ય વ્યભિચારો દૃઢવજ્રલેપ એવ ॥ ૧૧૭॥

નનુ ભાતિતરામુપાધિરત્રાદલદેતદ્વ્યવહર્તૃતેતિ ચેન્ન ।
અહમોઽનુભવેન સાધનવ્યાપકભાવાદવગત્યનન્તરં ચ ॥ ૧૧૮॥

નનુ તદ્વ્યવહારસઞ્છિદાયા ઇહ તત્કેન કમિત્યનેન મુક્તૌ ।
શ્રુતિવાક્યગતેન સમ્પ્રતીતેર્વ્યવહર્તુર્ન કથં છિદેતિ ચેન્ન ॥ ૧૧૯॥

તદિદં ઘટતે મતેઽસ્મદીયે તદબોધોલ્લસિતત્વતોઽખિલસ્ય ।
તદબોધલયે લયોપપત્તેર્જગતઃ સત્યતયા છિદા ન તે સ્યાત્ ॥ ૧૨૦॥

નનુ પઞ્ચસુ તુ સ્થલેષુ ભેદો હ્યભિદા નો તુ શરીરદેહિનોસ્તે ।
પ્રથિતસ્થલપઞ્ચકેતરત્વાત્ ફલિતા હ્યત્ર તથા ચ હેત્વસિદ્ધિઃ ॥ ૧૨૧॥

ઇતિ ચેન્ન વિકલ્પનાસહત્વાન્મિલિતાનાં ભિદભેદતન્ત્રતા કિમ્ ।
ઉત વા પૃથગેવ તત્ર નાઽઽદ્યો મિલિતાઃ પઞ્ચ ન હિ ક્વચિદ્યતઃ સ્યુઃ ॥

ચરમોઽપિ ન યુજ્યતે તદાઽઙ્ગાઙ્ગિકભાવસ્ય ચ તન્ત્રતા ન કિં સ્યાત્ ।
ન ચ યોજકગૌરવં ચ દોષઃ પ્રકૃતે તસ્પ તવાપિ સમ્મતત્વાત્ ॥ ૧૨૩॥

અપિ ચાન્યતમસ્ય જાતિતદ્વત્પ્રભૃતીનાં ઘટકત્વ આગ્રહશ્ચેત્ ।
અપિ સોઽત્ર ન દુર્લભચિદાત્માઙ્ગકયોઃ કારણકાર્યભાવભાવાત્ ॥ ૧૨૪॥

ન ચ વાચ્યમિદં પરાત્મજત્વાત્સકલસ્યાપિ ન જીવકાર્યતેતિ ।
તદભેદત એવ સર્વકસ્યાપ્યુપપત્તેરિહ જીવકાર્યતાયાઃ ॥ ૧૨૫॥

તદસિદ્ધિમુખાનુમાનદોષાનુદયાદુક્તનયસ્ય નિર્મલત્વમ્ ।
ભ્રમધીપ્રમિતિત્વવેદિનોઽતસ્તવ ન ભ્રાન્તિપદાર્થ એવ સિધ્યેત્ ॥ ૧૨૬॥

અપિ ચ ભ્રમ એષ કિં તવાન્તઃકરણસ્યેતિ ચિદાત્મનોઽથવાઽસૌ ।
પરિણામ ઇહાસ્સ્દિમો ન તસ્યાઽઽત્મગતત્વાનુભવસ્ય ભઙ્ગપત્તેઃ ॥ ૧૨૭॥

નનુ રક્તતમપ્રસૂનયોગાત્ સ્ફટિકે સંસ્ફુરણં યથાઽરુણિમ્નઃ ।
ભ્રમસંયુત ચિત્તયોગતોઽસ્ય ભ્રમણસ્યાનુભવસ્તથાઽઽત્મનિ સ્યાત્ ॥ ૧૨૮॥

ઇતિ ચેદયમીરયાઽઽત્મયોગો ભ્રમણસ્યાઽઽશ્રિત એષ સન્નસન્વા ।
પ્રથમો ઘટતે ન સંસૃજેસ્તેઽપરથાખ્યાતિવદસ્ય શુન્યકત્વાત્ ॥ ૧૨૯॥

ચરમોઽપિ ન યુજ્યતેઽપરોક્ષપ્રથનસ્યાનુપપદ્યમાનતાયાઃ ।
પરિણામવિશેષ આત્મનોઽસૌ ભ્રમ ઇત્યેષ ન યુજ્યતેઽન્ત્યપક્ષઃ ॥ ૧૩૦॥

અસભાગતયાઽઽત્મનો નિરસ્તેતરયુક્તેઃ પરિણત્યયોગ્યતાયાઃ ।
પરિણત્યયુજેશ્ચ યોગ્યતાયામપિ બુદ્ધ્યાકૃતિતશ્ચિદાત્મનોઽસ્ય ॥ ૧૩૧॥

ન હિ નિત્યચિદાશ્રયપ્રતીચઃ પરિણામઃ પુનરન્યચિત્સ્વરૂપઃ ।
ગુણયોઃ સમુદાયગત્યયોગાદ્ગુણતાવાન્તરજાતિતઃ સજાત્યોઃ ॥ ૧૩૨॥

યુગપત્સમવૈતિ નો હિ શૌક્લ્યદ્વયકં યત્ર ચ કુત્રચિદ્યદેતત્ ।

નનુ ચિન્ન ગુણો ગુણી તથા ચ પ્રસરેન્નોદિતદુષ્ટતેતિ ચેન્ન ॥ ૧૩૩॥

કટકાશ્રયભૂતદીપ્તહેમ્નૈ રુચકાધારકભાવવત્તથૈવ ।
અવિનાશિચિદાશ્રયસ્ય ભૂયોઽન્યચિદાધારતયા સ્થિતેરયોગાત્ ॥ ૧૩૪॥

ન ચ સંસ્કૃતિરગ્રહોઽપ્યવિદ્યા ભ્રમશબ્દાર્થનિરુક્ત્યસમ્ભવેઽપિ ।
ભ્રમસંજ્ઞિતવસ્ત્વસમ્ભવેન ભ્રમસમ્પાદિતસંસ્કૃતેરયોગાત્ ॥ ૧૩૫॥

અપિ નાગ્રહણં ચિતેરભાવશ્ચિતિરૂપગ્રહણસ્ય નિત્યતાયાઃ ।
તદસમ્ભવતો ન વૃત્ત્યભાવસ્તદભાવેઽપિ ચિદાત્મનોઽવભાસાત્ ॥ ૧૩૬॥

ન ચ ભઙ્જકમીક્ષ્યતે ન તસ્યોપગમે દુઃખજડાનૃતાત્મકસ્ય ।
ઇતિ વાચ્યમખણ્ડવૃત્તિરૂઢેશ્વરબોધસ્ય નિવર્તકત્વયોગાત્ ॥ ૧૩૭॥

અપિ ચેષ્ટતદન્યહેતુધીજે જગતઃ કૃત્યકૃતી ન તે ઘટેતે ।
સકલવ્યવહારસઙ્કુરત્વાત્તદલં જીવનિકાઽપિ દુર્લભા તે ॥ ૧૩૮॥

ઇતિ યુક્તિશતૈરમર્ત્યકીર્તિઃ સુમતીન્દ્રં તમતન્દ્રિતં સ જિત્વા ।
શ્રુતિભાવવિરોધિભાવભાજં વિમતગ્રન્થમમન્થરં મમન્થ ॥ ૧૩૯॥

ઇતિ ભાસ્કરદુર્મતેઽભિભૂતે ભગવત્પાદકથાસુધા પ્રસસ્રે ।
ઘનવાર્ષિકવારિવાહજાલે વિગતે શારદચન્દ્રચન્દ્રિકેવ ॥ ૧૪૦॥

સ કથાભિરવન્તિષુ પ્રસિદ્ધાન્ વિબુધાન્ બાણમયૂરદણ્ડિમુખ્યાન્ ।
શિથિલીકૃતદુર્મતાભિમાનાન્નિજભાષ્યશ્રવણોત્સુકાંશ્ચકાર ॥ ૧૪૧॥

પ્રતિપદ્ય તુ બાહુલિકાન્ મહર્ષૌ વિનયિભ્યઃ પ્રવિવૃણ્વતિ સ્વભાષ્યમ્ ।
અવદન્નસહિષ્ણવઃ પ્રવીણાઃ સમયે કેચિદથાઽઽર્હતાભિધાને ॥ ૧૪૨॥

નનુ જીવમજીવમાસ્રવં ચ શ્રિતવત્સંવરનિર્જરૌ ચ બન્ધઃ ।
અપિ મોક્ષ ઉપૈષિ સપ્તસઙ્ખ્યાન્ન પદાર્થાન્ કથમેવ સપ્તભઙ્ગ્યા ॥ ૧૪૩॥

કથયાઽઽર્હત જીવમસ્તિકાયં સ્ફુટમેવંવિધ ઇત્યુવાચ મૌની ।
અવદત્સ ચ દેહતુલ્યમાનો દૃઢકર્માષ્ટકવેષ્ટિતશ્ચ વિદ્વન્ ॥ ૧૪૪॥

અમહાનનણુર્ઘટાદિવત્સ્યાત્સ ન નિત્યોઽપિ ચ માનુષાચ્ચ દેહાત્ ।
ગજદેહમયન્વિશેન્ન કૃત્સ્નં પ્રવિશેચ્ચ પ્લુષિદેહમપ્યકૃત્સ્નઃ ॥ ૧૪૫॥

ઉપયાન્તિ ચ કેચન પ્રતીકા મહતા સંહનનેન સઙ્ગમેઽસ્ય ।
અપયાન્ત્યધિજગ્મુષોઽલ્પદેહં તદયં દેહસમઃ સમશ્નુતેશ્ચ ॥ ૧૪૬॥

ઉપયન્ત ઇમે તથાઽપયન્તો યદિ વર્ષ્મેવ ન જીવતાં ભજેયુઃ ।
પ્રભવેયુરનાત્મનઃ કથં તે કથમાત્માવયવાઃ પ્રયન્તુ તસ્મિન્ ॥ ૧૪૭॥

જનિતારહિતાઃ ક્ષયેણ હીનાઃ સમુપાયાન્ત્યપયાન્તિ ચાઽઽત્મનસ્તે ।
અમુકોપચિતઃ પ્રયાતિ કૃત્સ્નં ત્વમુકૈશ્ચાપચિતઃ પ્રયાત્યકૃત્સ્નમ્ ॥ ૧૪૮॥

કિમચેતનતોત ચેતનત્વં વદ તેષાં ચરમે વિરુદ્ધમત્યા ।
વપુરુન્મથિતં ભવેત્તુ પૂર્વે બત કાર્ત્સ્ન્યેન વપુર્ન ચેતયેયુઃ ॥ ૧૪૯॥

ચલયન્તિ રથં યથૈકમત્યા બહવો વાજિન એવમપ્રતીતાઃ ।
ઇતરેતરમઙ્ગમેજયન્તુ જ્ઞપતે ચેતનતામપિ પ્રપદ્ય ॥ ૧૫૦॥

બહવોઽપિ નિયામકસ્ય સન્ચાત્સુમતે તત્ર ભજેયુરૈકમત્યમ્ ।
કથમત્ર નિયામકસ્ય તદ્વદ્વિવિરહાત્ કસ્યચિદપ્યદો ઘટેત ॥ ૧૫૧॥

ઉપયાન્તિ ન ચાપયાન્તિ જીવાવયવાઃ કિન્તુ મહત્તરે શરીરે ।
વિકસન્તિ ચ સઙ્કુચન્ત્યનિષ્ટે યતિવર્યાત્ર નિદર્શનં જલૌકા ॥ ૧૫૨॥

યદિ ચૈવમમી સવિક્રિયત્વાદ્ઘટવત્તે ચ વિનશ્વરા ભવેયુઃ ।
ઇતિ નશ્વરતાં પ્રયાતિ જીવે કૃતનાશાકૃતસઙ્ગમૌ ભવેતામ્ ॥ ૧૫૩॥

અપિ ચૈવમલાબુવદ્ભવાબ્ધૌ નિજકર્માષ્ટકભારમગ્નજન્તોઃ ।
સતતોર્ધ્વગતિસ્વરૂપમોક્ષસ્તવ સિદ્ધાન્તસમર્થિતો ન સિધ્યેત્ ॥ ૧૫૪॥

અપિ સાધનભૂતસપ્તભઙ્ગીનયમપ્યાર્હત નાઽઽદ્રિયામહે તે
પરમાર્થસતાં વિરોધમાજાં સ્થિતિરેકત્ર હિ નૈકદા ઘટેત ॥ ૧૫૫॥

ઇતિ માધ્યમિકેષુ ભગ્નદર્પેષ્વથ ભાષ્યાણિ સ નૈમિશે વિતત્ય ।
દરદાન્ ભરતાંશ્ચ શૂરસેનાન્ કુરુપાઞ્ચાલમુખાન્ બહૂનજૈષીત્ ॥ ૧૫૬॥

પટુયુક્તિનિકૃત્તસર્વશાસ્ત્રં ગુરુભટ્ટોદયનાદિકૈરજય્યમ્ ।
સ હિ ખણ્ડનકારમૂઢદર્પં બહુધા વ્યુદ્ય વશંવદં ચકાર ॥ ૧૫૭॥

તદનન્તરમેષ કામરૂપાનધિગત્યાર્ભિનવોપશબ્દગુપ્તમ્ ।
અજયત્કિલ શાક્તભાષ્યકારં સ ચ ભગ્નો મનસેદમાલુલોચે ॥ ૧૫૮॥

નિગમાબ્જવિકાસિવાલભાનોર્ન સમોઽમુષ્ય વિલોક્યતે ત્રિલોક્યામ્ ।
ન કથઞ્ચન મદ્વશવદોઽસૌ તદમું દૈવતકૃત્યયા હરેયમ્ ॥ ૧૫૯॥

ઇતિ ગૂઢમસૌ વિચિન્ત્ય પશ્ચાત્ સહ શિષ્યૈઃ સહસા સ્વશાક્તભાષ્યમ્ ।
પરિહૃત્ય જનાપવાદભીત્યા યમિનઃ શિષ્ય ઇવાન્વવર્તતૈષઃ ॥ ૧૬૦॥

નિજશિષ્યપદં ગતાનુદીચ્યાનિતિ કૃત્વાઽથ વિદેહકૌશલાદ્યૈઃ ।
વિહિતાપચિતિસ્તથાઽઙ્ગવઙ્ગેષ્વયમાસ્તીર્ય યશો જગામ ગૌડાન્ ॥ ૧૬૧॥

અભિભૂય મુરારિમિશ્રવર્યં સહસા ચોદયનં વિજિત્ય વાદે ।
અવધૂય ચ ધર્મગુપ્તમિશ્રં સ્વયશઃ પ્રૌઢમગાપયત્સ ગૌડાન્ ॥ ૧૬૨॥

પૂર્વં યેન વિમોહિતા દ્વિજવરાસ્તસ્યાસતોઽરીન્ કલૌ
બુદ્ધસ્ય પ્રબિભેદ મસ્કરિવરસ્તાન્ ભાસ્કરાદીન્ ક્ષણાત્ ।
શાસ્ત્રામ્નાયવિનિન્દકેન કુધિયા કૂટપ્રવાદાગ્રહા-
ન્નિષ્ણાતો નિગમાગમાદિષુ મતં દક્ષસ્ય કૂટગ્રહે ॥ ૧૬૩॥

શાક્તૈઃ પાશુપતૈરપિ ક્ષપણકૈઃ કાપાલિકૈર્વૈષ્ણવૈ-
રપ્યન્યૈરખિલૈઃ ખિલં ખલુ ખલૈર્દુર્વાદિભિર્વૈદિકમ્ ।
માર્ગં રક્ષિતુમુગ્રવાદિવિજયં નો માનહેતોર્વ્યધા-
ત્સર્વજ્ઞો ન યતોઽસ્ય સમ્ભવતિ સમ્માનગ્રહગ્રસ્તતા ॥ ૧૬૪॥

દિષ્ટે પઙ્કજવિષ્ટરેણ જગતામાદ્યેન તત્સૂનુભિ -
ર્નિર્દિષ્ટે સનકાદિભિઃ પરિચિતે પ્રાચેતસાદ્યૈરપિ ।
શ્રૌતાદ્વૈતપથે પરાત્મભિદુરાન્ દુર્વાદિનઃ કણ્ટકાન્
પ્રોદ્ધૃત્યાથ ચકાર તત્ર કરુણો મોક્ષાધ્વગક્ષુણ્ણતામ્ ॥ ૧૬૫॥

શાન્તિર્દાન્તિવિરાગતે હ્યુપરતિઃ ક્ષાન્તિઃ પરૈકાગ્રતા
શ્રદ્ધેતિ પ્રથિતાભિરેધિતતનૌ ષડ્વક્ત્રવન્માતૃભિઃ ।
ભિક્ષુક્ષોણિપતૌ પિચણ્ડિલતરોચ્ચણ્ડાતિકણ્ડૂચ્ચલ-
ત્પાખણ્ડાસુરખણ્ડનૈકરસિકે બાધા બુધાનાં કુતઃ ॥ ૧૬૬॥

યત્રાઽઽરમ્ભજકાહલાકલકલૈર્લોકાયતો વિદ્રુતઃ
કાણાઃ કાણભુજાસ્તુ સૈન્યરજસા સાઙ્ખ્યૈર્ધૃતાસાઙ્ખ્યધીઃ ।
યુદ્ધ્વા તેષુ પલાયિતેષુ સહસા યોગાઃ સહૈવાદ્રવન્
કો વા વાદિભટઃ પટુર્ભુવિ ભવેદ્વસ્તું પુરસ્તાન્મુનેઃ ॥ ૧૬૭॥

ઉચ્ચણ્ડે પણબન્ધબન્ધુરતરે વાચંયમક્ષ્માપતેઃ
પૂર્વં મણ્ડનખણ્ડને સમુદભૂદ્યો ડિણ્ડિમાડમ્બરઃ ।
જાતાઃ શબ્દપરમ્પરાસ્તત ઇમાઃ પાખણ્ડદુર્વાદિના-
મદ્ય શ્રોત્રતટાટવીષુ દધતે દાવાનલજ્વાલતામ્ ॥ ૧૬૮॥

બુદ્ધો યુદ્ધસમુદ્યતઃ કિલ પુનઃ સ્થિત્વા ક્ષણાદ્વિદ્રુતઃ
કોણે દ્રાક્ક્ણભુગ્વ્યલીયત તમઃસ્તોમાવૃતો ગૌતમઃ ।
ભગ્નોઽસૌ કપિલઃ પલાયત તતઃ પાતઞ્જલાશ્ચાઞ્જલિં
ચક્રુસ્તસ્ય યતીશિતુશ્ચતુરતા કેનોપમીયેત સા ॥ ૧૬૯॥

હસ્તગ્રાહં ગૃહીતાઃ કતિચન સમરે વૈદિકા વાદિયોધાઃ
કાણાદાદ્યાઃ પરે તુ પ્રસભમભિહતા હન્ત લોકાયતાદ્યાઃ ।
ગાઢં બન્દીકૃતાસ્તે સુચિરમથ પુનઃ સ્વસ્વરાજ્યે નિયુક્તાઃ
સેવન્તે તં વિચિત્રા યતિધરણિપતેઃ શરતા વા દયા વા ॥ ૧૭૦॥

શાન્ત્યાદ્યર્ણવવાડવાનલશિખા સત્યાભ્રવાત્યા દયા-
જ્યોત્સ્નાદર્શનિશાઽથ શાન્તિનલિનીરાકાશશાઙ્કદ્યુતિઃ ।
આસ્તિક્યદ્રુમદાવપાવકનવજ્વાલાવલી સત્કથા-
હંસીપ્રાવૃડખણ્ડિ દણ્ડિપતિના પાખણ્ડવાઙ્મણ્ડલી ॥ ૧૭૧॥

અદ્વૈતામૃતવર્ષિભિઃ પરગુરુવ્યાહારધારાધરૈઃ
કાન્તૈર્હન્ત સમન્તતઃ પ્રસૃમરૈરુત્કૃત્તતાપત્રયૈઃ ।
દુર્ભિક્ષં સ્વપરૈકતાફલગતં દુર્ભિક્ષુસમ્પાદિતં
શાન્તં સમ્પ્રતિ ખણ્ડિતાચ નિબિડાઃ પાખણ્ડચણ્ડાતપાઃ ॥ ૧૭૨॥

શાન્તાનાં સુભટાઃ કપાલિકપતદ્ગ્રાહગ્રહવ્યાવૃતાઃ
કાણાદપ્રતિહારિણઃ ક્ષપણકક્ષોણીશવૈતાલિકાઃ ।
સામન્તાશ્ચ દિગમ્બરાન્વયભુવશ્ચાર્વાકવંશાઙ્કુરા
નવ્યાઃ કેચિદલં મુનીશ્વરગિરા નીતાઃ કથાશેષતામ્ ॥ ૧૭૩॥

ઇતિ સકલદિશાસુ દ્વૈતવાર્તાનિવૃત્તૌ
સ્વયમથ પરિતસ્તારાયમદ્વૈતવર્ત્મ ।
પ્રતિદિનમપિ કુર્વન્ સર્વસન્દેહમોક્ષં
રવિરિવ તિમિરૌઘે સમ્પ્રશાન્તે મહઃ સ્વમ્ ॥

ઇતિ શ્રીમાધવીયે તત્તદાશાજયકૌતુકી ।
સઙ્ક્ષેપશઙ્કરજયે સર્ગઃ પઞ્ચદશોઽભવત્ ॥ ૧૫ ॥

આદિતઃ શ્લોકાઃ ૧૭૩૬ ।

# શઙ્કરદિગ્વિજયમ્

## ॥ ૧૬. ષોડશઃ સર્ગઃ શ્રીમદાચાર્યાણાં શારદાપીઠવાસવર્ણનમ્ ॥

અથ ષોડશઃ સર્ગઃ - ॥ ૧૬॥

અથ યદા જિતવાન્યતિશેખરોઽભિનવગુપ્તમનુત્તમમાન્ત્રિકમ્ ।
સ તુ તદાઽપજિતો યતિગોચરં ઇતમનાઃ કૃતવાનપગોરણમ્ ॥ ૧॥

સ તતોઽભિચચાર મૂઢબુદ્ધિર્યતિશાર્દૂલમમું પ્રરૂઢરોષઃ ।
અચિકિત્સ્યતમો ભિષગ્ભિરસ્માદજનિષ્ટાસ્ય ભગન્દરાખ્યરોગઃ ॥ ૨॥

અચિકિત્સ્યભગન્દરાખ્યરોગપ્રસરચ્છોણિતપઙ્કિલસ્વશાટ્યાઃ ।
અજુગુપ્સવિશોધનાદિરૂપાં પરિચર્યામકૃતાસ્ય તોટકાર્યઃ ॥ ૩॥

ભગન્દરવ્યાધિનિપીડિતં ગુરું નિરીક્ષ્ય શિષ્યાઃ સમવોધયઞ્શનૈઃ ।
નોપેક્ષણીયો ભગવન્ મહામયસ્ત્વપીડિતઃ શત્રુરિવર્દ્ધિમાપ્નુયાત્ ॥ ૪॥

મમત્વહાનાદ્ભવતા શરીરકે ન ગણ્યતે વ્યાધિકૃતાઽઽર્તિરીદૃશી ।
પશ્યન્ત એવાન્તિકવર્તિનો વયં ભૃશાતુરાઃ સ્મઃ સહસા વ્યથાસહાઃ ॥ ૫॥

ચિકિત્સકા વ્યાધિનિદાનકોવિદાઃ સમ્પ્રચ્છનીયા ભગવન્નિતસ્તતઃ ।
પ્રત્યક્ષવત્સમ્પ્રતિ સન્તિ પૂરુષા જીવાતુવેદે ગદિતાર્થસિદ્ધિદાઃ ॥ ૬॥

ઉપેક્ષમાણેઽપિ ગુરાવનાસ્થયા શરીરકાદૌ સુખમાત્મનીશ્વરૈઃ ।
નોપેક્ષણીયં ગુરુદુઃખદૃશ્વભિર્દુઃખં વિનેયૈરિતિ શાસ્ત્રનિશ્ચયઃ ॥ ૭॥

સ્વસ્થે ભવત્પાદસરોરુહદ્વયે સ્વસ્થા વયં યન્મધુપાયિવૃત્તયઃ ।
તસ્માદ્ભવેત્તાવકવિગ્રહો યથા સ્વસ્થસ્તથા વાઞ્છતિ પૂજ્ય નો મનઃ ॥ ૮॥

વ્યાધિર્હિ જન્માન્તરપાપપાકો ભોગેન તસ્માત્ ક્ષપણીય એષઃ ।
અભુજ્યમાનઃ પુરુષં ન મુઞ્ચેજ્જન્માન્તરેઽપીતિ હિ શાસ્ત્રવાદઃ ॥ ૯॥

વ્યાધિર્દ્વિધાઽસૌ કથિતો હિ વિદ્ભિઃ કર્મોદ્ભવો ધાતુકૃતસ્તથેતિ ।
આદ્યક્ષયઃ કર્મણ એવ લીનાચ્ચિકિત્સયા સ્યાચ્ચરમોદિતસ્ય ॥ ૧૦॥

સઙ્ક્ષીયતાં કર્મણ એવ સઙ્ક્ષયાદ્વ્યાધિઃ પ્રવૃત્તો ન ચિકિત્સ્યતે મયા ।
પતેચ્છરીરં યદિ તન્નિમિત્તતઃ પતત્વવશ્યં ન વિભેગિ કિઞ્ચન ॥ ૧૧॥

સત્યં ગુરો તે ન શરીરલોભઃ સ્પૃહાલુતા નસ્તુ ચિરાય તસ્મૈ ।
ત્વજ્જીવનેનૈવ હિ જીવનં નઃ પાથશ્ચરાણાં જલમેવ તદ્ધિ ॥ ૧૨॥

સ્વયં કૃતાર્થાઃ પરતુષ્ટિહેતોઃ કુર્વન્તિ સન્તો નિજદેહરક્ષામ્ ।
તસ્માચ્છરીરં પરિરક્ષણીયં ત્વયાઽપિ લોકસ્ય હિતાય વિદ્વન્ ॥ ૧૩॥

નિર્બન્ધતો ગુરુવરઃ પ્રદદાવનુજ્ઞાં
દિગ્ભ્યો ભિષગ્વરસમાનયનાય તેભ્યઃ ।
નત્વા ગુરું પ્રતિદિશં પ્રયયુઃ પ્રહૃષ્ટાઃ
શિષ્યાઃ પ્રવાસકુશલા હરિભક્તિભાજઃ ॥ ૧૪॥

પ્રાયો નૃપં કવિજના ભિષજો વદાન્યં
વિત્તાર્થિનઃ પ્રતિદિનં કુશલા જુષન્તે ।
તસ્માદમી નૃપપુરેષુ નિરીક્ષણીયા
ઇત્યેવ ચેતસિ મનોરથમાદધાનાઃ ॥ ૧૫॥

તેઽતીત્ય દેશાન્ બહુલાન્ સ્વકાર્યસિદ્ધ્યૈ ક્વચિદ્રાજપુરે ભિષગ્ભિઃ ।
અવાપ્ય સન્દર્શનભાષણાનિ સમાનયંસ્તાન ગુરુવર્યપાર્શ્વમ્ ॥ ૧૬॥

તતો દ્વિજેન્દ્રૈર્નિજસેવકૈસ્તાન્ સન્તોષિતાન્ સ્વાભિમતાર્થદાનૈઃ ।
યદત્ર કર્તવ્યમુદીર્યતાં તત્કુર્મઃ સ્વશક્ત્યેતિ વદાઞ્જગૌ સઃ ॥ ૧૭॥

ઉપગુદં ભિષજઃ પરિબાધતે ગદ ઉદેત્ય તનું તનુમધ્યગઃ ।
યદિદમસ્ય વિધેયમિદં ધ્રુવં વદત રોગતમસ્તિમિરારયઃ ॥ ૧૮॥

ચિરમુપેક્ષિતવાનહમેતકં દુરિતજોઽયમિતિ પ્રતિભાતિ મે ।
તદપિ શિષ્યગણૈર્નિરહિંસ્યહં પ્રહિતવાન્ ભવદાનયનાય તાન્ ॥ ૧૯॥

નિગદિતે મુનિનેતિ ભિષગ્વરા વિદધિરે બહુધા ગદસત્ક્રિયાઃ ।
ન ચ શશામ ગઢ઼ોા બહુતાપદો વિમનસઃ પટવો ભિષજોઽભવન્ ॥ ૨૦॥

અથ મુનિર્વિમનસ્ત્વસમન્વિતાનિદમવોચત સિદ્ધભિષગ્વરાન્ ।
અટત ગેહમગાત્સમયો બહુર્ગદહૃતે ભવતામિત ઈયુષામ્ ॥ ૨૧॥

દિનચયં ગણયન્ પથિલોચનઃ પ્રિયજનો નિવસેદ્વિરહાતુરઃ ।

નરપતિર્ભવતાં શરણં ધ્રુવં સ ચ વિદેશગમં શ્રુતવાન્યદિ ॥ ૨૨॥

રુષિતવાન્ન ચ વો વિતરેન્નૃપઃ ફણિતજીવિતમક્ષતશાસનઃ ।
તુરગવન્નૃપતિશ્ચલમાનસો ભિષજમન્યમસૌ વિદધીત વા ॥ ૨૩॥

જનપદો વિરલો ગદહારકૈર્બહુલરુગ્ણજનઃ પ્રકૃતેરતઃ ।
મૃગયતે ભવતો ભવતાં ગૃહે ગદિજનઃ સહિતું ગદમક્ષમઃ ॥ ૨૪॥

પિતૃકૃતા જનિરસ્ય શરીરિણઃ સમવનં ગદહારિષુ તિષ્ઠતિ ।
જનિતમપ્યફલં ભિષજં વિના ભિષગસૌ હરિરેવ તનૂભૃતઃ ॥ ૨૫॥

યદુદિતં ભવતા વિતથં ન તત્તદપિ ન ક્ષમતે વ્રજિતું મનઃ ।
સુરભુવં પ્રવિહાય મનુષ્યગાં વ્રજિતુમિચ્છતિ કોઽત્ર નરઃ સુધીઃ ॥ ૨૬॥

ઇતિ નિગદ્ય યયુર્ભિષજાં ગણા વિમનસઃ પટવોઽપિ નિજાન્ ગૃહાન્ ।
અથ મુનિર્વિજન્મમતાં તનૌ ગુરુવરો ગુરુદુઃખમસોઢ સઃ ॥ ૨૭॥

પ્રથિતૈરવનૌ પરઃસહસ્રૈરગદઙ્કારચયૈરથાચિકિત્સ્યે ।
પ્રબલે સતિ હા ભગન્દરાખ્યે સ્મરતિ સ્મ સ્મરશાસનં મુનીન્દ્રઃ ॥ ૨૮॥

સ્મરશાસનશાસનાન્નિયુક્તૌ દ્વિજવેષં પ્રવિધાય ભૂમિમાપ્તૌ ।
ઉપસેદતુરશ્વિનૌ ચ દેવૌ સુભુજૌ સાઞ્જનલોચનૌ સુપુસ્તૌ ॥ ૨૯॥

યતિવર્ય ચિકિત્સિતું ન શક્યા પરકૃત્યાજનિતા હિ તે રુગેષા ।
ઇતિ તં સમુદીર્ય યોગિવર્યં વિબુધૌ તૌ પ્રતિજગ્મતુર્યથેતમ્ ॥ ૩૦॥

તદનુ સ્વગુરોર્ગદાપનુત્ત્યૈ પરમન્ત્રં તુ જજાપ જાતમન્યુઃ ।
મુહરાર્યપદેન વાર્યમાણોઽપ્યરિવર્ગેઽપ્યનુકમ્પિનાઽબ્જપાદઃ ॥ ૩૧॥

અમુનૈવ તતો ગદેન નીચઃ પ્રતિયાતેન હતો મમાર ગુપ્તઃ ।
મતિપૂર્વકૃતો મહાનુભાવેષ્વનયઃ કસ્ય ભવેત્સુખોપલબ્ધ્યૈ ॥ ૩૨॥

સ્વસ્થઃ સોઽયં બ્રહ્મ સાયં કદાચિદ્ધ્યાયન્ ગઙ્ગાપૂરસઙ્ગાર્દ્રવાતૈઃ ।
આગચ્છન્તં સૈકતે પ્રત્યગચ્છદ્યોગીશાનં ગૌડપાદાભિધાનમ્ ॥ ૩૩॥

પાણૌ ફુલશ્વેતપઙ્કેરુહશ્રીમૈત્રીપાત્રીભૂતભાસા ઘટેન ।
આરાદ્રાજત્કૈરવાનન્દસન્ધ્યારાગારક્તામ્ભોદલીલાં દધાનમ્ ॥ ૩૪॥

પાણૌ શોણામ્ભોજબુદ્ધ્યા સમન્તાદ્ભ્રામ્યદ્ભૃઙ્ગીમણ્ડલીતુલ્યકુલ્યામ્ ।
અઙ્ગુલ્યગ્રાસઙ્ગિરુદ્રાક્ષમાલામઙ્ગુષ્ઠાગ્રેણાસકૃદ્ભ્રામયન્તમ્ ॥ ૩૫॥

આર્યસ્યાથો ગૌઢપાદસ્ય પાદાવભ્યર્ચ્યાસૌ શઙ્કરઃ પઙ્કજાભૌ ।
ભક્તિશ્રદ્ધાસમ્ભ્રમાક્રાન્તચેતાઃ પ્રહ્વસ્તસ્થાવગ્રતઃ પ્રાઞ્જલિઃ સન્ ॥ ૩૬॥

સિઞ્ચન્નેનં ક્ષીરવારાશિવીચીસાચિવ્યાયાઽઽસન્નયત્નૈઃ કટાક્ષૈઃ ।
દન્તજ્યોત્સ્નાદન્તુરાશ્ચાપિ કુર્વન્નાશાઃ સૂક્તિં સન્દધે ગૌઢપાદઃ ॥ ૩૭॥

કચ્ચિત્સર્વા વેત્સિ ગોવિન્દનાનો હૃદ્યા વિદ્યા સંસૃદુદ્ધારકૃદ્યા ।
કચ્ચિત્તત્વં તત્ત્વમાનન્દરૂપં નિત્યં સચ્ચિન્નિર્મલં વેત્સિ વેદ્યમ્ ॥ ૩૮॥

ભક્ત્યા યુક્તા સ્વાનુરક્તા વિરક્તાઃ શાન્તા દાન્તાઃ સન્તતં શ્રદ્દધાનાઃ ।
કચ્ચિત્તત્વજ્ઞાનકામા વિનીતાઃ શુશ્રૂષન્તે શિષ્યવર્યા ગુરું ત્વામ્ ॥ ૩૯॥

કચ્ચિન્નિત્યાઃ શત્રવો નિર્જિતાસ્તે કચ્ચિત્પ્રાપ્તાઃ સદ્ગુણાઃ શાન્તિપૂર્વાઃ ।
કચ્ચિદ્યોગઃ સાધિતોઽષ્ટાઙ્ગયુક્તઃ કચ્ચિચ્ચિત્તં સાધુચિત્તત્વગં તે ॥ ૪૦॥

ઇત્યદ્વૈતાચાર્યવર્યેણ તેન પ્રેમ્ણા પૃષ્ટઃ શઙ્કરઃ સાધુશીલઃ ।
ભક્ત્યુદ્રેકાદ્બાષ્પપર્યાકુલાક્ષો બધ્નન્મૂર્ધન્યઞ્જલિં વ્યાજહાર ॥ ૪૧॥

યદ્યત્પૃષ્ટં સ્પષ્ટમાચાર્યપાદૈસ્તત્તત્સર્વં ભો ભવિષ્યત્યવશ્યમ્ ।
કારુણ્યાબ્ધેઃ કલ્યયુષ્મત્કટાક્ષૈર્દૃષ્ટસ્યાઽઽહુર્દુર્લભં કિન્નુ જન્તોઃ ॥ ૪૨॥

મૂકો વાગ્મી મન્દધીઃ પણ્ડિતાગ્ર્યઃ પાપાચારઃ પુણ્યનિષ્ઠેષુ ગણ્યઃ ।
કામાસક્તઃ કીર્તિમાન્નિઃસ્પૃહાણામાર્યાપાઙ્ગાલોકતઃ સ્યાત્ક્ષણેન ॥ ૪૩॥

લેશં વાઽપિ જ્ઞાતુમીષ્ટે પુમાન્કઃ સીમાતીતસ્યાદ્ય યુષ્મન્મહિમ્નઃ ।
તુષ્ટ્વાઽત્યન્તં તત્ત્વવિદ્યોપદેષ્ટા જાતઃ સાક્ષાદ્યસ્ય વૈયાસકિઃ સઃ ॥ ૪૪॥

આજાનાત્મજ્ઞાનસિદ્ધં યમારાદૌદાસીન્યાજ્જાતમાત્રં વ્રજન્તમ્ ।
પ્રેમાવેશાત્પુત્ર પુત્રેતિ શોચન્પારાશર્યઃ પૃષ્ઠતોઽનુપ્રપેદે ॥ ૪૫॥

યશ્ચાઽઽહૂતો યોગભાષ્યપ્રણેત્રા પિત્રા પ્રાપ્તઃ સ પ્રપઞ્ચૈકભાવમ્ ।
સર્વાહન્તાશીલનાદ્યોગભૂમેઃ પ્રત્યાક્રોશં પ્રાતનોદ્વૃક્ષરૂપઃ ॥ ૪૬॥

તત્તાદૃક્ષજ્ઞાનપાથોધિયુષ્મત્પાદદ્વન્દ્વં પદ્મસૌહાર્દહૃદ્યમ્ ।
દૈવાદેતદ્દીનદૃગ્ગોચરશ્ચેદ્ભક્તસ્યૈતદ્ભાગધેયં હ્યમેયમ્ ॥ ૪૭॥

ઇત્યાકર્ણ્યાથાબ્રવીદ્ગૌડપાદો વત્સ શ્રુત્વા વાસ્તવાંસ્ત્વદ્ગુણૌઘાન્ ।
દ્રષ્ટું શાન્તસ્વાન્તવન્તં મમ ત્વાં ગાઢોત્કણ્ઠાગર્ભિતં ચિત્તમાસીત્ ॥ ૪૮॥

કૃતાસ્ત્વયા ભાષ્યમુખા નિબન્ધા મત્કારિકાવારિજનુઃસુખાર્કાઃ ।
શ્રુત્વેતિ ગોવિન્દમુખાત્પ્રહૃષ્ય દૃગધ્વનીનોઽસ્મિ તવાદ્ય વિદ્વન્ ॥ ૪૯॥

ઇતિ સ્ફુટં પ્રોક્તવતે વિનીતઃ સોઽશ્રાવયદ્ભાષ્યમશેષમસ્મૈ ।
વિશિષ્ય માણ્ડૂક્યગભાષ્યયુગ્મં શ્રુત્વા પ્રહૃષ્યન્નિદમબ્રવીત્તમ્ ॥ ૫૦॥

મત્કારિકાભાવવિબોધિતાદૃઙ્માણ્ડૂક્યભાષ્યશ્રવણોત્થહર્ષઃ ।
દાતું વરં તે વિદુષાં વરાય પ્રોત્સાહયત્યાશુ વરં વૃણીષ્વ ॥ ૫૧॥

સ પ્રાહ પર્યાયશુકર્ષિમીક્ષ્ય ભવન્તમદ્રાક્ષમતિષ્યપૂરુષમ્ ।
વરઃ પરઃ કોઽસ્તિ તથાઽપિ ચિન્તનં ચિત્તત્ત્વગં મેઽસ્તુ ગુરો નિરન્તરમ્ ॥ ૫૨॥

તથેતિ સોઽન્તર્ધિમપાસ્તમોહે ગતે ચિરઞ્જીવિમુનાવથાસૌ ।
વૃત્તાન્તમેતં સ મુદાઽઽશ્રવેભ્યઃ સંશ્રાવયંસ્તાં ક્ષણદામનૈષીત્ ॥ ૫૩॥

અથ દ્યુનદ્યામુષસિ ક્ષમીન્દ્રો નિર્વર્ત્ય નિત્યં વિધિવત્સ શિષ્યૈઃ ।
તીરે નિદિધ્યાસનલાલસોઽભૂદત્રાન્તરેઽશ્રૂયત લોકવાર્તા ॥ ૫૪॥

જમ્બૂદ્વીપં શસ્યતેઽસ્યાં પૃથિવ્યાં તત્રાપ્યેતન્મણ્ડલં ભારતાખ્યમ્ ।
કાશ્મીરાખ્યં મણ્ડલં તત્ર શસ્તં યત્રાઽઽસ્તેઽસૌ શારદા વાગધીશા ॥ ૫૫॥

દ્વારૈર્યુક્તં માણ્ડપૈસ્તચ્ચતુર્ભિર્દેવ્યા ગેહં યત્ર સર્વજ્ઞપીઠમ્ ।
યત્રાઽઽરોહે સર્વવિત્સજ્જનાનાં નાન્યે સર્વે યત્પ્રવેષ્ટું ક્ષમન્તે ॥ ૫૬॥

પ્રાચ્યાઃ પ્રાચ્યાં પશ્ચિમાઃ પશ્ચિમાયાં યે ચોદીચ્યાસ્તામુદીચીં પ્રપન્નાઃ ।
સર્વજ્ઞાસ્તદ્દ્વારમુદ્ઘાટયન્તો દાક્ષા નદ્ધં નો તદુદ્ઘાટયન્તિ ॥ ૫૭॥

વાર્તામુપશ્રુત્ય સ દાક્ષિણાત્યો માનં તદીયં પરિમાતુમિચ્છન્ ।
કાશ્મીરદેશાય જગામ હૃષ્ટઃ શ્રીશઙ્કરો દ્વારમપાવરીતુમ્ ॥ ૫૮॥

દ્વારં પિનદ્ધં કિલ દાક્ષિણાત્યં ન સન્તિ વિદ્વાંસ ઇતીહ દાક્ષાઃ ।
તાં કિંવદન્તીં વિફલાં વિધાતું જગામ દેવીનિલયાય હૃષ્યન્ ॥ ૫૯॥

વાદિવ્રાતગજેન્દ્રદુર્મદઘટાદુર્ગર્વસઙ્કર્ષણ-
  શ્રીમચ્છઙ્કરદેશિકેન્દ્રમૃગરાડાયાતિ સર્વાર્થવિત્ ।
દૂરં ગચ્છત વાદિદુઃશઠગજાઃ સંન્યાસદંષ્ટ્રાયુધો
  વેદાન્તોરુવનાશ્રયસ્તદપરં દ્વૈતં વનં ભક્ષતિ ॥ ૬૦॥

કરટતટાન્તવાન્તમદસૌરભસારભર-
  સ્ખલદલિસમ્ભ્રમત્કલભકુમ્ભવિજૃમ્ભિબલઃ ।
હરિરિવ જમ્બુકાનમદદન્તગજાન્કુજના-

નપિ ખલુ નાક્ષિગોચરયતીહ યતિર્હતકાન્ ॥ ૬૧॥

સંશ્રાવયન્નધ્વનિ દેશિકેન્દ્રઃ શ્રીદક્ષિણદ્વારભુવં પ્રપેદે
કવાટમુદ્ઘાટ્ય નિવેષ્ટુકામં સસમ્ભ્રમં વાદિગણો ન્યરૌત્સીત્ ॥ ૬૨॥

અથાબ્રવીદ્વાદિગણઃ સ દેશિકં કિમર્થમેવં બહુસમ્ભ્રમક્રિયા ।
યદત્ર કાર્યં તદુદીર્યતાં શનૈર્ન સમ્ભ્રમઃ કર્તુમલં તદીપ્સિતમ્ ॥ ૬૩॥

યઃ કશ્ચદેત્યેતુ પરીક્ષિતું ચેદ્વેદાખિલં નાવિદિતં મમાણુ ।
ઇત્થં ભવાન્વક્તિ સમુન્નતીચ્છો દત્વા પરીક્ષાં વ્રજ દેવતાલયમ્ ॥ ૬૪॥

ષડ્ભાવવાદી કણભુઙ્મતસ્થઃ પપ્રચ્છ તં સ્વીયરહસ્યમેકમ્ ।
સંયોગભાજઃ પરમાણુયુગ્માજ્જાતં હિ સુક્ષ્મં દ્વ્યણુકં મતં નઃ ॥ ૬૫॥

યત્સ્યાદણુત્વં તદુપાશ્રિતં તજ્જાયેત કસ્માદ સર્વવિચ્ચેત્ ।
નો ચેલભુત્વં તત્ર વક્તુમેતે સર્વજ્ઞભાષાં વિહિતાં બ્રુવન્તિ ॥ ૬૬॥

યા દ્વિત્વસઙ્ખ્યા પરમાણુનિષ્ઠા સા કારણં તસ્ય ગતસ્ય માત્રા ।
ઇતીરિતે તદ્વચનં પ્રપૂજ્ય સ્વયં ન્યવર્તિષ્ટ કણાદલક્ષ્મીઃ ॥ ૬૭॥

તત્રાપિ નૈયાયિક આત્તગર્વઃ કણાદપક્ષાચ્ચરણાક્ષપક્ષે ।
મુક્તેર્વિશેષ વદ સર્વવિચ્ચેન્નો ચેત્પ્રતિજ્ઞાં ત્યજ સર્વવિત્ત્વે ॥ ૬૮॥

અત્યન્તનાશે ગુણસઙ્ગતેર્યા સ્થિતિર્નભોવત્કણભક્ષપક્ષે ।
મુક્તિસ્તદીયે ચરણાક્ષપક્ષે સાઽઽનન્દસંવિત્સહિતા વિમુક્તિઃ ॥ ૬૯॥

પદાર્થભેદઃ સ્ફુટ એવ સિદ્ધસ્તથેશ્વરઃ સર્વજગદ્વિધાતા ।
સ ઈશવાદીત્યુદિતેઽભિનન્ધ નૈયાયિકોઽપિ ન્યવૃતન્નિરોધાત્ ॥ ૭૦॥

તં કાપિલઃ પ્રાહ ચ મૂલયોનિઃ કિં વા સ્વતન્ત્રા ચિદધિષ્ઠિતા વા ।
જગન્નિદાનં વદ સર્વવિત્ત્વાન્નો ચેત્પ્રવેશસ્તવ દુર્લભઃ સ્યાત્ ॥ ૭૧॥

સા વિશ્વયોનિર્બહુરૂપભાગિની સ્વયં સ્વતન્ત્રા ત્રિગુણાલિકા સતી ।
ઇત્યેત્ર સિદ્ધાન્તગતિસ્તુ કાપિલી વેદાન્તપક્ષે પરતન્ત્રતા મતા ॥ ૭૨॥

તતો નદન્તો ન્યરુધન્ સગર્વા દત્ત્વા પરીક્ષાં વ્રજ ધામ દેવ્યાઃ ।
બૌદ્ધાસ્તથા સમ્પ્રથિતાઃ પૃથિવ્યાં બાહ્યાર્થવિજ્ઞાનકશુન્યવાદૈઃ ॥ ૭૩॥

બાહ્યાર્થવાદો દ્વિવિધસ્તદન્તરં વાચ્યં વિવિક્ષુર્યદિ દેવતાલયમ્ ।
વિજ્ઞાનવાદસ્ય ચ કિં વિભેદકં ભવન્મતાદબ્રૂહિ તતઃ પરં વ્રજ ॥ ૭૪॥

સૌત્રાન્તિકો વક્તિ હિ વેદ્યજાતં લિઙ્ગાધિગમ્યં ત્વિતરોઽક્ષિગમ્યમ્ ।
તયોસ્તયોર્ભઙ્ગુરતાઽવિશિષ્ટા ભેદઃ કિયાન્વેદનવેદ્યભાગી ॥ ૭૫॥

વિજ્ઞાનવાદી ક્ષણિકત્વમેષામઙ્ગીચકારાપિ બહુત્વમેષઃ ।
વેદાન્તવાદી સ્થિરસંવિદેકેત્યઙ્ગીચકારેતિ મહાન્વિશેષઃ ॥ ૭૬॥

અથાબ્રવીદ્દિગ્વસનાનુસારી રહસ્યમેકં વદ સર્વવિચ્ચેત્ ।
યદસ્તિકાયોત્તરશબ્દવાચ્યં તત્કિં મતેઽસ્મિન્વદ દેશિકાઽઽશુ ॥ ૭૭॥

તત્રાઽઽઽ દેશિકવરઃ શ‍ૃણુ રોચતે
　　ચેજ્જીવાદિપઞ્ચકમભીષ્ટમુદાહરન્તિ ।
તચ્છબ્દવાચ્યમિતિ જૈનમતેઽપ્રશસ્તે
　　યદ્યસ્તિ બોદ્ધુમપરં કથયાઽઽશુ તન્મે ॥ ૭૮॥

દત્તોત્તરે વાદિગણે તુ બાહ્યે બભાણ કશ્ચિત્કિલ જૈમિનીયઃ ।
શબ્દઃ કિમાત્મા વદ જૈમિનીયે દ્રવ્યં ગુણો વેતિ તતો વ્રજ ત્વમ્ ॥ ૭૯॥

નિત્યા વર્ણાઃ સર્વગાઃ શ્રોત્રવેદ્યા યત્તદ્રૂપં શબ્દજાલં ચ નિત્યમ્ ।
દ્રવ્યં વ્યાપીત્યબ્રુવઞ્જૈમિનીયા ઇત્યેવં તં પ્રોક્તવાન્દેશિકેન્દ્રઃ ॥ ૮૦॥

શાસ્ત્રેષુ સર્વેષ્વપિ દત્તવન્તં પ્રત્યુત્તરં તં સમપૂજયંસ્તે ।
દ્વારં સમુદ્ઘાટ્ય દદુશ્ચ માર્ગં તતો વિવેશાન્તરભૂમિભાગમ્ ॥ ૮૧॥

પાણૌ સનન્દનમસાવવલમ્બ્ય વિદ્યા-
　　ભદ્રાસનં તદ્ધરોઢુમનાશ્ચચાલ ।
અત્રાન્તરે વિધિવધૂર્વિબુધાગ્રગણ્ય-
　　માચાર્યશઙ્કરમવોચદનઙ્ગવાચા ॥ ૮૨॥

સર્વજ્ઞતા તેઽસ્તિ પુરૈવ યસ્માત્સર્વત્ર પર્યૈક્ષિ ભવાન્ન ચેત્તે ।
વિરિઞ્ચિરૂપાન્તરવિશ્વરૂપઃ શિષ્યઃ કથં સ્યાત્પ્રતિતાગ્રણીઃ સઃ ॥ ૮૩॥

સર્વજ્ઞતૈકૈવ ભવેન્ન હેતુઃ પીઠાધિરોહે પરિશુદ્ધતા ચ ।
સા તેઽસ્તિ વા નેતિ વિચાર્યમેતત્તિષ્ઠ ક્ષણં ત્વં કુરુ સાહસં મા ॥ ૮૪॥

ત્વં ચાઙ્ગનાઃ સમુપભુજ્ય કલારહસ્ય-
　　પ્રાવીણ્યભાજનસભૂર્યતિધર્મનિષ્ઠઃ ।
પ્રારોઢુમીદૃશપદં કથમર્હતા તે
　　સર્વજ્ઞતેચ વિમલત્વમપીહ હેતુઃ ॥ ૮૫॥

નાસ્મિઞ્શરીરે કૃતકિલ્બિષોઽહં
    જન્મપ્રભૃત્યમ્બ ન સન્દિહેઽહમ્ ।
વ્યધાયિ દેહાન્તરસંશ્રયાદ્ય-
    ન્ન તેન લિપ્યેત હિ કર્મણાઽન્યઃ ॥ ૮૬॥

ઇત્થં નિરુત્તરપદાં સ વિધાય દેવીં
    સર્વજ્ઞપીઠમધિરુહ્ય નનન્દ સભ્યઃ ।
સમ્માનિતોઽભવદસૌ વિબુધૈશ્ચ વાણ્યા
    ગાર્ગ્યા કહોલમુખરૈરિવ યાજ્ઞવલ્ક્યઃ ॥ ૮૭॥

વાદપ્રાદુર્વિનોદપ્રતિકથનસુધીવાદદુવરિતર્ક-
    ન્યક્કારસ્વૈરધાટીભરિતહરિદુપન્યસ્તમાહાનુભાવ્યઃ ।
સર્વજ્ઞો વસ્તુમર્હસ્ત્વમિતિ બહુમતઃ સ્ફારભારત્યમોઘ-
    શ્લાઘાજોઘુષ્યમાણો જયતિ યતિપતેઃ શારદાપીઠવાસઃ ॥ ૮૮॥

કુત્રાપ્યાસીત્પ્રલીનેક્ષણચરણકથા કાપિલી ક્વાપિ લીના
    ભગ્નાઽભગ્ના ગુરૂક્તિઃ ક્વચિદજનિ પરં ભટ્ટપાદપ્રવાદઃ ।
ભૂમાવાયોગકાણાદજનિમતમથાભૂતવાગ્ભેદવાર્તા
    દુર્દાન્તબ્રહ્મવિદ્યાગુરુદુરુદકથાદુન્દુભેર્ધિન્ધિમેતઃ ॥ ૮૯॥

કાણાદઃ ક્વ પ્રણાદઃ ક્વ ચ કપિલવચઃ ક્વાક્ષિપાદપ્રવાદઃ
    ક્વાપ્યન્ધા યોગકન્થા ક્વ ગુરુરતિલઘુઃ ક્વાપિ ભાટ્ટપ્રઘટ્ટમ્ ।
ક દ્વૈતાદ્વૈતવાર્તા ક્ષપણકવિકૃતિઃ ક્વાપિ પાષણ્ડષણ્ડ-
    ધ્વાન્તધ્વંસૈકભાનોર્જયતિ યતિપતેઃ શારદાપીઠવાસે ॥ ૯૦॥

તતો દિવિષદધ્વનિ ત્વરિતમધ્વરાશાવલી-
    ધુરન્ધરસમીરિતત્રિદશપાણિકોણાહતઃ ।
અરુન્દ્ધ હરિદન્તરં સ્વરભરૈર્ભ્રમત્સિન્ધુભિ
    ર્ઘનાઘનઘનારત્રપથમચન્ધુભિર્દુન્દુભિઃ ॥ ૯૧॥

કચભરવહનં પુલોમજાયાઃ કતિચિદહાન્યપગર્ભકં યથા સ્યાત્ ।
ગુરુશિરસિ તથા સુધાશનાઃ સ્વસ્તરુકુસુમાન્યથ હર્ષતોઽભ્યવર્ષન્ ॥ ૯૨॥

ઇતિ મુનિરતિતુષ્ટોઽધ્યુષ્ય સર્વજ્ઞપીઠં
    નિજમતગુરુતાયૈ નો પુનર્માનહેતોઃ ।
કતિચન વિનિવેશ્યાથર્ષ્યશ ૃઙ્ગાશ્રમાદૌ
    મુનિરથ બદરીં સ પ્રાપ કૈશ્ચિત્સ્વશિષ્યૈઃ ॥ ૯૩॥

દિવસાન્વિનિનાય તત્ર કાંશ્ચિત્સ ચ પાતઞ્જલતન્ત્રનિષ્ઠિતેભ્યઃ ।
કૃપયાપદિશન્સ્વસૂત્રભાષ્યં વિજિતત્યાજિત સર્વદર્શનેભ્યઃ ॥ ૯૪॥

નિતરાં યતિરાડુડુરાજકરપ્રકરમચુરપ્રસરસ્વયશાઃ ।
સ્વમયં સમયં ગમયન્નમયન્હૃદયં સદયં સુધિયાં શુશુભે ॥ ૯૫॥

એવમ્પ્રકારૈઃ કલિકલ્મષઘ્નૈઃ શિવાવતારસ્ય શુભૈશ્ચરિત્રૈઃ ।
દ્વાત્રિંશદત્યુજ્જ્વલકીર્તિરાશેઃ સમા વ્યતીયુઃ કિલ શઙ્કરસ્ય ॥ ૯૬॥

ભાષ્યં ભૂષ્યં સુશીલૈરકલિ કલિમલધ્વંસિ કૈવલ્યમૂલ્યં
હન્તાહન્તા સમન્તાત્કુપ્રતિનતિકૃતા ખણ્ડિતા પણ્ડિતાનામ્ ।
સદ્યો વિદ્યાતિતાઽસૌ વિષય વિમથનૈરમુક્તિપદ્યાઽનવદ્યા
શ્રેયો ભૂયો બુધાનામધિકતરમિતઃ શઙ્કરઃ કિં કરોતુ ॥ ૯૭॥

હન્તાશોભિ યશોભરૈસ્ત્રિજગતીમન્દારકુન્દેન્દુભા-
મુક્તાહારપટીરહીરવિહરન્નીહારતારાનિભૈઃ ।
કારુણ્યામૃતનિર્ઝરૈઃ સુકૃતિનાં દૈન્યાનલઃ શુન્યતાં
નીતઃ શઙ્કરયોગિના કિમધુના સૌરભ્યમારભ્યતામ્ ॥ ૯૮॥

આક્રાન્તાનિ દિગન્તરાણિ યશસા સાધીયસા ભૂયસા
વિસ્મેરાણિ દિગન્તરાણિ રચિતાન્યત્યદ્ભુતૈઃ ક્રીડિતૈઃ ।
ભક્તાઃ સ્વેપ્સિતભુક્તિમુક્તિકલનોપાયૈઃ કૃતાર્થીકૃતા
ભિક્ષુક્ષ્માપતિના કિમન્યદધુના સૌજન્યમાતન્યતામ્ ॥ ૯૯॥

પારિકાઙ્ક્ષીશ્વરોઽપ્યાપદુદ્ધારકં સેવમાનાતુલસ્વસ્તિવિસ્તારકમ્ ।
પાપદાવાનલાતાપસંહારકં યોગિવૃન્દાધિપઃ પ્રાપ કેદારકમ્ ॥ ૧૦૦॥

તત્રાતિશીતાર્દિતશિષ્યસઙ્ઘસંરક્ષણાયાતુલિતપ્રભાવઃ ।
તપ્તોદકં પ્રાર્થયતે સ્મ ચન્દ્રકલાધરાત્તીર્થકરપ્રધાનઃ ॥ ૧૦૧॥

કર્મન્દિવૃન્દપતિના ગિરિશોઽર્થિતઃ સન્
સન્તપ્તવારિલહરીં સ્વપદારવિન્દાત્ ।
પ્રાવર્તયત્પ્રથયતી યતિનાથકીર્તિ
યાઽદ્યાપિ તત્ર સમુદઞ્ચતિ તપ્તતોયા ॥ ૧૦૨॥

ઇતિ કૃતસુરકાર્યં નેતુમાજગ્મુરેનં
રજતશિખરશ‍ૃઙ્ગં તુઙ્ગમીશાવતારમ્ ।

વિધિશતમખચન્દ્રોપેન્દ્રવાય્વગ્નિપૂર્વાઃ
    સુરનિકરવરેણ્યાઃ સર્ષિસઙ્ઘાઃ સસિદ્ધાઃ ॥ ૧૦૩॥

વિદ્યુદવલ્લીનિયુતસમુદારબ્ધયુદ્ધૈર્વિમાનૈઃ
    સઙ્ખ્યાતીતૈઃ સપદિ ગગનાભોગમાચ્છાદયન્તઃ ।
સ્તુત્વા દેવં ત્રિપુરમથનં તે યતીશાનવેષં
    મન્દારોત્થૈઃ કુસુપનિચયૈરભ્રુવન્નર્ચયન્તઃ ॥ ૧૦૪॥

ભવાનાદ્યો દેવઃ કવલિતવિષઃ કામદહનઃ
    પુરારાતિર્વિશ્વપ્રભવલયહેતુસ્ત્રિનયનઃ ।
યદર્થં ગાં પ્રાપ્તો ભવમથન વૃત્તં તદધુના
    તદાયાહિ સ્વર્ગં સપદિ ગિરિશાસ્મત્પ્રિયકૃતે ॥ ૧૦૫॥

ઉન્મીલદ્વિનયપ્રધાનસુમનોવાક્યાવસાને મહા-
    દેવે સમ્ભૃતસમ્ભ્રમે નિજપદં ગન્તું મનઃ કુર્વતિ ।
શૈલાદિઃ પ્રમથૈઃ પરિષ્કૃતવપુસ્તસ્થૌ પુરસ્તત્ક્ષણા-
    દુક્ષા શારદવારિદુગ્ધવરટાહઙ્કારહુઙ્કારકૃત્ ॥ ૧૦૬॥

ઇન્દ્રોપેન્દ્રપ્રધાનૈસ્ત્રિદશપરિવૃઢૈઃ સ્તૂયમાનઃ પ્રસુનૈ-
    દિવ્યૈરભ્યર્ચ્યમાનઃ સરસિરુહભુવા દત્તહસ્તાવલમ્બઃ ।
આરુહ્યોક્ષાણમગ્ર્યં પ્રકટિતસુજટાજૂટચન્દ્રાવતંસઃ
    શ ૃણ્વન્નાલોકશબ્દં સમુદિતમૃષિભિર્ધામ નૈજં પ્રતસ્થે ॥ ૧૦૭॥

આદિતઃ શ્લોકાઃ ૧૮૪૩ ।

ઇતિ શ્રીમાધવીયે તચ્છારદાપીઠવાસગઃ ।
સઙ્ક્ષેપશઙ્કરજયે સર્ગઃ પૂર્ણોઽપિ ષોડશઃ ।

ઇતિ શ્રીમદ્વિદ્યારણ્યવિરચિતઃ શ્રીમચ્છઙ્કરદિગ્વિજયઃ સમાપ્તઃ ॥

Proofread by Mohan Chettoor

*Shankaradigvijayam*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*